सामाजिकविज्ञानम्

लोकतान्त्रिकराजनीतिः - 2

दशमकक्ष्यायै राजनीतिविज्ञानस्य पाठ्यपुस्तकम्



सामाजिक-विज्ञानम्

लोकतान्त्रिकराजनीतिः-२

दशमकक्ष्यायै राजनीतिविज्ञानस्य पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

जनवरीमासः 2013 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती। नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयम् एकया दृढया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति। आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले स्वस्य अनुभवैः चिन्तनस्य च अवसरान् कल्पयन्ति। अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयः स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभिः सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति मतं त्यजन्तु।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति। दैनन्दिन्यां समय-सारण्यां स्थिति-स्थापकत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारितं करिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने, हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः। एषः प्रयासः इतोऽपि गभीरतया स्यात् एतदर्थम् इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते, आश्चर्यस्य कृते, लघुषु समूहेषु वार्तालापस्य चर्चायाः कृते च, हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति। एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्, एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञा स्मः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः। वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-

मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति, यतः भाविसंशोधनेषु सहायता लभ्येत ।

नवदेहली
20 नवम्बरः 2006

निदेशकः
राष्ट्रिय-शैक्षिकानुसन्धानं
प्रशिक्षण-परिषद् च

भवतां कृते किञ्चित् पत्रम्

प्रियच्छात्र !, शिक्षकः अभिभावकश्च

राजनीति-विज्ञानस्य एकं पुस्तकं नवमकक्षायाः कृते आसीत् तथा च एतत् पाठ्यपुस्तकं दशमकक्षायै अस्ति । द्वे अपि पाठ्यपुस्तके मिलित्वा समग्रस्य कस्यचित् पाठ्यपुस्तकस्य निर्माणं कुरुतः । एतस्मात् एव कारणात् अस्माभिः प्रथमं पाठ्यपुस्तकं लोकतान्त्रिक-राजनीतिः – 1 इत्येतत् द्वितीयं च लोकतान्त्रिक-राजनीतिः – 2 इत्यतेत् कथितम् अस्ति । गतवर्षे अर्थात् नवमकक्षायाः पाठ्यपुस्तकस्य यत्र समापनं जातम् आसीत् ततः एव एतस्य पाठ्यपुस्तकस्य आरम्भं भवति । गतवर्षे लोकतन्त्रस्य यात्रायां भवतां परिचयः काभिश्चित् आधारभूतावधारणाभिः संस्थाभिः लोकतन्त्रस्य च नियमैः अधिनियमैः च सह जाता आसीत् । एतस्मिन् वर्षे विधीनां स्थाने प्रक्रियाविषये ध्यानकेन्द्रितं कृतम् अस्ति ।

यतो हि अस्मिन् वर्षे अधिकबलाघातः प्रक्रियाविषये क्रियते एतस्मात् कारणात् एतस्मिन् पुस्तके भवन्तः राजनीत्या सह इतोऽपि आधिक्येन प्रकटरूपेण च परिचिताः भविष्यन्ति । कस्यचित् चिन्तनशील-प्राणिनः रूपेण मनुष्यः परस्परं वासिभिः सह वासस्य शैलीं कथं परिवर्तते सुनिश्चिनोति च इत्यस्मिन् विषये एव राजनीतिः ज्ञापयति । तत्र विचाराः आदर्शाः सहयोगसमन्वयाः च अपि समाविशन्ति । एतस्मिन् एव परिधौ सङ्घर्षः प्रतिस्पर्धा वैयक्तिकानि सामूहिकानि च हितानि अपि सम्मिलितानि सन्ति । एतस्मात् एव कारणात् लोकतान्त्रिक-राजनीतौ प्रायः सत्तायाः सहभागितायाः सम्बन्धः एव प्रमुखरूपेण भवन्ति ।

अस्य पुस्तकस्य आरम्भिकाणां षड् अध्यायानां विषयवस्तु एतस्मिन् एव केन्द्रितम् अस्ति । एतेषु अध्यायेषु वयं सत्तासंरचनायाः संविभागस्य च कर्तॄणां विभिन्नरूपाणाम् अन्वेषणम् अपि करिष्यामः । प्रथमाध्यायः द्वितीयाध्यायः च परस्परं सम्बद्धौ स्तः । एतयोः द्वयोः अध्याययोः सत्तायाः सहभागितायाः धारणायाः परिचयः प्रदत्तः अस्ति तथा च विषयं विस्तारयन् तस्य सर्वकारस्य विभिन्नस्तरीयायाः सत्तायाः सहभागितायाः सन्दर्भे प्रस्तुतीकरणं कृतम् अस्ति । अनेन एव प्रकारेण तृतीयाध्यायः चतुर्थाध्यायः च अपि परस्परं सम्बद्धौ स्तः । एतयोः विभिन्न-सामाजिक-वर्गाणां मध्ये सत्तायाः सहभागितायाः पारस्परिकसम्बद्धतायाः च विषये लिखितम् अस्ति । अग्रिमौ द्वौ अध्यायौ अपि कस्यचित् घट्टस्य इव स्तः । एताभ्याम् अध्यायाभ्याम् अवगम्यते यत् विभिन्नानि राजनैतिक-सङ्घटनानि आन्दोलनानि च कथं लोकतन्त्राय आवश्यकानि सन्ति । सप्तमे अष्टमे च अध्याये भवतां सामुख्यं तैः दीर्घैः प्रश्नैः भविष्यति यैः सह अस्माभिः गतवर्षे एतस्याः यात्रायाः आरम्भः कृतः आसीत् । सप्तमे अध्याये लोकतन्त्रस्य परिणामानां वर्णनम् अस्ति । अस्मिन् अध्याये चर्चा अस्ति यत् लोकतन्त्रेण किं किम् अर्जितम् अस्ति तथा च कीदृशम् अर्जनम् अधुना अपि अवशिष्टम् अस्ति यत् न अर्जितम् अस्ति । सप्तमाध्याये या चर्चा अस्ति सा अस्मान् अष्टमाध्यायं प्रति नयति । तत्र वर्तमानकाले लोकतन्त्रस्य समक्षे विद्यमानाह्वानानां समाधानाय उपायानां चर्चा कृता अस्ति । गतवर्षे आरभमानायाः लोकतन्त्रस्य यात्रायाः अनेन प्रकारेण समापनं कृतम् अस्ति । क्रमशः वयं यथा यथा विभिन्नाध्यायानाम् अध्ययनं कुर्मः तेन वयं लोकतन्त्रस्य विस्तृताभिप्रायम् अवगच्छामः इति ।

इदं पुस्तकं कस्मिंश्चित् अन्यस्मिन् अर्थे अपि नवमकक्षायाः पाठ्यपुस्तकस्य संगतौ अस्ति । गतवर्षस्य पाठ्यपुस्तके शैल्याः प्रारूपस्य च सम्बद्धाः केचन प्रयोगाः कृताः आसन् । एतेषां प्रयोगाणां विषये गतवर्षस्य प्रयोगाः अपि एतस्य वर्षस्य प्रचलनवत् स्युः इति तेन प्रकारेण ते स्थापिताः सन्ति । इदं पुस्तकं निजकथानां चित्राणां प्रहेलिकानां व्यङ्ग्यचित्राणां च माध्यमेन विद्यार्थिभिः सह सामञ्जस्यं करोति । अधुना दृश्यसामग्री च वर्धिता अस्ति अस्ति तथा प्लसबाक्स इति नाम्ना किञ्चित् नवीनवस्तु योजितम् अस्ति । एतस्य पुस्तकस्य उपयोगः एवं कुर्वन्तु, शीर्षकस्य अन्तर्गतं सर्वासां नवीनानां पुरातनीनां च विशेषतानां च वर्णनं कृतम् अस्ति । एताः विशेषताः अवश्यमेव पठन्तु । महत्त्वपूर्णतथ्यम् इदम् अस्ति यत् एतत् पुस्तकम् उपदेशस्य शिक्षणस्य च प्रयासं न करोति । इदं भवद्भिः सह संवादं कर्तुम् इच्छति । भवन्तः अपि अवगमिष्यन्ति यत् लोकतन्त्रस्य विषये चिन्तनस्य इयम् एव शैली अथवा विधा अस्ति ।

वयम् अस्मिन् वर्षे अपि सौभाग्यशालिनः स्मः यत् देशस्य केचन अग्रगण्याः राजनीति-विज्ञानिनः पाठ्यपुस्तक-निर्मातृ-समितौ निजसहभागितायाः विषये सम्मतिं प्रकटितवन्तः। एतस्य पाठ्यपुस्तकस्य रचनायां प्रो.कृष्णकुमारः प्रो.हरिवासुदेवनः साहाय्यं कृतवन्तौ तथा च राष्ट्रिय-निरीक्षक-समितिजनाः यं परामर्शं दत्तवन्तः तदर्थंवयंतेषांसर्वेषांसहृदयंकृतज्ञाःस्मः।प्रो.सतीशदेशपाण्डेनैकान्अध्यायान्पठितवन्तःतथाचबहुमूल्यटिप्पणीं कृतवान्। वयं तेषां कृते कृतज्ञतां विज्ञापयामः। अनुराधासेनः सुमनलता मनीषजैनः राधिकामेननः मालिनीघोषः एलेक्स.एम.जार्जः पङ्कजपुष्करः च इत्येतादृशाः शिक्षकाः शिक्षाविदां च समवायः एतस्य पुस्तकस्य प्रारूपम् अपठत् सर्वे अपि शिक्षकाः बहुमूल्यपरामर्शान् अपि दत्तवन्तः। वयम् अत्र एलेक्स-एम.जार्जस्य पंकजपुष्करस्य च प्रचण्डप्रयासस्य विशेषरूपेण चर्चां कर्तुम् इच्छामः तौ एतस्य पाठ्यपुस्तकस्य विशिष्टपरामर्शकौ एव आस्ताम् एतौ द्वौ अपि एतस्मिन् पुस्तके प्रकाशितसामग्रीं स्पष्टां रोचिकां संवादात्मिकां च कृतवन्तौ। पार्थिवशाहः श्रब्णी च एतत् पुस्तकम् आकर्षकं कृतवन्तौ। इरफानखानः एकदा पुनः भवतां कृते उन्नीं मुन्नीं च नवीनरूपेण अरचयत्। एआरके-ग्राफिक्स इत्यस्य अहमदरजाः सूचनाभिः पूर्णान् मुखरान् आरेखान् तथा च मानचित्राणि प्रदत्तवान्। वयं लोकनीतीः तथा च विकासशील-समाज-अध्ययन-पीठम् इत्यनयोः द्वयोः कृते अपि कृतज्ञतां विज्ञापयामः। सी.एस.डी.एस इति लोकनीतिः च इत्येते द्वे अपि संस्थे पाठ्यपुस्तक-निर्मातृ-समितये गृहवत् वातावरणं प्रकल्पितवत्यौ। एताभ्यां द्वाभ्याम् एव संस्थाभ्यां गतयोः द्वयोः वर्षयोः अवधिकाले निजस्थानं संसाधनानि च मुक्तभावेन एतस्मै पुस्तकप्रकाशनकार्याय दत्तानि। एतस्य पुस्तकस्य मूलसामग्री आङ्ग्लभाषया आसीत्। हिन्दीसंस्करणस्य सज्जीकरणकाले अस्माकम् अभिलाषः आसीत् यत् अनूदितपुस्तकम् अपि मूलपुस्तकसमम् एव स्यात् इति। एतत् तथ्यं मनसि निधाय पुस्तकस्य प्रारम्भिकानुवादम् अरविन्दमोहनः अकरोत्। भाषा आधिक्यने भावं प्रकट्येत् तथा च मूलसामग्र्याः सह प्रतिपङ्क्तिः साम्यं भजेत् इत्यर्थं श्रमसाध्यं कार्यं चन्दनश्रीवास्तवः अकरोत्।

एतस्य शैक्षिकवर्षस्य अन्ते भवन्तः परिषदः परीक्षायां भागं ग्रहीष्यन्ति। एतस्यै परीक्षायै वयं सर्वेषां शुभकामनाः स्वीकुर्याम इति। प्रायः जनाः राजनीतिविज्ञानस्य अध्ययनं जाड्यं जनयति तथा च राजनीतिः निःकृष्टविषयः अस्ति इति मन्यन्ते। आशास्महे यत् एतयोः द्वयोः पुस्तकयोः लोकतन्त्र-सम्बद्धं भवताम् अध्ययनं भवतां कृते साहायकं सार्थकं च भविष्यति तथा च अधुना भवन्तः एतादृशीनाम् उपर्युक्तनकारात्मक-प्रतिक्रियानां समाधानं कर्तुं शक्ष्यन्ति। आशास्महे यत् भवतः अग्रे राजनीति-विज्ञानं कस्यचित् विषयस्य रूपेण चित्वा अथवा दायित्वतः कर्तव्यपरायणस्य च नागरस्य रूपेण आचरणं कृत्वा लोकतान्त्रिक-राजनीतेः आलोचनात्मकस्य संतुलितावबोधस्य निर्माणे निजरुचिं सदैव धरिष्यन्ति।

के सी सूरी
परामर्शदाता

योगेन्द्रयादवः
सुहासपलशीकरः
मुख्यपरामर्शकौ

एतस्य पुस्तकस्य उपयोगं कथं कुर्याम...

एतस्मिन् पुस्तके नैकाः विशेषताः एतादृश्यः लप्स्यन्ते याभिः भवन्तः पूर्वतः एव परिचिताः सन्ति । एताभिः विशेषताभिः सह भवतां परिचयः प्रथमवारं नवमकक्षायाः राजनीति-विज्ञानस्य पाठ्यपुस्तके जातः आसीत् । एतस्य वर्षस्य पाठ्यपुस्तके केचन नवीनाः विषयाः योजिताः सन्ति निश्चितरूपेण भवन्तः तेषां विषये अवगन्तुम् इच्छन्ति ।

प्रत्येकम् अध्यायस्य आरम्भे 'परिचयः' इति प्रदत्तः अस्ति । परिचयस्य पठनेन भवन्तः अवगमिष्यन्ति यत् अध्यायस्य उद्देशः कः अस्ति तथा च तत्र केषां विषयाणां चर्चा कृता अस्ति । एतत् समीचीनं स्यात् यत् भवन्तः परिचयं वारद्वयं पठेयुः इति अर्थात् प्रथमवारम् अध्यायस्य आरम्भात् प्राक् तथा च पुनः अध्यायस्य समाप्तेः अनन्तरम् अपि पठेयुः इति ।

खण्डानाम् उपखण्डानां च शीर्षकाणि - प्रत्येकम् अध्यायः खण्डेषु उपखण्डेषु च विभाजितः अस्ति । खण्डस्य शीर्षकं पृष्ठस्य द्वयोः प्रान्तभागयोः उपरि विस्तरेण प्रदत्तम् अस्ति । इदं भवतां कृते सङ्केतरूपेण अस्ति यत् अधुना अध्यायस्य कस्यचित् दीर्घभागस्य आरम्भः भवति । अत्र पाठ्यक्रमे निर्धारितस्य कस्यचित् विशेषविषयवस्तुनः वर्णनं भवन्तः प्राप्स्यन्ति । उपखण्डानां शीर्षकाणि पृष्ठस्य कस्यचित् कोष्ठस्य उपरि प्रदत्तानि सन्ति । भवतां कृते अत्र सङ्केतः अयम् अस्ति यत् कस्यचित् खण्डस्य आभ्यन्तरे समाविष्टेषु नैकबिन्दुषु एकस्मिन् बिन्दौ तस्मात् स्थानात् विचारस्य आरम्भः क्रियते ।

आरेखस्य, कोलाज इत्यस्य चित्राणां भित्तिपत्राणां च एतस्मिन् पुस्तके बाहुल्यम् अस्ति । नवमकक्षायाः राजनीतिविज्ञानस्य पुस्तके उपर्युक्तानां चित्रादिकानां सङ्ख्या तावती विपुला न आसीत् । **राजनैतिक-अभिप्राय**-पूर्णानि नैकविषयकेन्द्रितानि च व्यङ्ग्यचित्राणि भवन्तः एतस्मिन् पुस्तके प्राप्स्यन्ति । एतैः चित्रैः भवतां नेत्राणि लाभान्वितानि निश्चयेन भविष्यन्ति आनन्दिताश्च अपि भवन्तः भविष्यन्ति । वस्तुतः, इत्थं न स्यात् यत् भवन्तः एतेषां चित्राणि दर्शनमात्रं कृत्वा पुनः पृष्ठं परिवर्तन्ताम् इति । चित्रप्रकाशनस्य उद्देशः अयम् एव अस्ति यत् भवन्तः एतेषां चित्राणां गुप्ताभिप्रायोद्घाटनस्य अवगमनस्य च प्रयासं कुर्युः इति । बहुधा, राजनीतिः शब्दानाम् आश्रयेण नैव अपि चित्राणां माध्यमेन अपि कथयितुं शक्यते । चित्रैः सह उपशीर्षकानि दत्तानि सन्ति तथा च केचन प्रश्नाः अपि उपस्थापिताः सन्ति । अनेन भवन्तः कस्यचित् चित्रस्य अर्थान्वेषणाय साहाय्यं प्राप्स्यन्ति ।

मुन्नी-उन्नी पुनः एकदा भवद्भिः सह अस्ति । भवता तुल्यौ तौ अपि स्वल्पज्ञानं धरतः । नवमकक्षायां यथा अदृढज्ञानं तयोः आसीत् तथा अधुना नास्ति । तौ अपि पौनःपुन्येन निजमुखं दर्शयिष्यतः तथा च काञ्चन् एतादृशान् प्रश्नान् प्रक्ष्यतः भवताम् अपि प्रायः तादृशाः एव प्रश्नाः स्युः इति । किम् एतत् समीचीनं स्यात् यत् अध्यायस्य अध्ययनकाले स्वल्पविरामः स्यात् तथा च उन्नी-मुन्नी इत्यनयोः प्रश्नानाम् अपि सामुख्यं कुर्युः इति । निजशिक्षकं पितरौ च समानप्रश्नान् भवन्तः अपि पृच्छेयुः तत्र स्वल्पः अपि सङ्कोचः भवद्भिः न करणीयः इति ।

'प्लस-बाक्स' इत्यस्मिन् पूरकसूचनाः प्रदत्ताः सन्ति याः अध्यायस्य विषयवस्तुनः सम्बद्धाः सन्ति । कस्मिंश्चित् प्लस-बाक्स इत्यस्मिन् भवन्तः कथाम् अपि प्राप्स्यन्ति । कथा व्यग्रान् उत्सुकान् च करिष्यति यत् भवन्तः स्वदेशस्य समाजस्य च राजनैतिक-सामाजिक-जीवनस्य समस्यानां विषये चिन्तयेयुः इति । एताः कथाः अवश्यमेव पठन्तु तथा च चर्चयन्तु । अस्तु, प्लस-मञ्जूषायां प्रदत्तसूचनायाः विषयस्य च रटनस्य आवश्यकता नास्ति । तत्र भवतां नैतिकभावनाम् उद्दिश्य यदा कदा प्रश्नाः समुपस्थापिताः सन्ति परन्तु भवन्तः एवं न मन्यन्तां यत् एतेषां प्रश्नानाम् उत्तराणि सर्वथा सरलानि निश्चितानि चैव भविष्यन्ति । एतादृशीनां कथानां प्रकाशनस्य अयम् अभिप्रायः अस्ति यत् भवन्तः केषाञ्चित् कटुतथ्यानां विषये अपि विचारयेयुः इति । प्रत्येकं प्लस-मञ्जूषया सह किञ्चित् विशिष्टचिह्नम् + प्रदत्तम् अस्ति ।

दूरदर्शनं देशदर्शनम् आकाशवाणीं शृण्वन्तु---, वार्तापत्रं, परिचर्चाकार्यक्रमे, निरीक्षणार्थम् अस्माकं गमनं स्वयं कुर्वन्तु स्वयम् अवगच्छन्तु इत्येतेषु पाठ्यबिन्दूनाम् अन्तर्गतं छात्राणां कृते कक्षाभ्यन्तरे कक्षायाः च बाह्यभागे क्रियमाणाः केचन अभ्यासाः प्रदत्ताः सन्ति । यदि छात्राः अभ्यासानां निष्कर्षान् सम्पूर्णकक्षायाः पुरतः प्रस्तुतीकरिष्यन्ति तथा च ते अभ्यासविषये चर्चां कर्तुम् अवसरं प्राप्स्यन्ति तर्हि अभ्यासाः अधिकाः सार्थकाः भविष्यन्ति । यदि आवश्यकतां भवन्तः अनुभवन्ति तर्हि आकाशवाण्यां वार्तापत्रस्य दूरदर्शनस्य च मध्ये कस्यचित् एकस्य चयनं भवन्तः कर्तुं शक्नुवन्ति । तथ्यम् उपस्थापयेत् रहस्यम् उद्घाटयेत् -- इति विषयं भवन्तः एतस्य पुस्तकस्य पृष्ठस्य प्रान्तभागे द्रक्ष्यन्ति । अध्याये यदि कश्चित् अपरिचितपदम् अथवा वाक्यम् आगतं स्यात् तर्हि तत् तस्मिन् स्थाने तु बाधितम् अस्ति । एतादृशं पदम् अथवा वाक्यं तु पाठे रेखाङ्कितं कृतम् अस्ति । स्मरन्तु यत् भवतां कृते प्रदत्ता या परिभाषा अस्ति तस्याः भवद्भिः रटनं न करणीयम् अस्ति । केवलं सा अवगन्तव्या अस्ति ।

किम् अवगतं-किं शिक्षितम् इति प्रायः प्रत्येकं खण्डस्य अन्ते स्थापितम् अस्ति । कस्मिंश्चित् खण्डे भवद्भिः यानि तथ्यानि अधिगतानि तानि कस्याञ्चित् विशेषपरिस्थितौ प्रवर्त्य भवन्तः परिशीलनं कर्तुं शक्नुयुः इति – अनया आशया सह अत्र प्रश्नाः प्रदत्ताः सन्ति । शिक्षकाः अध्यायस्य मध्ये मध्ये आगम्यमानान् एतादृशान् अध्यायान् स्वयम् अपि सज्जीकुर्युः इति तथा च विद्यार्थिनः प्रगतेः समीक्षणम् अपि कुर्युः इति ।

प्रत्येकम् अध्यायस्य अन्ते **प्रश्नावली** अपि प्रदत्ता अस्ति । भवन्तः द्रक्ष्यन्ति यत् अस्माभिः केचन अभ्यासाः नवीनरूपेण स्थापिताः सन्ति – विशेषतया बहुविकल्पीयोत्तराणां संरचनायाम् इति । अत्र भवद्भिः निजतर्कशक्तेः प्रयोगः करणीयः स्यात् तथा च मस्तिष्कस्य प्रयोगः करणीयः स्यात् । यदि एकदा एतादृशैः प्रश्नैः सह भवतां परिचयः भविष्यति तर्हि अग्रे भवन्तः एतादृशे आह्वाने प्राप्ते सति आनन्दस्य अनुभवं करिष्यन्ति ।

मानचित्राणि केवलं भूगोलस्य अवगमनाय एव नैव अपितु इतिहासस्य राजनीतेः च अवगमनाय अपि अतीव आवश्यकानि सन्ति । एतस्मात् एव कारणात् एतस्मिन् पुस्तके काश्चन सूचनाः मानचित्राणां माध्यमेन प्रदत्ताः सन्ति । अस्माकम् उद्देशः अयं नास्ति यत् भवन्तः मानचित्रनिर्माणस्य आरम्भं कुर्युः इति । भवद्भिः केवलं मानचित्रमाध्यमेन सूचितविषयाणाम् अवधानं करणीयम् इति ।

पाठ्यपुस्तक-निमातृ-समितिः

अध्यक्षः, सामाजिक-विज्ञान-परामर्श-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहास-विभागः, कलकत्ताविश्वविद्यालयः, कोलकातानगरम् इति।

मुख्यपरामर्शकः

सुहास-पलशीकरः, प्रोफेसरः, राजनीति-लोकप्रशासन-विभागः, पुणे-विश्वविद्यालयः, पुणे इति।

योगेन्द्रयादवः, वरिष्ठ-शोधाध्येता, विकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

परामर्शदाता

के.सी.सूरी, प्रोफेसर इति, राजनीति-विज्ञान-विभागः, हैदराबाद-विश्वविद्यालयः, हैदराबादम्।

सदस्याः

अनुराधासेनः, प्राचार्या, द सृजन-स्कूल इति, दिल्ली।

एलेक्स-एम.जार्जः इति, स्वतन्त्रानुसन्धानकर्त्ता, इरुवट्टी, कन्नूर इति जनपदं, केरलम्।

निवेदितामेननः, रीडर, राजनीति-विज्ञान-विभागः, कलासङ्कायः, दिल्लीविश्वविद्यालयः, दिल्ली।

पङ्कजपुष्करः, वरिष्ठप्रवाचकः, लोकनीति-विकासशीलसमाजाध्ययनपीठम्, दिल्ली।

पीटर.आर.डीसूजाः, वरिष्ठशोधाध्येता, विकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

प्रपातभानुमेहताः, अध्यक्षः मुख्यकार्याधिशासी च, सेण्टर फार पालिसी रिसर्च इति, नवदेहली।

प्रियवदन-पटेलः, प्रोफेसर इति, राजनीति-विज्ञान-विभागः, एम.एस.विश्वविद्यालयः, बडोदरा।

मदनलालसाहनी, पीजीटी (राजनीति-विज्ञानम्), राजकीयोच्चतर-माध्यमिक-विद्यालयः, आर.के.पुरम, नवदेहली।

मनीषजैनः, अनुसन्धानकर्त्ता, दिल्ली-विश्वविद्यालयः, दिल्ली।

मल्ला-वी.एस.वी.प्रसादः, प्रवक्ता, सा.वि.मा.शि.वि., राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षणपरिषद्, नवदेहली।

मालिनी-घोषः, न्यासिनी, निरन्तरं, सेण्टर फार जेण्डर एण्ड एजुकेशन इति, नवदेहली ।

राजीव-भार्गवः, वरिष्ठशोधाध्येता, विकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

राधिका-मेननः, प्रवक्त्री, शिक्षाशास्त्रविभागः, मातासुन्दरी-महाविद्यालयः, दिल्लीविश्वविद्यालयः, दिल्ली।

संजीबमुखर्जी, वरिष्ठप्रवक्ता, राजनीति-विज्ञान-विभागः, एस.पी.महाविद्यालयः, पुणे इति।

संज्योत-आप्टे, वरिष्ठप्रवक्ता, राजनीतिविज्ञानविभागः, एस.पी. महाविद्यालयः, पुणे ।

सुमनलता, वरिष्ठप्रवक्त्री, शिक्षाशास्त्रविभागः, गार्गीमहाविद्यालयः, दिल्लीविश्वविद्यालयः, दिल्ली।

हिन्द्यनुवादः

अरविन्दमोहनः, वरिष्ठपत्रकारः, दिल्ली।

चन्दनकुमारश्रीवास्तवः, स्वतन्त्र-अनुसन्धानकर्ता, नवदेहली।

पङ्कजपुष्करः, लोकनीतिविकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

मेधा, स्वतन्त्र-पत्रकारः अनुसन्धानकर्ता च, नवदेहली।

सदस्य-समन्वयकः

संजयदुबे, रीडर इति, सा.वि.मा.शि.वि., राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद्, नवदेहली।

कृतज्ञता-ज्ञापनम्

एतस्मै पुस्तकाय मानचित्राणि, चित्राणि, भित्तिपत्राणि, आरेखाः, व्यङ्ग्यचित्राणि च नैकस्रोतोभ्यः प्राप्तानि। एतस्मिन् सन्दर्भे वयं निम्नलिखित-संस्थानां संस्थासम्बद्धानां च जनानां कृते सहृदयं कृतज्ञतां विज्ञापयामः -

विकीपीडियायाः द्वितीयपृष्ठे अङ्कितमानचित्राय तथा च 4, 5, 30, 64 इत्येतेषु अङ्कितचित्राणां कृते धन्यवादं कुर्मः जीएनयू इति संस्थायाः यतो हि एतस्याः संस्थायाः प्रमाणपत्रमाध्यमेन एव वयं सामग्रीं प्राप्तुं शक्तवन्तः।
एआरके-ग्राफिक्स इत्यस्य पृष्ठेभ्यः तत्र 3, 14 इत्यत्र अङ्कितमानचित्रं तथा च 45, 50, 82 इत्यस्मिन् अङ्कितारेखाय।
यूएनएफपीए इत्यस्य 43 इति पृष्ठे अङ्कितमानचित्राय।
क्रिएटिव-कामन्स इत्यस्य अन्तर्गतम् उपलब्धे 36 पृष्ठे अङ्किताय चित्राय फ्लिकरडाटकाम इत्यस्य कृते।
मिनबजराचार्यस्य 58, 59 इतिपृष्ठे अङ्कितचित्राय इति।

द हिन्दू, इत्यस्य 72 पृष्ठे 75 च इति अङ्किताय चित्राय।

तत्र 33, 54, 46, 65 इत्येतेषु पृष्ठेषु अङितचित्राणां कृते अनहद इत्यस्य धन्यवादं कुर्मः ।

तत्र 40, 41, 76 इत्येतेषु पृष्ठेषु अङ्कितचित्राणां तथा च बहुमूल्यचित्राणां च कृते जुबान इत्यस्य धन्यवादं कुर्मः।

44, 65 इत्येतेषु पृष्ठेषु अंकितयोः चित्रयोः कृते आक्सफेमजी.बी इत्यस्य, वालण्टेयरी-हेल्थ-एशोसिएशन-आफ-इण्डिया इत्यस्य एपीडीपी इत्यस्य च धन्यवादं कुर्मः।

78, 92, 98 इत्येतेषु अङ्किताय आरेखाय आक्सफोर्डविश्वविद्यालयप्रेस इत्यस्य रजा, ए आरके इत्यस्य च कृते धन्यवादं कुर्मः। तत्र रिपोर्ट आन द स्टेट आव डेमोक्रेसी इन साउथ एशिया इत्यस्मात् गृहीतम् अस्ति।

टाइम्स आव इण्डिया इत्यस्य अजीतनीननस्य 21,49,53 इत्येतेषु पृष्ठेषु अङकितव्यङ्ग्यचित्राय, द हिन्दू इत्यस्य केशवस्य 62 पृष्ठाय तथा च 86 इत्यस्य व्यङ्ग्यचित्राय, मञ्जुलस्य 85 पृष्ठाय, सुरेन्द्रस्य 45,46 इत्यनयोः कृते। केगलव्यङ्ग्यचित्रस्य 6, 6, 32, 37, 68, 79, 83, 84, 91, 93, 98, 103, 111 इत्येषु पृष्ठेषु अंकितव्यङ्ग्यचित्राय, टाइम्स आव इण्डिया इत्यस्य आर.के.लक्ष्मणस्य 73, 90 इत्येतयोः पृष्ठयोः अंकितव्यङ्ग्यचित्राय, इरफानखानस्य 110 पृष्ठे अंकितव्यङ्ग्यचित्राय च धन्यवादम् उपर्युक्तसर्वेषां कुर्मः।

इरफानखानस्य यशूदासनस्य आर.के.लक्ष्मणस्य आवरणपृष्ठे अङ्कितव्यङ्ग्यचित्राय, जुबानस्य, इंसाफस्य, सहमत इत्यस्य स्ट्रीट-आर्ट-वर्क्स-डाट् काम, आक्सफेम-जी,बी, आलोचनायाः पुणे इत्यस्य, चन्द्रलेखायाः चेन्नै इत्यस्य नारीनिरजतनप्रतिरोध-मञ्चस्य (पश्चिमबङ्गालस्य), सखी (केरलस्य) इस्टिट्यूट् आव डेवलपमेण्ट कम्युनिकेशन, (चण्डीगढ), सहीयार (गुर्जरप्रान्तस्य) तथा च शीबा छछी इत्यस्य पृष्ठावरणे अङ्कितव्यङ्ग्यचित्राय तेषां धन्यवादं कुर्मः इति।

पुस्तकस्य अस्य हिन्दीसंस्करणस्य प्रारूपम् अभिमन्युकुमारः सज्जीकृतवान्। वयं तस्य श्रमशीलतायै तस्य कृते कृतज्ञतां विज्ञापयामः। एतस्य पुस्तकस्य पाठशुद्धिं यः तल्लीनःभूत्वा एन.सी.ई.आर.टी इत्यस्य डीटीपी आपरेटर उत्तमकुमारः तथा च कापीएडीटर अवधकिशोरसिंहः अस्ति एतयोः द्वयोः अपि धन्यवादं कुर्मः। एतस्य पुस्तकस्य सम्पादनस्य क्रमे आयोजितकार्यशालायां नरेशगोस्वामी, राजेशयादवः, सैयदाजफरअहसन इति निजविशेषज्ञतया पर्याप्तसाहाय्यं कृतवन्तः। तेषां कृते वयं कृतज्ञतां विज्ञापयामः।

निजपरामर्शम् अवश्यमेव यच्छन्तु –

एतत् कथं भवन्तः कथम् अनुभूतवन्तः ? एतस्य प्रयोगस्य अध्ययनस्य च भवताम् अनुभवः कथम् आसीत् ? अत्र कानि कानि काठिन्यानि भवन्तः अनुभूतवन्तः ?पुस्तकस्य अग्रिमसंस्करणे भवन्तः किं किं परिवर्तनम् इच्छन्ति ? एतस्य सर्वस्य विषये अथवा कस्यचित् अपि नवीनपरामर्शस्य विषये अस्माकं कृते अवश्यमेव लिखन्तु। भवन्तः अध्यापकाः स्युः, अभिभावकाः स्युः, छात्राः स्युः अथवा सामान्यपाठकाः स्युः इति –कश्चित् अपि परामर्शं दातुं शक्नोति। पुस्तकानां परिवर्तनप्रक्रियायां भवतां परामर्शाः अमूल्याः सन्ति। वयं प्रत्येकं परामर्शस्य सम्माननं कुर्मः।

कृपया अस्मिन् पत्रसङ्केते लिखन्तु –

समन्वयकः (राजनीतिविज्ञानम्)
सामाजिक-विज्ञान-शिक्षा-विभागः
राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद्
श्री अरविन्दमार्गः, नवदेहली – 110016
भवन्तः अनेन पत्रसङ्केतेन अपि ई-मेल इत्यपि कर्तुं शक्नुवन्ति - politics.ncert@gmail.com

विषय-सूची

आमुखम् – *iii*

भवतां कृते कश्चन सन्देशः *v*

एतस्य पुस्तकस्य उपयोगं कथं कुर्याम... *vii*

खण्डः I

अध्यायः 1

सत्तायाः सहभागिता 1

अध्यायः 2

सङ्घवादः 13

खण्डः II

अध्यायः 3

लोकतन्त्रं विविधता च 29

अध्यायः 4

जातेः धर्मस्य लैङ्गिकाः च विषयाः 39

खण्डः III

अध्यायः 5

जनसङ्घर्षः जनान्दोलनं च 57

अध्यायः 6

राजनैतिकदलानि 71

खण्डः IV

अध्यायः 7

लोकतन्त्रस्य परिणामः 89

अध्यायः 8

लोकतन्त्रस्य आह्वानानि 101

अनुवादकः - रूपलालशर्मा

भारतीय-संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1]**[सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं]** निर्मातुं तथा च तस्य समस्तनागरिकानां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं **न्यायम्**,

विचारस्य अभिव्यक्तेः विश्वासस्य धर्मस्य

उपासनायाः च **स्वतन्त्रताम्**,

प्रतिष्ठायायाः अवसरस्य च **समतां**

प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2]**[राष्ट्रियैकतायाः अखण्डतायाश्च] सुनिश्चयकर्त्रीं बन्धुतां संवर्धयितुं**.....

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

सत्तायाः सहभागिता

अध्यायः 1

परिचयः

अस्मिन् अध्याये वयं लोकतन्त्रस्य तां यात्राम् अग्रे वर्धयामः या गतवर्षे आरब्धा आसीत् । पूर्वस्मिन् वर्षे वयं दृष्टवन्तः यत् लोकतान्त्रिक-व्यवस्थायां सम्पूर्णशक्तिः किमपि एकम् अङ्गं यावत् एव सीमिता न भवति । विधायिकायाः कार्यपालिकायाः न्यायपालिकायाः च मध्ये पूर्णबुद्ध्या सत्तायाः विकेन्द्रीकरणं लोकतन्त्रस्य कार्याय बहु आवश्यकम् अस्ति । आद्येषु त्रिषु अध्यायेषु वयं सत्तायाः विभाजनस्य सन्दर्भे विचारं करिष्यामः । आगच्छतु, वयं बेल्जियमदेशस्य श्रीलङ्कादेशस्य च द्वाभ्यां कथाभ्यां प्रारम्भं कुर्मः । एते द्वे घटने ज्ञापयतः यत् विभिन्नाः लोकतान्त्रिक-शासन-पद्धतयः सत्तायाः विभाजनस्य आवश्यकतायाः कथं निवारणं कुर्वन्ति । एताभ्यां घटनाभ्याम् एतद्-अवगमने अपि साहाय्यं प्राप्स्यते यत् लोकतन्त्रे सत्तायाः विभाजनस्य आवश्यकता किमर्थं भवति । अनेन वयं सत्तायाः विभाजनस्य तेषु रूपेषु वार्तां कर्तुं शक्ष्यामः येषां चर्चा अग्रिमयोः द्वयोः अध्याययोः कृता अस्ति ।

बेल्जियमदेशः श्रीलङ्कादेशः च

बेल्जियमः यूरोपस्य कश्चिद् लघुदेशः अस्ति । सः देशः क्षेत्रफले अस्माकं देशस्य हरियाणा-राज्यतः अपि लघुः अस्ति । अस्य सीमानः फ्राँस-नीदरलैण्ड-जर्मनी-लक्समबर्ग -देशैः मिलन्ति । अस्य जनसङ्ख्या एक-कोटितः काचिद्-अधिका अस्ति अर्थात् हरियाणा-राज्यस्य जनसङ्ख्यायाः अर्धम् अस्ति । अस्य लघुदेशस्य समाजस्य जातीय-संरचना बहु-जटिला अस्ति । देशस्य सम्पूर्ण-जनसङ्ख्यायाः 59 प्रतिशतं भागः फ्लेमिश इति क्षेत्रे निवसति डच-भाषां च वदति । अवशिष्टाः 40 प्रतिशतं जनाः वेलोनिया इति क्षेत्रे वसन्ति फ्रेञ्च-भाषां च वदन्ति । अवशिष्टाः 1 प्रतिशतं जनाः जर्मन-भाषां च वदन्ति । तस्य देशस्य ब्रूसेल्स इति राजधान्याः 80 प्रतिशतं जनाः फ्रेञ्च-भाषां, 20 प्रतिशतं जनाः च डच-भाषां भाषन्ते ।

अल्पसंख्यकाः फ्रेञ्च-भाषि-जनाः तुलनात्मकरूपेण अधिकाः समृद्धाः शक्तिशालिनः च सन्ति । बहु-कालाद् अनन्तरम् आर्थिक-विकासस्य शिक्षायाः च लाभं गृहीत्वा डच-भाषिजनाः अनया स्थित्या रुष्टाः जाताः । अनेन कारणेन *1950* तः 1960 इत्यस्मिन् दशके फ्रेञ्च-डच-भाषि-जनानां मध्ये अवसादः वर्धितः । एतयोः द्वयोः समुदाययोः सर्वाधिकं तीव्रं रूपं ब्रूसेल्स इति राजधान्यां दृष्टम् । एषा काचिद् विशिष्टा समस्या आसीत् । डच-भाषि-जनाः अपेक्षाकृताः अधिका आसन्, किन्तु धनेन समृद्ध्या च निर्बलाः अल्पमताः च आसन् ।

आगच्छतु, अस्याः स्थित्याः तुलना केनचिद् अन्येन देशेन सह कुर्मः। श्रीलङ्का कश्चित् द्वैप्यः देशः अस्ति,यः तमिलनाडोः दक्षिणतटात् किञ्चित्-किलोमीटर-दूरे स्थितम् अस्ति । अस्य जनसंख्या द्वि-कोटिः अस्ति अर्थात् हरियाणा-राज्यस्य जनसंख्यायाः समानम् । दक्षिण-एशियायाः अन्यदेशैः इव श्रीलङ्कायाः जनसंख्यायाम् अपि अनेक-जातीय-समूहानां जनाः सन्ति । सर्वाधिकः प्रमुखः समूहः सिंहोलियानाम् अस्ति, येषां जनसंख्या देशस्य सम्पूर्ण-जनसंख्यायाः 74 प्रतिशतम् अस्ति । तदनन्तरं तमिलाः सन्ति, येषां संख्या सम्पूर्ण-जनसंख्यायाः 18 प्रतिशतम् अस पि समूहद्वयम् अस्ति – श्रीलङ्कायाः मूलतमिलाः (13 प्रतिशतम्) भारतीयाः तमिलाः

मम मस्तिष्के सरलं समीकरणम् अस्ति यत् सत्तायाः विभाजनम् –

सत्तायाः खण्डीकरणम् -देशस्य निर्बलीकरणम् । वयं किमर्थम् एतया चर्चया आरम्भं कुर्मः ।

कथनं रहस्योद्घाटनम्

एथनीकः जातीयः वा - एतादृशं सामाजिकं विभाजनं यत्र प्रत्येकम् अपि समूहः स्वीयां संस्कृतिं पृथक् एव मनुते । अर्थात् एतत् उभयथा संस्कृत्याधारितं सामाजिकं विभाजनम् अस्ति । कस्य अपि जातीयस्य समूहस्य सदस्याः मन्वते यत् तेषाम् उत्पत्तिः समानपूर्वजेभ्यः जाता अस्ति । अपि च अनेन कारणेन तेषां शारीरिकरचना संस्कृतिः च समाना अस्ति । आवश्यकं न अस्ति यत् एतादृशस्य समूहस्य सदस्याः कस्यचित् एकस्य धर्मस्य अनुयायिनः स्युः । अथवा तेषां राष्ट्रियता समाना भवेत् ।

बेल्जियमस्य समुदायाः क्षेत्राणि च



बेल्जियमस्य श्रीलङ्कायाः च मानचित्रं पश्यन्तु । एतयोः कस्मिंश्चित् क्षेत्रे विभिन्नसमुदायानां सघनी जनसङ्ख्या दृश्यमाना अस्ति ?

च, ये औपनिवेशिके शासन-काले उद्यानेषु कार्यकरणाय भारतात् आनीतानां जनानां सन्तानाः सन्ति । आधुनिकं श्रीलङ्कायाः मानचित्रं यदि ध्यानेन द्रक्ष्यन्ति तर्हि ज्ञास्यन्ति यत् तमिलाः मुख्यरूपेण उत्तरेषु पूर्वीय-प्रान्तेषु च निवसन्ति । आधिक्येन सिंहली-भाषि-जनाः बौद्धाः सन्ति अपि च तमिलभाषि-जनेषु केचित् हिन्दवः केचित् मुस्लिमाः च सन्ति । श्रीलङ्कायाः जनसंख्यायाः 7 प्रतिशतम् ईसाईजनाः सन्ति ते तमिलं सिहलीं च उभे एव भाषे वदतः ।

अधुना स्वल्पकालाय चिन्तयन्तु यत् एतादृश्यां स्थितौ किं भवितुं शक्नोति स्म ?

डचभाषिजनाः स्वीयव्यापकसङ्ख्याबलेन बेल्जियमे फ्रेञ्च-भाषिजर्मनभाषिजनैः सह स्वैच्छिकतया व्यवहर्तुं शक्नुवन्ति स्म निजेच्छानुसारं च तान् शासितुं शक्नुवन्ति स्म । एतस्मात् तेषां मध्ये जायमानसङ्घर्षः इतोऽपि वर्धितं स्यात् । एतस्मात् देशविभाजनं शक्यते स्म तथा च ब्रूसेल्से तयोः द्वयोः एव अधिकारः अस्ति इति स्वामित्वभावनायाः प्रकटकनं स्यात् । श्रीलङ्कायां सिंहलीजनसङ्ख्यायाः बहुमतम् इतोऽपि अधिकम् आसीत् तथा च ते जनाः देशे स्वेच्छाचारितया व्यवहर्तुं शक्नुवन्ति स्म । आयान्तु, अधुना यथार्थतया एतत् पश्यामः यत् द्वयोः देशयोर्मध्ये किम् अभवत् ?

श्रीलङ्कायां बहुसंख्यकवादः

1948 तमे वर्षे श्रीलङ्का स्वतन्त्रं राष्ट्रं जातम् । सिंहली-समुदायस्य नेतारः स्व-बहुसंख्यायाः बलेन शासने प्रभुत्वम् इष्टवन्तः । अनेन कारणेन लोकतान्त्रिक-रूपेण निर्वाचितः सर्वकारः सिंहली-समुदायस्य प्रभुतायाः स्थापनायै निज-बहुसङ्ख्यायाः अन्तर्गतान् नैकान् प्रयासान् अकरोत् ।

1956 तमे ख्रिस्ताब्दे अधिनियमः प्रकल्पितः यस्य माध्यमेन तमिलभाषायाः स्थाने सिंहलीभाषा एकमात्र-राजभाषायाः रूपेण घोषिता । विश्वविद्यालयेषु सर्वकारीयासु सेवासु च सिंहलीभाषायाः भाषिणां प्राथम्यं स्यात् इति नीतिः अपि प्रवर्तिता । नवीने संविधाने इदम् अपि प्रावधानं कृतं यत् सर्वकारः बौद्धमतस्य आधिक्येन संरक्षणं करिष्यति इति ।

क्रमशः सर्वकारेण नियमानां परिवर्तनं कृतं तस्मात् श्रीलङ्कायाः तमिलाः सर्वकारं प्रति रुष्टाः जाताः तथा च शासनम् प्रति तेषु यः स्वत्वस्य भावः आसीत् सः अपि लुप्तः जातः । तमिल-जनाः अनुभूतवन्तः यत् बौद्ध-धर्मावलम्बिनः सिंहली-राजनेतारः तमिलानां भाषायाः संस्कृतेः च विषये असंवेदनशीलाः सन्ति इति । तमिलभाषायाः भाषिणः अनुभूतवन्तः यत् संविधानस्य सर्वकारस्य च नीतिकारणात् तमिलजनाः समानान् राजनैतिकान् अधिकारान् न प्राप्नुवन्ति । राजकीय-सेवासु लाभक्षेत्रेषु च तैः सह भेदभावपूर्णः व्यवहारः भवति तेषां हितानां च अवहेलनं भवति । परिणामतः तमिलस्य सिंहलीसमुदायस्य च पारस्परिकः सम्बन्धः विकृतिं प्रति गतः ।



कथनं रहस्योद्घाटनम्

बहुसंख्यकवादः : इयं मान्यता यत् यदि कश्चन समुदायः बहुसंख्यकः अस्ति तर्हि सः स्वीयमनसा देशस्य शासनं कर्तुं शक्नोति । अपि च एतदर्थं सः अल्पसंख्यकस्य समुदायस्य आवश्यकतानाम् इच्छानां च अवहेलनं कर्तुं शक्नोति ।

बहुसंख्यक-समुदायस्य शासने का समस्या अस्ति? यदि श्रीलङ्कायां सिंहलीजनानां शासनं न स्यात् तर्हि कस्य शासनम् अभविष्यत् ?

श्रीलङ्कायाः तमिलजनाः स्वीयानि राजनैतिकदलानि अरचयन् तथा च तमिल-भाषा राजभाषायाः रूपेण भवेत्, क्षेत्रीयायाः स्वतन्त्रतायाः प्राप्तिः भवेत्, शिक्षाक्षेत्रे सेवाक्षेत्रेषु च तेषां कृते समानाः अवसराः भवेयुः इति एतादृशीः अभ्यर्थनाः कुर्वन्तः तमिलजनाः सङ्घर्षम् अकुर्वन् । परन्तु तमिलानां बहुसङ्ख्या-युक्तेषु क्षेत्रेषु तेषां शासनं भवेत् इति तेषाम् अभ्यर्थना अस्वीकृता । 1990 तमदशकं यावत् उत्तर-पूर्व-श्रीलङ्कायां स्वतन्त्रः तमिलसर्वकारः भवेत् इत्येताम् अभ्यर्थनाम् अधिकृत्य नैकानि राजनैतिकानि सङ्घटनानि जातानि ।

श्रीलङ्कायां द्वयोः समुदाययोः मध्ये पारस्परिकेन अविश्वासेन महतः सङ्घर्षस्य रूपं धृतम् । अयं सङ्घर्षः गृहयुद्धस्य रूपेण परिवर्तितवान् । परिणामतः द्वयोः पक्षयोः सहस्राधिकाः जनाः मृतवन्तः । नैके कुटुम्बाः निजदेशं परित्यज्य पलायित्वा च शरणार्थिनः जाताः । तेन च नैकगुणिताः जनाः आजीविका-विहीनाः जाताः । भवन्तः पठितवन्तः यत् अस्माकं क्षेत्रीय-देशेषु आर्थिक-विकासस्य शिक्षायाः स्वास्थ्यस्य च विषये श्रीलङ्कायाः स्थितिः सर्वश्रेष्ठा अस्ति, परन्तु तत्रत्यात् गृहयुद्धात् देशस्य सामाजिकं सांस्कृतिकम् आर्थिकजीवनं च महता प्रमाणेन समस्याग्रस्तं जातम् ।

बेल्जियम-देशस्य बुद्धिमत्ता

बेल्जियमस्य नेतारः निर्णीतवन्तः यत् ते श्रीलङ्कया स्वीकृतस्य मार्गस्य अनुसरणं न करिष्यन्ति । ते क्षेत्रीयं वैभिन्न्यं सांस्कृतिकीं विविधतां च स्वीकृतवन्तः । 1970 तमवर्षतः 1993 तमवर्षस्य च मध्ये ते संविधाने चत्वारि संशोधनानि केवलम् एतदर्थम् अकुर्वन् यत् देशे कोऽपि जनः परत्वं न अनुभूयात् तथा च सर्वे सम्भूय स्थातुं शक्नुयुः इति । बेल्जियमस्य नेतारः एतदर्थं यां व्यवस्थां कल्पितवन्तः सा अतीव कल्पनातीता अस्ति तथा च कोऽपि अन्यः देशः न तथा कर्तुं शक्तवान् इति ।

कथनं रहस्योद्घाटनम्

गृहयुद्धम् – कस्मिंश्चित् देशे सर्वकारस्य विरोधिनां समूहानां पारस्परिकं हिंसकयुद्धं गृहयुद्धम् इति उच्यते ।

- बेल्जियमद्वारा स्वीकृतस्य प्रारूपस्य कानिचन महत्त्वपूर्णानि तथ्यानि निम्नलिखितानि सन्ति – संविधाने एतस्य तथ्यस्य स्पष्टरूपेण प्रावधानम् अस्ति यत् केन्द्रीयसर्वकारे डचभाषिणां फ्रेञ्चभाषिणां च मन्त्रिणां सङ्ख्या समाना भविष्यति । केषाञ्चित् विशिष्टानाम् अधिनियमानां विरचनं तदा भवि तुं शक्नोति यदा द्वयोः भाषाभाषिणोः समूहयोः सांसदानां सङ्ख्या सर्वकारस्य पक्षे स्यात् इति । अनेन प्रकारेण कस्यापि एकस्य समुदायस्य जनाः एकपक्षीयं निर्णयं न कर्तुं शक्नुवन्ति ।
- केन्द्रसर्वकारस्य नैकाः शक्तयः देशस्य द्वयोः क्षेत्रयोः क्षेत्रीय-सर्वकाराभ्यां प्रदत्ताः अर्थात् राज्यसर्वकाराः केन्द्रीयसर्वकारस्य अधीनाः न सन्ति ।
- ब्रूसेल्स-मध्ये पृथक् सर्वकारः अस्ति तथा च तस्मिन् द्वयोः समुदाययोः समानरूपेण प्रतिनिधित्वम् अस्ति । फ्रेञ्चभाषायाः भाषिणः जनाः ब्रूसेल्स-मध्ये समान-प्रतिनिधित्वस्य एतं प्रस्तावं स्वीकृतवन्तः यतो हि डचभाषिणः जनाः केन्द्रीयसर्वकारे समानतायाः प्रतिनिधित्वं स्वीकृतवन्तः ।

बेल्जियमस्य कस्याश्चित् वसत्याः पत्रसङ्केतः अत्र प्रदत्ते चित्रे अङ्कितः अस्ति । सावधानं पश्यन्तु यत् स्थानस्य नाम दिशायाः च सूचना अत्र फेञ्चभाषया डचभाषया च दत्ता अस्ति ।

कामम्, एतत् अपि किञ्चित् समाधानम् अभवत् ? अहम् एतेन तथ्येन प्रसन्ना अस्मि यत् अस्माकं संविधानम् एतादृशीं चर्चां न करोति यत् कस्मात् समुदायात् कियन्तः मन्त्रिणः भविष्यन्ति ।

● केन्द्रीय-सर्वकारस्य राज्य-सर्वकाराणां च अतिरिक्तम् अत्र तृतीय-स्तरीयः सर्वकारः अपि कार्यं करोति अर्थात् सामुदायिक-सर्वकारः इति । एतादृशस्य सर्वकारस्य चयनं समानभाषायाः भाषिणः जनाः कुर्वन्ति । डचभाषिणः फ्रेञ्चभाषिणः जर्मनभाषिणः च जनाः ते यत्र कुत्रापि भवेयुः एनं सामुदायिक-सर्वकारं चिन्वन्ति। एतं सर्वकारं संस्कृति-शिक्षा-भाषासदृशेषु विषयेषु निर्णयस्वीकरणस्य अधिकारः अस्ति।

न भवन्तः बेल्जियमस्य प्रारूपं जटिलम् इति अनुभवितुं शक्नुवन्ति । निश्चितरूपेण इदं जटिलम् अस्ति – बेल्जियम-मध्ये ये जनाः निवसन्ति तेषां कृते अपि एतत् जटिलं प्रारूपम् अस्ति । परन्तु इयं व्यवस्था अतीव सफला जाता । एतस्याः व्यवस्थायाः कारणात् देशे गृहयुद्धस्य आशङ्काः सर्वथा विरामं गताः नो चेत् गृहयुद्धस्य स्थितौ बेल्जियमदेशः भाषायाः आधारेण बेल्जियमस्य खण्डद्वयं जातं स्यात् इति। यदा नैके यूरोपीय-देशाः परस्परं मिलित्वा यूरोपीय-सङ्घ-निर्माणस्य निर्णयं कृतवन्तः तदा ब्रूसेल्स इति तेषां मुख्यालय-रूपेण चितः।

बेल्जियमे स्थिता यूरोपीय-सङ्घस्य संसद्

वार्त्तापत्र – नामा

किञ्चित् वार्त्तापत्रम् आ-सप्ताहं पठन्तु तथा च पुनः युद्ध-सम्बद्ध-वार्त्तानां सङ्ग्रहं कुर्वन्तु। पञ्च-पञ्च छात्राणां समूहद्वयं सहैव कार्यं कर्तुं शक्नोति। पुनः द्वौ अपि समूहौ निजं सम्पूर्णं वार्त्तासङ्ग्रहं मेलयित्वा केनचित् अनेन प्रकारेण कार्यं कर्तुं शक्नुतः –

- सम्पूर्ण-कलहस्य प्रसङ्गान् तेषां स्थानदृष्ट्या विभक्तान् कुर्वन्तु।
- एतेषां सङ्घर्षाणां कानि कारणानि आसन् तेषां विषये अवगन्तुं प्रयत्नं कुर्वन्तु। एतेषु कति विवादाः सत्तायाः विभाजनम् अधिकृत्य सन्ति ?
- एतेषु विवादेषु कस्य समाधानं सत्तायां भागं दत्वा कर्तुं शक्यते ?

----- तर्हि भवतां कथनस्य अभिप्रायः अस्ति यत् सत्तायां सहभागितया वयम् आधिक्येन शक्तिमन्तः भवामः। इदं तथ्यं तु किञ्चित् विचित्रम् इति प्रतिभाति। खलु, चिन्तयितुम् अवसरं ददातु इति।

बेल्जियमस्य श्रीलङ्कायाः च एताभ्यां कथाभ्यां वयं कां शिक्षां प्राप्नुमः ? द्वौ अपि देशौ लोकतान्त्रिकौ स्तः। पुनरपि सत्तायां समान-भागः स्यात् इति प्रश्ने समुपस्थिते सति तयोः द्वयोः एव समाधानं पृथक् पृथक् अस्ति । बेल्जियमस्य नेतारः अनुभूतवन्तः यत् विभिन्नानां समुदायानां क्षेत्राणां च भावनाः आदृत्य एव देशस्य ऐक्यं सम्भवति। एतस्य अनुभवस्य आधारेण एव द्वौ अपि पक्षौ सत्तायां समानरूपेण भागं ग्रहीष्यतः इति विषये एकमतौ सञ्जातौ । श्रीलङ्कायाः राजनेतारः बेल्जियमस्य अपेक्षया विपरीतमार्गम् अनुसृतवन्तः । एतस्मात् अभिज्ञायते यत् बहुसङ्ख्यकः समुदायः यदि अल्पसङ्ख्यके समुदाये प्रभुत्वं स्थापयितुम् अल्पसङ्ख्यक-समुदायस्य कृते सत्तायां समानभागं न यच्छति तर्हि एतस्मात् देशस्य ऐक्यम् एव सङ्कट-ग्रस्तं भवितुं शक्नोति।



जर्मन-आभियान्त्रिक्याः विशिष्टं प्रारूपम् ------

टैब्-द्-कैलगरी सन्,केगल कार्टून्स

वामतः अङ्किते व्यङ्ग्यचित्रे जर्मन्याः कस्याश्चित् समस्यायाः सङ्केतरूपेण प्रतिपादनम् अस्ति। तत्र क्रिश्चियन-डेमोक्रेटिक-दलं सोशल-डेमोक्रेटिक-दलं च इत्येतयोः द्वयोः महतोः दलयोः घटबन्धन-सर्वकारः अस्ति। ऐतिहासिक-रूपेण एते द्वे दले परस्परं प्रतिस्पर्धिनी आस्ताम्। 2005 तमे वर्षे जातेषु निर्वाचनेषु द्वयोः अपि दलयोः न एकस्य अपि पूर्णरूपेण बहुमतम् आसीत् अतः बाध्यता-वशात् घटबन्धन-सर्वकारः जातः। द्वे अपि दले विभिन्नेषु नीतिगत-विषयेषु पृथक् पृथक् रूपेण चिन्तयतः पुनरपि तत्र सहैव मिलित्वा सर्वकारस्य सञ्चालनं कुरुतः।

सत्तायां समानरूपेण भागत्वं किमर्थम् आवश्यकम् अस्ति ?

अनेन प्रकारेण सत्तायाः विभाजनं समर्थयितुं तर्कद्वयम् उपस्थापयितुं शक्येते। प्रथमः, सत्तायाः विभाजनं समीचीनम् अस्ति यतो हि एतस्मात् विभिन्नानां सामाजिक-समूहानां मध्ये सङ्घर्षस्य आशङ्का न्यूनीभवति। यतो हि सामाजिकः सङ्घर्षः आधिक्येन वर्धित्वा प्रायः हिंसायाः राजनैतिक्याः अस्थिरतायाः च रूपं प्राप्नोति अतः सत्तायाः अन्यस्मै समूहाय भागदानं राजनैतिक-व्यवस्थायाः स्थिरतायै समीचीनम् अस्ति। बहुसङ्ख्यकस्य समुदायस्य या इच्छा अस्ति सा इच्छा दुराग्रहपूर्वकम् अन्येषु आरोप्यते तर्हि तात्कालिकरूपेण च लाभदायकम् इदं कार्यं भवितुं शक्नोति परन्तु कालक्रमेण देशस्य अखण्डतायै एतादृशं कृत्यं घातकं भवितुं शक्नोति। बहुसङ्ख्यकानां जनानाम् आतङ्कः केवलम् अल्पसङ्ख्यकानां कृते एव समस्याः न उत्पादयति अपि तु प्रायः अयं बहुसङ्ख्यकानां कृते अपि नाशस्य कारणं भवति।

सत्तायाः विभाजनं लोकतान्त्रिकीणां व्यवस्थानां कृते समीचीनम् अस्ति – एतत् तथ्यं समर्थयितुम् अयम् अपि विषयः समुपस्थापयितुं शक्यते तथा च सः अधिकगभीरः अस्ति। सत्तायां समानभागत्वं वस्तुतः लोकतन्त्रस्य आत्मा अस्ति। लोकतन्त्रस्य अभिप्रायः एव भवति यत् ये जनाः एतस्याः शासन-व्यवस्थायाः अन्तर्गताः सन्ति तेषां मध्ये सत्तायाः विभाजनं भवेत् तथा च एते जनाः एतस्याम् एव व्यवस्थायां तिष्ठेयुः इति। अतः वैधः सर्वकारः सः एव अस्ति यत्र निज-भागत्वस्य माध्यमेन सर्वे समूहाः शासन-व्यवस्थया संयुक्ताः भवन्ति।

एतयोः द्वयोः तर्कयोः एकं वयं युक्तिपरकम् अपरं च नैतिकम् इति वक्तुं शक्नुमः। युक्तिपरकः बुद्धिमत्तापूर्णः च तर्कः लाभकारि-परिणामेषु बलाघातं करोति अपरञ्च नैतिक-तर्कः सत्तायाः विभाजनस्य अन्तर्भूतं महत्त्वं ज्ञापयति।

एनिते-वर्या बेल्जियमस्य उत्तरक्षेत्रस्य डच-माध्यमे विद्यालये पठति। तस्याः फ्रेञ्चभाषी विद्यालयीयः मित्रसमूहः इच्छति यत् पठनं पाठनं च फ्रेञ्चमाध्यमेन एव भवेत्। सेल्वी-वर्या श्रीलङ्कायाः या राजधानी कोलम्बो इति वर्तते तस्याः एकस्मिन् विद्यालये पठति। सा तस्याः विद्यालयीयानि नैकानि मित्राणि च तमिलभाषिणी सन्ति तेषां सर्वेषां च पितरः अपि इच्छन्ति यत् अध्यापनस्य अध्ययनस्य च माध्यमः तमिलः एव भवेत् इति।

- कीदृशः सर्वकारः एनिते, सेल्वी इत्यनयोः मातापित्रोः इच्छां पूरयितुं शक्नोति ? कः सर्वकारः अत्र आधिक्येन साफल्यम् अवाप्स्यति अपि च किमर्थम् इति ?

कथनं रहस्योद्घाटनम्

युक्तिपरकं – हानेः लाभस्य च विषये सावधानं विचिन्त्य स्वीकृतः निर्णयः। सम्पूर्णतया नैतिकः निर्णयः प्रायः एतद्विपरीतः भवति।

खलीलस्य समस्या

यथा प्रायः भवति, अधुना अपि विक्रमः शान्तरात्रौ निज-द्विचक्रिकायानं चालयति स्म, बेतालः च तस्य पृष्ठे उपविष्टः आसीत्। यथा प्रायः भवति स्म अधुना अपि इदं विचिन्त्य बेतालः विक्रमं कथां श्रावयति यत् कुत्रचित् विक्रमः निद्रां न कुर्यात् इति। कथा इत्थम् आसीत् ----

बेरूतनगरे खलीलः नामकः कश्चित् जनः निवसति स्म। तस्य पितरौ पृथक् पृथक् समुदायात् आस्ताम्। तस्य पिता आर्थोडॉक्स-ख्रिस्त-धर्मावलम्बी आसीत् माता च सुन्नीमुस्लिम-महिला आसीत्। आधुनिकस्य नगरस्य दृष्ट्या अयं कश्चित् विचित्रविषयः नासीत्। लेबनान-नगरे पृथक् पृथक् समुदायस्य जनाः निवसन्ति स्म तथा च राजधान्यां बेरूत इत्यस्याम् अपि निवसन्ति स्म। ते परस्परं सहैव निवसन्ति स्म, मेलनं सम्बन्धः च भवति स्म परन्तु गृहयुद्ध-काले ते परस्परं युध्यन्ते स्म। खलीलस्य पितृव्यः एतादृशे गृहयुद्धे एव मारितः आसीत्।

गृहयुद्धस्य समाप्तेः अनन्तरं लेबनान-नगरस्य सर्वे नेतारः सम्भूय उपविष्टवन्तः तथा च विभिन्नानां समुदायानां मध्ये सत्तायाः विभाजनस्य केषुचित् नियमेषु मतैक्यं प्रकटितवन्तः। एतेषां नियमानाम् अनुसारं निश्चितं यत् देशस्य राष्ट्रपतिः मैरोनाइट-सम्प्रदायस्य कश्चित् कैथोलिकः एव स्यात् इति। केवलं सुन्नी-यवनः एव प्रधानमन्त्री भवितुं शक्नोति। उपप्रधानमन्त्रि-पदे आर्थोडॉस्स-ख्रिस्तधर्मी संसदः च अध्यक्षपदे शिया-यवनः एव भवेत् इति। एतस्य सन्धेः अनुसारं परवर्तिकाले ख्रिस्तधर्मिणः फ्रांसात् संरक्षणस्य अभ्यर्थनां न करिष्यन्ति तथा च यवनाः अपि प्रतिवेशिना सीरिया-देशेन सह एकीकरणस्य याचनां न करिष्यन्ति इति विषये एकमताः जाताः। यदा ख्रिस्तधर्मिणां यवनानां च मध्ये अयं सन्धिः अभवत् तदा द्वयोः जनसङ्ख्या प्रायः समाना आसीत्। परवर्तिकाले यवनाः स्पष्टरूपेण बहुमतं प्राप्तवन्तः परन्तु द्वौ अपि पक्षौ इदानीम् अपि तं सन्धिं समानपूर्वकं पालयतः स्म।

खलीलः एतस्मिन् सन्धौ अव्यवस्थां पश्यति। सः राजनैतिक-महत्त्वाकाङ्क्षा-सम्पन्नः लोकप्रियः जनः अस्ति परन्तु वर्तमान-व्यवस्थायां सत्यां सः सर्वोच्चपदं न अलङ्कर्तुं शक्नोति। सः न तु मातुः धर्मस्य अनुसरणं करोति न च एव पितुः धर्मस्य एव। वस्तुतः सः न इच्छति यत् तस्याभिज्ञानं केनापि धर्ममाध्यमेन भवेत् इति। सः एतं विषयं न अवगच्छति यत् लेबनान-नगरम् अपि अन्येषां लोकतन्त्राणाम् इव किमर्थं न व्यवहरति ? तस्य कथनम् अस्ति – केवलं निर्वाचनप्रक्रिया भवेत्, प्रत्येकम् अपि तत्र भागं ग्रहीतुं स्वतन्त्रः भवेत् तथा च यः सर्वाधिकानि मतानि प्राप्नुयात् सः राष्ट्रपतिपदे नियुक्तः स्यात् इति, कामं सः कस्मात् अपि समुदायात् सम्प्रदायात् च भवेत् इति ? परन्तु तस्य ये वरिष्ठाः प्रौढाः च जनाः सन्ति ये च गृहयुद्धं दृष्टवन्तः तेषां कथनम् अस्ति यत् वर्तमान-व्यवस्थया एव शान्तेः स्थापना निश्चयेन भवितुं शक्नोति।

अधुना कथा समाप्ता अपि न जाता आसीत् तदा एव तौ दूरदर्शन-सङ्केत-स्तम्भस्य पार्श्वे प्राप्तवन्तौ। अत्र तौ स्थातुं शक्नुतः स्म। बेतालः वेगेन कथायाः समाप्तिम् अकरोत् तथा च निजप्रश्नं विक्रमं पृष्टवान्, "यदि भवान् लेबनान-नगरस्य अधिनियमं पुनः लेखितुम् अधिकारी स्यात् तर्हि भवान् किम् अकरिष्यत् ? बेतालः विक्रमस्य आत्मनः च मध्ये जातस्य सन्धेः आवृत्तिं न विस्मृतवान् – "यदि भवतां मस्तिष्के स्पष्टम् उत्तरम् अस्ति, पुनरपि च भवान् न वदति तर्हि भवतः द्विचक्रिकायानं जडतां गमिष्यति तेन भवान् अग्रे न गन्तुं पारयति ?

किं भवन्तः सरलस्वभावस्य विक्रमस्य वेतालद्वारा पृष्टस्य प्रश्नस्य उत्तरदाने साहाय्यं करिष्यन्ति ?

सत्तायाः सभागत्वस्य रूपाणि

राजनैतिक-सत्तायाः विभाजनं न कर्तुं शक्यते – एतस्याः अवधारणायाः विरोधी, सत्तायाः सभागत्वस्य विचारः पुरतः आगतः आसीत् । चिरकालात् अयम् एव विचारः प्रवर्तते स्म यत् सर्वकारस्य सर्वाः शक्तयः कस्यचित् एकस्य जनस्य अथवा कस्यचित् विशिष्टस्य जनसमूहस्य पार्श्वे भवेत् इति । यदि निर्णयस्य शक्तिः विकीर्णा स्यात् तर्हि वेगेन निर्णयकरणं तेषां च क्रियात्मक-रूपेण पालनं न शक्यते । परन्तु, लोकतन्त्रस्य कश्चित् आधारभूतः सिद्धान्तः अयम् अस्ति यत् जनता एव सम्पूर्णायाः राजनैतिक्याः शक्तेः स्रोतो-रूपेण अस्ति । यत्र जनाः स्व-शासितानां संस्थानां माध्यमेन निजशासनं सञ्चालयन्ति । कस्मिंश्चित् शोभने लोकतन्त्रिके शासने समाजस्य विभिन्नानां समूहानां तेषां विचाराणां च समुचितं सम्मानं क्रियते सार्वभौम-नीतीनां निश्चये सर्वेषां तथ्यानि सम्मिलितानि भवन्ति अतः तत् एव लोकतान्त्रिक-शासनं सुशासनम् इति मन्यते यस्मिन् आधिक्येन नागराः राजनैतिक-सत्तायां भागिनः भवेयुः इति ।

सत्तायाः नेतृत्वम्,

ऑले जॉनसन-स्वीडन, केगल कार्टूस

सद्यतने काले रूसे केचन नवीनाः अधिनियमाः जाताः सन्ति । एतेषाम् अधिनियमानां रचनं कृत्वा रूसस्य राष्ट्रपतेः शक्तीनां विस्तारः जातः अस्ति । तस्मिन् एव काले अमरीकायाः राष्ट्रपतिः रूसस्य भ्रमणम् अकरोत् । उपरि प्रदत्तस्य व्यङ्ग्य-चित्रस्य अनुसारं लोकतन्त्रस्य सत्तायाः च केन्द्रीकरणस्य मध्ये कः सम्बन्धः अस्ति ? अत्र यादृशं वस्तु प्रति ध्यानाकर्षणं कृतम् अस्ति तस्य पृष्ठौ किं भवन्तः कानिचन अन्यानि व्यङ्ग्य-चित्राणि एकत्रीकर्तुं शक्नुवन्ति ?

आधुनिकीषु लोकतान्त्रिक-व्यवस्थासु सत्तायाः भागत्वस्य नैकानि रूपाणि भवितुं शक्नुवन्ति । आयान्तु, वयं केषुचित् प्रचलितेषु उदाहरणेषु विचारं कुर्मः –

❶ शासनस्य विभिन्नेषु अङ्गेषु तद्यथा – विधायिकायाः कार्यपालिकायाः न्यायपालिकायाः च मध्ये सत्तायाः विभाजनं भवति । सत्तायाः एतत् क्षैतिजं वितरणम् इत्यपि कथयिष्यामः यतो हि एतस्मिन् वितरणे सर्वकारस्य विभिन्नानि अङ्गानि एतस्मिन् एव स्तरे भूत्वा स्व-स्व-शक्तेः उपयोगं कुर्वन्ति । एतादृशेन विभाजनेन इदं सुनिश्चितं भवति यत् किञ्चित् अपि एकम् अङ्गं सत्तायाः असीमितम् उपयोगं न कर्तुं शक्नोति । प्रत्येकम् अपि अङ्गम् अन्यस्य नियन्त्रकं भवति । एतेन विभिन्नानां संस्थानां मध्ये सत्तायाः सन्तुलनं भवति । लोकतान्त्रिक-संस्थानां विषये नवम-कक्ष्यायां पठन्तः वयं दृष्टवन्तः यत् अस्माकं देशे कार्यपालिका सत्तायाः उपयोगम् अवश्यं करोति परन्तु इयं संसदः अधीनत्वे कार्यं करोति, न्यायपालिकायाः नियुक्तिं कार्यपालिका करोति परन्तु न्यायपालिका एव कार्यपालिकया विधायिकया च निर्मितानाम् अधिनियमानाम् अपि नियन्त्रणं करोति । एषा व्यवस्था नियन्त्रणस्य सन्तुलनस्य च व्यवस्था इत्यपि कथ्यते ।

❷ सर्वकार-मध्ये अपि विभिन्नस्तरेषु सत्तायाः विभाजनं भवितुं शक्नोति – यथा, सम्पूर्ण-देशाय कश्चित् सामान्यसर्वकारः स्यात् तथा च पुनः प्रान्तस्तरे क्षेत्रीयस्तरे च पृथक् पृथक् सर्वकारः स्यात् इति । एतादृशः सामान्यः सर्वकारः यः सम्पूर्णदेशाय भवति सः प्रायः सङ्घः अथवा केन्द्रसर्वकारः इति उच्यते । प्रान्तीयाः क्षेत्रीयाः च सर्वकाराः प्रत्येकस्मिन् स्थाने पृथक् पृथक् नामभिः उच्यन्ते । भारते वयं सर्वकाराः इति तान् वदामः । प्रत्येकस्मिन् देशे विभाजनम् एतादृशम् एव नास्ति । बहुषु देशेषु प्रान्तीयाः अथवा क्षेत्रीयाः

सर्वकाराः न सन्ति । परन्तु भारतवत् येषु देशेषु व्यवस्था अस्ति तत्रत्ये संविधाने एतस्य तथ्यस्य स्पष्टतया उल्लेखः अस्ति यत् केन्द्रसर्वकारस्य राज्यसर्वकारस्य च मध्ये सत्तायाः विभाजनं कथं भविष्यति । बेल्जियम-मध्ये तु एतत् कार्यम् अभवत् परन्तु श्रीलङ्कायाम् एतत् न अभवत् । ये सर्वकाराः राज्यसर्वकारेभ्यः निम्नस्तरे सन्ति तेषां कृते अपि एतादृशी एव व्यवस्था भवितुं शक्नोति । नगरपालिका पंचायतसंस्थाः च इति एतादृशस्य विभागस्य एव अन्तर्गताः सन्ति । उच्चस्तरस्य निम्नस्तरस्य च सर्वकाराणां मध्ये सत्तायाः एतादृशं विभाजनम् उर्ध्वाधर-वितरणम् इति कथ्यते । वयम् अग्रिमे अध्याये एतस्मिन् विषये विस्तरेण चर्चां करिष्यामः ।

❸ सत्तायाः विभाजनं विभिन्नानां सामाजिक-समूहानां विविधानां भाषा-भाषिणां धार्मिकसमूहानां च मध्ये अपि भवितुं शक्नोति । बेल्जियमस्य सामुदायिक-सर्वकारः, एतस्याः व्यवस्थायाः एकं समीचीनम् उदाहरणम् अस्ति । केषाञ्चित् देशानां संविधाने अधिनियमे च एतस्य विषयस्य प्रावधानम् अस्ति यत् सामाजिकरूपेण निर्बलसमुदायस्य जनेभ्यः महिलाभ्यः च विधायिकायां प्रशासने च विशेषः भागः देयः इति । गतवर्षे वयं भारते प्रचलितायाः आरक्षित-निर्वाचन-क्षेत्र-युक्तायाः एतादृश्याः व्यवस्थायाः विषये पठितवन्तः । एतादृशी व्यवस्था विधायिकायां प्रशासने च पृथक् पृथक् सामाजिकसमूहाः भागिनः भवेयुः इति एतदर्थं क्रियते यतः जनाः आत्मानं शासनतः पृथक् इति न अनुभवेयुः । अल्पसङ्ख्यक-समुदायेभ्यः अपि अनेन एव प्रकारेण सत्तायाः समुचितः अवसरः दीयते । सामाजिक-विविधता-युक्तेभ्यः कथं शासने अवसरः दीयेत इत्यस्मिन् विषये नियुक्तेः च उपायानां विषये वयं द्वितीये घट्टे चर्चां करिष्यामः ।

❹ कदाचित् केचन समूहाः स्वीयाः अभ्यर्थनाः अधिकृत्य आन्दोलनानि कुर्वन्ति तस्मात् अपि सत्तायाः विभाजनं भवति तथा च एतादृशाः समूहाः शासनं प्रभावयन्ति नियन्त्रयन्ति च इति । लोकतन्त्रे जनानां पुरतः सत्तायाः ये प्रत्याशिनः अर्हाः च जनाः सन्ति तत्र अपि निर्वाचनस्य विकल्पः अवश्यमेव स्यात् । समानकालिकीषु लोकतान्त्रिक-व्यवस्थासु अयं विकल्पः विभिन्न-दलानां रूपेण उपलब्धः भवति । दलानि सत्तायै परस्परं प्रतिस्पर्धन्ते । दलानाम् एतादृशी प्रतिस्पर्धा एव निश्चीकरोति यत् सत्ता एकस्य जनस्य पार्श्वे न भवेत् । कस्मिंश्चित् व्यापककालचक्रे जातानां घटनानां विषये विचारयामः चेत् जानीमः यत् सत्ता क्रमशः पृथक् पृथक् विचारधारा-सम्पन्न-समूहानां दलानां पार्श्वे कदाचित् भवति कदाचित् च अपरेषाम् इति । कदाचित् च सत्तायाः इदं समानभागत्वं सर्वथा प्रत्यक्षम् इति दृश्यते यतो हि द्वे अथवा ततोऽधिकानि दलानि मिलित्वा निर्वाचन-प्रक्रियायां भागं स्वीकुर्वन्ति अथवा सर्वकारस्य निर्माणं कुर्वन्ति । लोकतन्त्रे वयं वणिजाम् उद्योगपतीनां कृषकाणाम् औद्योगिक-श्रमिकाणां च नैकानि सङ्घटित-सङ्घटनानि अपि सक्रियानि सन्ति इत्येतत् पश्यामः । सर्वकारस्य विभिन्नासु समितिषु साक्षात् समान-भाग-ग्रहणं कृत्वा अथवा नीतीनां विषये निज-सदस्यवर्गस्य लाभाय वर्तमान-शासने बलाघातं कृत्वा निजकार्यं साधयन्ति । तृतीये घट्टे वयं राजनैतिकदलानां विपक्षिदलानां सामाजिकान्दोलनानां च कार्यप्रणाल्याः विषये चर्चाम् अवधानं च करिष्यामः ।

मम विद्यालये प्रतिमासं कक्षानायकस्य परिवर्तनं भवति । किं एतत् एव भवद्भिः सत्तायां भागग्रहणम् इति उच्यते ?

सत्तायाः विभाजनस्य कानिचन उदाहरणानि निम्नलिखितानि सन्ति । एतानि सत्तायाः भागग्रहणस्य चतसृषु श्रेणीषु कासु परिगणयितुं शक्यन्ते ? अत्र सत्तायाः विभाजनं कः केन सह करोति ?

- बम्बयी-उच्चन्यायालयेन महाराष्ट्र-सर्वकारः आदिष्टः यत् सः तत्क्षणे एव क्रियां कुर्यात् तथा च मुम्बयी-महानगरस्य सप्तसु अनाथालयेषु ये 2000 बालाः सन्ति तेषां जीवनशैल्याः साधनानां च परिष्कारं कुर्युः ।
- कनाडायाः ओंटेरियो-प्रान्तस्य सर्वकारः तत्रत्यानां मूलवासि-समुदायैः सह भूसम्बद्धविवादस्य समाधानाय अनुमतिम् अददात् । स्थानीय-प्रकरणानाम् उत्तरदायी मन्त्री अघोषयत् यत् सर्वकारः मूलवासिभिः समुदायैः सह पारस्परिक-सम्मानस्य सहयोगस्य च भावनया कार्यं करिष्यति ।
- रूसस्य द्वे प्रभावशालिनी राजनैतिकदले तद्यथा द यूनियन आन राइट फोर्सेज इति तथा च लिबरल-याब्लोको मूवमेण्ट इत्यनेन कस्यचित् दृढस्य दक्षिणपन्थिनः घटबन्धन-सर्वकारस्य निर्माणाय निज-सङ्घटनानां विलयस्य निर्णयम् अकरोत् । तयोः द्वयोः सर्वकारयोः प्रस्तावः अस्ति यत् अग्रिमे संसदीयनिर्वाचने आवां प्रत्याशिनां सामूहिकसूचीं निर्मास्यामः ।
- नाइजीरियायाः विभिन्नानां प्रान्तानां वित्तमन्त्रिणः सम्भूय अभ्यर्थनाम् अकुर्वन् यत् सङ्घीय-सर्वकारः निजस्य आयस्य स्रोतांसि घोषयेत् । ते इदम् अपि अवगन्तुम् इच्छन्ति स्म यत् विभिन्नानां प्रान्तानां मध्ये राजस्वस्य विभाजनं केन आधारेण भवति ।

प्रश्नावली

1. आधुनिक-लोकतान्त्रिकीषु व्यवस्थासु सत्तायाः विभाजनस्य भागग्रहणस्य च पृथक् पृथक् उपायाः के सन्ति ? एतेषु प्रत्येकम् एकैकम् उदाहरणम् अपि यच्छन्तु ।
2. भारतीय-सन्दर्भे सत्तायाः भागग्रहणस्य एकम् उदाहरणं यच्छन् एतस्य एकं युक्तिपरकं नैतिकं च कारणं सूचयन्तु ।
3. अस्य अध्यायस्य पठनात् परं त्रयः छात्राः पृथक् पृथक् निष्कर्षं प्राप्तवन्तः । भवन्तः एतेषु केन सह एकमताः अथवा सम्प्रतिपन्नाः सन्ति तथा च किमर्थम् ? स्वीयम् उत्तरम् उपपञ्चाशतं शब्दैः यच्छन्तु ।

   थम्मनः – येषु समाजेषु क्षेत्रस्य भाषायाः जातेः च आधारेण विभाजनं स्यात् तादृशी एव सत्तायाः समान-भागता आवश्यकी अस्ति ।

   मथायी – सत्तायाः भागधरत्वं केवलम् एतादृशानां महतां देशानां कृते उपयुक्तम् अस्ति यत्र क्षेत्रीयाणि विभाजनानि विद्यामानानि भवन्ति ।

   औसेफः – प्रत्येकस्मिन् समाजे सत्तायाः भागधरत्वस्य आवश्यकता भवति कामं सः लघुः एव स्यात् अथवा तस्मिन् सामाजिकं विभाजनं न स्यात् ।
4. बेल्जियम-देशे ब्रूसेल्स इत्यस्य समीपे स्थितस्य नगरस्य मर्चटेमस्य निगमायुक्तः स्वाधीनेषु विद्यालयेषु फ्रेञ्चभाषया सम्भाषणे स्थापितः प्रतिबन्धः समीचीनः अस्ति इति अवदत् । सः अवदत् यत् एतस्मात् डचभाषया ये न सम्भाषन्ते तादृशाः जनाः एतस्य फ्लेमिश इत्यस्य नगरस्य जनैः सह सम्बद्धुं साहाय्यं लप्स्यन्ते । किं भवन्तः अनुभवन्ति यत् अयं निर्णयः बेल्जियमस्य सत्तायाः भागधरत्वस्य व्यवस्थायाः मूलभावनया सह सामीप्यं भजते ? स्वीयम् उत्तरम् उपपञ्चाशतं शब्दैः लिखन्तु ।

5. अधः प्रदत्तम् उद्धरणं सावधानं पठन्तु तथा च एतस्मिन् सत्तायाः भागधरत्वस्य यानि युक्तिपरकानि कारणानि दत्तानि ज्ञापितानि सन्ति तेषु कस्यचित् एकस्य चयनं कुर्वन्तु।

"महात्मगान्धिनः स्वप्नान् साकारीकर्तुं तथा च निजानां संविधानस्य निर्मातृणां जनानाम् आशाः आकाङ्क्षाः च पूरयितुम् अस्माभिः पञ्चायत-संस्थाभ्यः अधिकाराः अवश्यमेव दातव्याः। "पञ्चायत-राजः एव वास्तविकस्य लोकतन्त्रस्य स्थापनं करोति। अयं सत्तां तेभ्यः जनेभ्यः अर्पयति येषां पार्श्वे सत्ता भवितव्या इति। भ्रष्टाचारस्य न्यूनीकरणाय प्रशासनिकस्य कौशलस्य च वर्धनाय पञ्चायतेभ्यः अधिकारदानम् इति कञ्चित् उपायरूपम् अपि अस्ति। यदा विकास-योजनानां निर्माणे क्रियान्वयने च जनानां सहभागिता भविष्यति तदा योजनासु तेषां नियन्त्रणम् अपि वर्धिष्यति। तेन ये भ्रष्टाचारिणः मध्यस्थाः जनाः भवन्ति ते भ्रष्टाचारणम् अपि न कर्तुं शक्ष्यन्ति। अनेन प्रकारेण पञ्चायतराजः लोकतन्त्रस्य आधारशिलां दृढां करिष्यति।

6. सत्तायाः विभाजनस्य पक्षे विपक्षे च नैके तर्काः समुपस्थाप्यन्ते। एतेषु ये तर्काः सत्तायाः विभाजनस्य पक्षे सन्ति तानि अभिजानन्तु तथा च अधः प्रदत्तेन कूटेन निजोत्तरस्य चयनं कुर्वन्तु।

सत्तायाः भागधरत्वम् –

(क) विभिन्नानां समुदायानां मध्ये सङ्घर्षं न्यूनीकरोति।

(ख) पक्षपातस्य आशङ्कां न्यूनीकरोति।

(ग) निर्णय-स्वीकरणस्य प्रक्रियायाः स्थगनं करोति।

(घ) विविधताः आत्मनि आकुञ्चयति।

(ङ) अस्थिरतां परस्पर-विद्वेषं च वर्धयति।

(च) सत्तायां जनानां भागधरत्वं वर्धयति।

(छ) देशस्य ऐक्यं दुर्बलीकरोति।

(सा)	क	ख	घ	च
(रे)	क	ग	ङ	च
(गा)	क	ख	घ	छ
(मा)	ख	ग	घ	छ

7. बेल्जियमस्य श्रीलङ्कायाः च सत्तायां भागधरत्वस्य व्यवस्थायाः विषये निम्नलिखितानां कथानां विषये विचारयन्तु –

(क) बेल्जियमे डच-भाषिणः बहुसङ्ख्यकाः फ्रेञ्चभाषिणाम् अल्पसङ्ख्यकेषु निजप्रभुत्व-स्थापनस्य प्रयासम् अकुर्वन्।

(ख) सर्वकारस्य नीतिद्वारा सिंहली-भाषिणां बहुसङ्ख्यकानां प्रभुत्वं यथावत् भवेत् इति प्रयासः कृतः।

(ग) स्वीयायाः संस्कृतेः भाषायाः च रक्षणाय तथा च शिक्षायाम् सेवासु च समानतायाः अवसराणां कृते श्रीलङ्कायाः तमिलाः याचितवन्तः यत् सत्तायाः संघीय-संरचनायाः आधारेण वण्टनं भवेत् इति।

(घ) बेल्जियमे एकात्मक-सर्वकारस्य स्थाने संघीय-शासन-व्यवस्थायाः स्थापनं कृत्वा यः देशः भाषाधारेण विभाजनं प्रति गच्छन् आसीत् तस्य रक्षणं कृतम्।

उपरि प्रदत्तेषु कथनेषु कानि समीचीनानि सन्ति ?

(सा) क, ख,ग तथा च घ (रे) क,ख तथा च घ (गा) ग तथा च घ (मा) ख,ग तथा च घ

8. प्रथमायाः सूच्याः (सत्तायाः विभाजनस्य रूपाणि) द्वितीयसूच्या (शासनस्य रूपाणि) सह मेलनं कुर्वन्तु तथा च अधः प्रदत्तस्य कूटस्य उपयोगं कुर्वन्तः समुचितम् उत्तरं यच्छन्तु –

	सूची i	सूची ii
1.	सर्वकारस्य विभिन्नानाम् अङ्गानां मध्ये सत्तायाः विभाजनम्	(क) सामुदायिकः सर्वकारः
2.	विभिन्नस्तराणां सर्वाकाराणां मध्ये अधिकाराणां विभाजनम्	(ख) अधिकाराणां वितरणम्
3.	विभिन्नानां सामाजिक-समूहानां मध्ये सत्तायाः सहभागिता	(ग) घटबन्धन-सर्वकारः
4.	द्वयोः अथवा अधिकानां दलानां मध्ये सत्तायाः सहभागिता	(ग) संघीय-सर्वकारः

	1	2	3	4
(सा)	घ	क	ख	ग
(रे)	ख	ग	घ	क
(गा)	ख	घ	क	ग
(मा)	ग	घ	क	ख

प्रश्नावली

9. सत्तायाः सहभागितायाः विषये निम्नलिखितयोः द्वयोः कथनयोः विषये अवधानं कुर्वन्तु तथा च अधः प्रदत्तस्य कूटस्य आधारेण उत्तरं यच्छन्तु –

अ) सत्तायाः सहभागिता लोकतन्त्राय लाभकरी अस्ति ।

ब) अनेन सामाजिक-समूहेषु सङ्घर्षस्य ऊहा क्रियते ।

एतयोः कथनयोः किं समीचीनम् अस्ति किं च असमीचीनम् इति ?

(क) अ इति समीचीनम् परन्तु ब इति असमीचीनम् ।

(ख) अ , ब इत्येते समीचीने स्तः ।

(ग) अ ब इत्येते द्वे असमीचीने स्तः ।

(घ) अ इति समीचीनम् अस्ति परन्तु ब इति असमीचीनम् अस्ति ।

सङ्घवादः

अध्यायः - 2

परिचयः

गताध्याये वयं पठितवन्तः आसन् यत् शासनस्य विभिन्नानां स्तराणां मध्ये सत्तायाः ऊर्ध्वाधर इति रूपेण विभाजनम् आधुनिकेषु लोकतन्त्रेषु सत्तायाः सहभागितायाः किञ्चित् सामान्यं रूपम् अस्ति। एतस्मिन् अध्याये वयं सत्तायाः विभाजनस्य एतस्य एव स्वरूपस्य विचारं करिष्यामः। सामान्यतया एतत् सङ्घवादः इति उच्यते। अनेन एकस्याः एव लोकतान्त्रिक्याः व्यवस्थायाः आभ्यन्तरे पृथक् पृथक् क्षेत्रेषु जाताः विभिन्नाः जनाः पारस्परिक-भावेन स्थातुं शक्नुवन्ति। अध्यायस्य अवशिष्टे भागे भारतस्य सङ्घवादस्य सिद्धान्तस्य व्यवहारस्य च बोधनाय प्रयासः कृतः। सङ्घीय-संरचनया सम्बद्धेषु संवैधानिकेषु प्रावधानेषु चर्चायाः अनन्तरम् अस्मिन् अध्याये सङ्घवादस्य दृढीकरणाय याः नीतयः सन्ति तथा च या राजनैतिक-प्रक्रिया अस्ति तस्याः अपि विश्लेषणं करिष्यते। अध्यायस्य अन्ते वयं भारतीयस्य सङ्घवादस्य नवीनस्य तृतीयस्य च स्तरस्य अर्थात् स्थानीय-शासनस्य विषये चर्चां करिष्यामः।

संघवादः किम् अस्ति ?

अहं किञ्चित् सन्देहे अस्मि। वस्तुतः भारतस्य शासनव्यवस्थायाः कृते किं नाम दातव्यम् ? इयम् एकात्मिका अस्ति, संघात्मिका अस्ति अथवा केन्द्रीकृता च ?

आयान्तु, एकदा पुनः गते अध्याये प्रदत्तस्य बेल्जियमस्य श्रीलङ्कायाः च पार्थक्यस्य विषये अवधानं कुर्मः । भवतां स्मरणे स्यात् यत् बेल्जियमस्य संविधाने यानि प्रमुखाणि परिवर्तनानि कृतानि तेषु केन्द्रीय-सर्वकारस्य (शक्तेः) अधिकाराणां न्यूनीकरणम् अपि आसीत् तथा च केचन अधिकाराः प्रान्तीय-सर्वकारेभ्यः अपि प्रदत्ताः । बेल्जियम-मध्ये तस्मात् पूर्वम् अपि प्रान्तीयाः सर्वकाराः आसन् । तदा अपि तेषां स्वीया काचित् भूमिका आसीत्, स्वीयाः अधिकाराः आसन् । परन्तु एते अधिकाराः सर्वकारेण तेभ्यः प्रान्तीय-सर्वकारेभ्यः प्रदत्ताः आसन् तथा च केन्द्रीयसर्वकारः तान् अधिकारान् प्रतिस्वीकर्तुम् अपि शक्नोति स्म। 1993 तमे वर्षे कानिचन परिवर्तनानि जातानि तथा च प्रान्तीय-सर्वकारेभ्यः केचन संवैधानिकाः अधिकाराः प्रदत्ताः । एतादृशानाम् अधिकाराणां कृते अधुना प्रान्तीयाः सर्वकाराः केन्द्र-सर्वकारस्य आश्रिताः न आसन् इति । अनेन प्रकारेण बेल्जियम-देशेन एकात्मक-शासनस्य स्थाने सङ्घीया शासन-प्रक्रिया अङ्गीकृता । श्रीलङ्कादेशे अधुना व्यवहारिकरूपेण एकात्मिकी शासन-व्यवस्था अस्ति यत्र केन्द्रीय-सर्वकारस्य पार्श्वे एव सर्वे अधिकाराः सन्ति । श्रीलङ्कायाः तमिल-नेतारः इच्छन्ति स्म यत् देशे यथार्थरूपेण सङ्घीय-शासन-व्यवस्था भवेत् इति ।

सङ्घीय-शासन-व्यवस्थायां सर्वोच्चसत्ता केन्द्रीय-प्राधिकारस्य तस्य विभिन्नानाम् आनुषाङ्गिक-घट्टानां च मध्ये विभाज्यते। सामान्यतः सङ्घीय-व्यवस्थायां द्वयोः स्तरयोः सर्वकाराः भवन्ति। अत्र एकः सर्वकारः सम्पूर्णदेशाय भवति राष्ट्रिय-प्रकरणानि एतस्य सर्वकारस्य अधीनानि भवन्ति । राज्य-सर्वकाराणां दायित्वं भवति यत् ते दैनन्दिन-शासनस्य कार्यस्य निरीक्षणं कुर्युः इति । सत्तायाः एतयोः द्वयोः स्तरयोः सर्वकारयोः स्वीयानि स्वतन्त्र-कार्याणि भवन्ति ।

अनया दृष्ट्या सङ्घीय-शासन-व्यवस्था एकात्मक-शासन-व्यवस्थायाः विपरीता अस्ति । एकात्मक-व्यवस्थायां शासनस्य एकः एव स्तरः भवति तथा च अन्ये विभागाः तस्य अधीनस्थाः भूत्वा कार्यं कुर्वन्ति । एतस्यां व्यवस्थायां केन्द्रीयः सर्वकारः प्रान्तीय-सर्वकारेभ्यः स्थानीय-सर्वकारेभ्यः च निर्देष्टुं शक्नोति । परन्तु सङ्घीय-व्यवस्थायां केन्द्रीय-सर्वकारः राज्यसर्वकाराय



श्रोतः – माट्रियलः किंग्स्टनः च इति , हैण्डबुक-ऑव फेडरल-कंट्रीज 2002, मैक्गिल-क्वींस यूनिवर्सिटी प्रेस 2002

यद्यपि विश्वस्य 192 देशेषु केवलं 25 देशेषु एव सङ्घीय-शासन-व्यवस्था अस्ति परन्तु एतेषु देशेषु विश्वस्य 40 प्रतिशतं जनाः निवसन्ति। विश्वस्य अधिकतराः महान्तः देशाः सङ्घीयाः सन्ति। किं भवन्तः एतस्मिन् मानचित्रे एतस्य नियमस्य अपवादम् अन्वेष्टुं शक्नुवन्ति ?

किमपि विशिष्टं कर्तुम् आदेशं न दातुं शक्नोति। राज्यसर्वकाराणां स्वतन्त्राः अधिकाराः भवन्ति एतदर्थं च ते केन्द्र-सर्वकाराय सर्वं न निवेदयन्ति । राज्यसर्वकारः केन्द्रसर्वकारः च स्व-स्तरेण जनतां प्रति उत्तरदातारौ भवतः । आयान्तु, सङ्घीय-व्यवस्थायाः कासाञ्चित् महत्त्वपूर्णानां विशेषतानां विषये जानीमः –

❶ सङ्घीय-व्यवस्थायां सर्वकारः स्तरद्वय-युक्तः अथवा अधिक-विभाग-युक्तः भवति ।

❷ पृथक्पृथक्स्तरीयाःसर्वकाराःएतस्मिन्एव नागर-समूहस्य शासनं कुर्वन्ति परन्तु अधिनियम-रचनायाः राजस्वस्य ग्रहणस्य प्रशासनस्य च तेषां स्वीयं स्वीयम् अधिकारक्षेत्रं भवति ।

❸ विभिन्न-प्रकारकाणां सर्वकाराणाम् अधिकार–क्षेत्राणि संविधाने स्पष्टरूपेण वर्णितानि भवन्ति – अतः संविधानं सर्वकारस्य सर्वविधस्य अस्तित्वस्य प्राधिकारस्य च प्रतिभूतिं सुरक्षां च ददाति ।

❹ संविधानस्य मौलिक-प्रावधानानि कश्चित् एकविधः सर्वकारः एकाकी न परिवर्तयितुं शक्नोति। एतादृशानि परिवर्तितानि द्विविध-प्रकारकस्य सर्वकाराणां मतैक्येन एव भवितुं शक्नुवन्ति ।

❺ न्यायालयाः संविधानस्य, विभिन्नानां सर्वकाराणाम्, अधिकारिणां च व्याख्यां कर्तुम् अधिकृताः सन्ति । विभिन्न-प्रकारकाणां सर्वकाराणां मध्ये अधिकाराणां विवादस्य स्थितौ सर्वोच्च-न्यायालयःनिर्णायकस्यभूमिकांनिर्वहति।

❻ वित्तीय-स्वायत्तताया: निश्चयाय विभिन्न-सर्वकाराणां कृते राजस्व-सङ्ग्रहणस्य पृथक् पृथक् स्रोतांसि निश्चितानि सन्ति ।

❼ अनेनप्रकारेणसङ्घीय-शासन-व्यवस्थायाः द्विविधाः उद्देश्याः सन्ति – देशस्य ऐक्यस्य सुरक्षा, तस्य वर्धनं च, द्वितीयः च क्षेत्रीय-विविधतानां सम्पूर्णतया सम्मानम्। एतस्मात् कारणात् सङ्घीय-व्यवस्थायाः घटनाय कार्याय च विषयद्वयं महत्त्वपूर्णम् अस्ति । विभिन्न-स्तरीयाणां सर्वकाराणां मध्ये सत्तायाः विभाजनाय ये नियमाः सन्ति तत्र मतैक्यं स्यात् इति तथा च परस्परं विश्वासः अपि भवेत् यत् सर्वे अपि स्वीयस्य स्वीयस्य अधिकारक्षेत्रस्य अनुरूपं कार्यं करिष्यन्ति इति। आदर्श-सङ्घीय-व्यवस्थायाः एतौ द्वौ पक्षौ भवतः – अन्योऽन्येषु विश्वासः सहकार-भावाय च मतैक्यम् इति ।

केन्द्रस्य, विभिन्नानां राज्यसर्वकाराणां च मध्ये सत्तायाः विभाजनं प्रत्येकस्मिन् अपि सङ्घीय-सर्वकारे पृथक् पृथक् प्रकारेण भवति ।

तत्र एतत् तथ्यं महत्त्वपूर्णं भवति यत् सङ्घस्य स्थापनं केषु ऐतिहासिकेषु सन्दर्भेषु जातम् अस्ति । सङ्घीय-शासन-व्यवस्थाः सामान्यतः द्वाभ्याम् उपायाभ्यां रच्यन्ते। प्रथमः उपायः अस्ति द्वयोः अथवा ततोऽधिकानां स्वतन्त्र-राष्ट्राणां घटनं कृत्वा कस्यचित् व्यापकस्य प्रकल्पस्य घटनम् इति। एतस्यां प्रक्रियायां द्वे अपि स्वतन्त्र-राष्ट्रे निजां सम्प्रभुतां सङ्घीकृत्य स्वीयां पृथक् सत्ताम् अपि यथावत् स्थापयन्ति अनेन माध्यमेन च स्वीयायाः समृद्धेः सुरक्षायाः च मार्गम् अपि आविष्कुर्वन्ति । यानि राष्ट्राणि सम्भूय सङ्घीकरणम् अकुर्वन् तानि इत्थं सन्ति - संयुक्तराज्य-अमेरिका, स्विट्जरलैण्डः आस्ट्रेलिया इत्यादीनि । एतादृशेषु सङ्घीयव्यवस्था-युक्तेषु देशेषु सामान्यरूपेण प्रान्तेभ्यः अपि समानाः अधिकाराः भवन्ति तथा च केन्द्रस्य अपेक्षया अपि ते आधिक्येन शक्तिशालिनः भवन्ति ।

यदा महान् देशः स्वीयाम् आन्तरिकीं विविधतां मनसि निधाय राज्यानां रचनां करोति तथा च राज्यानां राष्ट्रिय-सर्वकारस्य च मध्ये सत्तायाः विभाजनं करोति तदा एषः संघीय-शासन-व्यवस्थां कल्पयितुम् अपरः उपायः अस्ति । भारते बेल्जियमे स्पेने च एवमेव अभवत् यथोपरि प्रतिपादितम् अस्ति । एतस्यां द्वितीय-व्यवस्थायां राज्यानाम् अपेक्षया केन्द्रसर्वकारः आधिकः शक्तिशाली भवति । प्रायः एतस्याः व्यवस्थायाः अन्तर्गतं विभिन्नेभ्यः राज्येभ्यः प्रायः समानाः अधिकाराः दीयन्ते परन्तु स्थितिविशेषे कदाचित् कस्मैचित् प्रान्ताय विशेषाधिकाराः अपि दीयन्ते ।

सङ्घीय-व्यवस्था यदा केवलं महतां देशानाम् अनुकूलम् अस्ति तदा बेल्जियम-देशेन एषा किमर्थं स्वीकृता ?

विषयम् उपस्थापयेत् रहस्योद्घाटनं कुर्यात्

अधिकार-क्षेत्रम् – एतादृशं क्षेत्रं यस्मिन् कस्यचित् संवैधानिकः अधिकारः भवेत् । इदं क्षेत्रम् भौगोलिक्याः सीमायाः अन्तर्गतं परिभाष्यते अथवा एतस्य अन्तर्गतं केचन विषयाः सन्दर्भाः वा स्थापयितुं शक्यन्ते ।

केचन नेपाल-देशस्य नागराः वार्तालापं कुर्वन्ति स्म यत् तेषां संविधाने अपि संघीय-व्यवस्था भवेत् इति। तेषां चर्चा इत्थम् आसीत् ---

खगराजः – मह्यं सङ्घीय-व्यवस्था न रोचते। अनया भारतवत् अत्रापि आरक्षिताः प्रत्याशिनः भवन्ति।

मीता – अस्माकं देशः तु विशालः नास्ति। अतः सङ्घस्य अत्र का आवश्यकता ?

बाबूलालः – अहम् अनुभवामि यत् यदि तराई इति क्षेत्रस्य स्वस्य पृथक् सर्वकारः भवति तर्हि तत् क्षेत्रम् आधिक्येन स्वतन्त्रं भविष्यति।

रामगणेशः – मह्यं सङ्घीय-व्यवस्थाः रोचन्ते यतो हि अस्याः व्यवस्थायाः अभिप्रायः अयम् अस्ति यत् यासां शक्तीनां प्रयोगं पूर्वं राजा करोति स्म अधुना निर्वाचितः प्रतिनिधिः करिष्यति।

यदि भवन्तः एतादृशे परिचर्चा-कार्यक्रमे भागं स्वीकुर्वन्ति तर्हि प्रत्येकस्मिन् तथ्ये भवतां का प्रतिक्रिया भविष्यति ? चर्चायां कः सङ्घीय-व्यवस्थाम् अभिलक्ष्य अनुचितां टिप्पणीम् अकरोत् ?

भारते सङ्घीय-व्यवस्था

अस्माभिः पूर्वम् अपि दृष्टम् अस्ति यत् बेल्जियमः श्रीलङ्का-सदृशाः च लघुदेशाः अपि स्वीयां विविधतां रक्षयितुं काठिन्यानि अनुभवन्ति। चिन्तयन्तु यत् भारत-सदृशे विशाले देशे इदं कार्यं कियत् कठिनं स्यात् यत्र विविध-भाषा-भाषिणः विविध-धर्मावलम्बिनः विविध-क्षेत्राणां च जनाः निवसन्ति ? अस्माकं देशे सत्तायाः भागधरत्वस्य कीदृशी व्यवस्था अस्ति ?

आयान्तु, संविधानात् एव आरम्भं कुर्मः। एकस्मात् दुःखदात् रक्तरञ्जितात् च विभाजनात् परं भारतं स्वतन्त्रं जातम्। स्वतन्त्रतायाः किञ्चित् कालात् परम् एव नैकानि स्वतन्त्रराज्यानि च भारते विलयं प्राप्तवन्ति। भारतीयेन संविधानेन भारतं राज्यानां सङ्घः अस्ति इति घोषितम्। अत्र सङ्घः इति शब्दः न युक्तः परन्तु भारतीयस्य सङ्घस्य रचना सङ्घीय-शासन-व्यवस्थायाः सिद्धान्तेन अभवत्।

किम् एतत् विचित्रं तथ्यं नास्ति ? किम् अस्माकं संविधानस्य निर्मातारः न जानन्ति स्म यत् सङ्घीय-व्यवस्था का भवति अथवा ते एतस्याः विषये न कथयितुम् इच्छन्ति स्म ?

आयान्तु, अस्माभिः उपरि सङ्घीय-व्यवस्थायाः यासां सप्तानां विशेषतानां वर्णनं कृतम् आसीत् ताः एकदा पुनः पश्यामः। वयं द्रष्टुं शक्नुमः यत् एतानि सर्वाणि तथ्यानि भारतीयस्य संविधानस्य विभिन्नेषु प्रावधानेषु प्रवर्तन्ते। संविधाने मौलिकरूपेण द्वयोः स्तरीय-शासन-व्यवस्थयोः प्रावधानं कृतम् आसीत् – सङ्घ-सर्वकारः (अथवा यं वयं केन्द्रसर्वकारः इति कथयामः) तथा च राज्यसर्वकाराः इति। केन्द्रसर्वकारेण सम्पूर्णस्य भारतीय-सङ्घस्य प्रतिनिधित्वं करणीयम् आसीत्। परवर्तिकाले पञ्चायतानां नगरपालिकानां च रूपेण सङ्घीय-शासन-व्यवस्थायाः किञ्चित् तृतीयं सोपानम् अपि योजितम्। कस्याः अपि सङ्घीय-व्यवस्थायाः इव भारते अपि सोपानत्रय-युक्तानां शासन-व्यवस्थानां स्वीयानि पृथक् पृथक् अधिकार-क्षेत्राणि सन्ति। संविधाने स्पष्टरूपेण केन्द्रस्य राज्य-सर्वकाराणां च मध्ये विधायि-अधिकाराः त्रिषु विभागेषु विभक्ताः सन्ति। एताः तिस्रः सूच्यः इत्थं सन्ति –

- सङ्घसूच्यां प्रतिरक्षायाः वैदेशिक-सन्दर्भस्य कुसीद-प्रणाल्याः सञ्चारस्य मुद्रायाः च राष्ट्रिय-महत्त्वस्य विषयाः सन्ति। सम्पूर्णाय देशाय एतेषु प्रकरणेषु समान-नीतीनाम् आवश्यकता अस्ति। एतस्मात् कारणात् एव एतादृशाः विषयाः सङ्घसूच्यां परिगणिताः सन्ति। सङ्घ-सूच्यां वर्णित-तथ्यानां सन्दर्भे अधिनियम-संरचनस्य अधिकारः केवलं केन्द्रसर्वकारस्य अस्ति।
- राज्य-सूच्याम् आरक्षकाणां वाणिज्यस्य व्यापारस्य कृषेः सेचनस्य च प्रान्तीयस्य स्थानीयस्य च महत्त्वस्य विषयाः सन्ति। राज्यसूच्यां वर्णितानां विषयाणाम् आधारेण केवलं राज्यसर्वकारः एव अधिनियमानां विरचनं कर्तुं शक्नोति।
- समवर्तिसूच्यां शिक्षा-वन-श्रमिक-सङ्घ-विवाह-दत्तकपुत्र-उत्तराधिकार-सदृशाः विषयाः सन्ति ये केन्द्रेण सह राज्यसर्वकाराणाम् अधिकारक्षेत्रे अपि आयान्ति।

एतादृशेषु उपर्युक्तेषु विषयेषु अधिनियम-विरचनस्य अधिकारः राज्य-सर्वकाराणां केन्द्रसर्वकारस्य च एव अस्ति । परन्तु द्वयोः अधिनियमेषु परस्परं सङ्घर्षः विरोधाभासः वा भवेत् तदा केन्द्रसर्वकार-द्वारा प्रकल्पितः अधिनियमः एव मान्यः भवति ।

अत्र एकः प्रश्नः समुदेति यत् ये विषयाः एतासु कासुचित् अपि सूचिषु न समाविशन्ति तेषां किं भवति ? पुनश्च सङ्गणक-साफ्टवेयर-सदृशाः विषयाः कस्य अधिकारक्षेत्रे भवेयुः यतो हि एतादृशाः विषयाः संविधानस्य संरचनायाः परम् समाविष्टाः सन्ति ? अस्माकं संविधानस्य अनुसारं शिष्टाः सर्वे अपि विषयाः केन्द्रसर्वकारस्य अधिकारक्षेत्रे भवन्ति ।

अस्माभिः उपरि दृष्टं यत् समावेशि-सर्वकारे अधिकतरासु महतीसु संघीय-व्यवस्थासु ये लघवः घट्टाः भवन्ति ते समानान् अधिकारान् न प्राप्नुवन्ति । भारतीय-सङ्घस्य सर्वेभ्यः राज्येभ्यः अपि समानाः अधिकाराः न सन्ति । कानिचन राज्यानि विशिष्ट-अधिकारान् प्राप्तवन्ति । भारते जम्मूकाश्मीरम् एकमात्रम् एतादृशं राज्यम् अस्ति यस्य निज-स्वतन्त्रं संविधानम् अस्ति । एतस्मिन् राज्ये विधानसभायाः अनुमतिं विना भारतीय-संविधानस्य नैकानि प्रावधानानि न प्रवर्तयितुं शक्यन्ते । एतस्य राज्यस्य स्थायि-निवासिनः अतिरिच्य कश्चित् अपि भारतीय-नागरः तत्र भूमेः भवनस्य च क्रयणं न कर्तुं शक्नोति । वस्तुतः भारतस्य अन्येभ्यः केभ्यश्चित् प्रदेशेभ्यः अपि एतादृशाः एव केचन विशिष्टाः अधिकाराः दत्ताः सन्ति ।

भारतीय-सङ्घस्य नैकेभ्यः राज्येभ्यः अल्पतमाः अधिकाराः सन्ति एतादृशानि राज्यानि आकारदृष्ट्या स्वतन्त्र-प्रान्तरूपेण न भवितुं शक्नुवन्ति । एतेषां विलयः कस्मिंश्चित् वर्तमानप्रान्ते अपि न शक्यते । चण्डीगढम् अथवा लक्षद्वीपम् अथवा देशस्य राजधानीरूपेण यत् देहलीराज्यम् अस्ति एतादृशाः प्रान्ताः एतस्याम् एव श्रेण्याम् आयान्ति तथा च एते प्रान्ताः केन्द्रशासित-प्रान्ताः अपि उच्यन्ते । एतेभ्यः क्षेत्रेभ्यः राज्यसदृशाः अधिकाराः न सन्ति । एतेषां क्षेत्राणां शासनस्य अधिकारः केन्द्रसर्वकारस्य अस्ति ।

केन्द्रस्य राज्यसर्वकाराणां च मध्ये सत्तायाः एतत् विभाजनम् अस्माकं संविधानस्य आधारभूतः विषयः अस्ति । अधिकाराणाम् एतस्याः विभाजनप्रक्रियायाः परिवर्तनं सरलं नास्ति । एकला संसद् एतस्याः व्यवस्थायाः परिवर्तनं न कर्तुं शक्नोति । तत्र परिवर्तनार्थं सर्वादौ संसदः द्वयोः सदनयोः द्वितीयांशात्मकं बहुमतम् अपेक्षितं भवति । पुनः न्यूनातिन्यूनम् अर्धाधिकराज्यानां विधान-सभाभिः तस्य स्वीकृतिः अपि अपेक्षिता भवति ।

संवैधानिकानां प्रावधानानाम् अधिनियमानां च क्रियान्वयनस्य निरीक्षणे न्यायपालिका महत्त्वपूर्णां भूमिकां निर्वहति । अधिकाराणां विभाजन-सम्बद्धः विवादः यदि जायते तदा तस्य निर्णयः उच्चन्यायालये सर्वोच्चन्यायालये चैव भवति । सर्वकारस्य सञ्चालनाय निजदायित्वानां च निर्वहणाय केन्द्र-राज्य-सर्वकाराणां पार्श्वे राजस्व-संग्रहणस्य संसाधनानां च सङ्ग्रहणस्य अधिकाराः अपि सन्ति ।

यदि कृषिः वाणिज्यं च इति राज्यस्य विषयरूपेण स्तः तर्हि केन्द्रीयः कृषिमन्त्री वाणिज्यमन्त्री च किमर्थं नियोज्येते ?

आकाशवाण्याः माध्यमेन सप्ताहं यावत् राष्ट्रियं क्षेत्रीयं च वार्ता-कार्यक्रमं प्रतिदिनं शृण्वन्तु ।
श्रुत्वा नीतिसम्बद्धानां निर्णय-सम्बद्धानां च वार्त्तानां सूचीं कुर्वन्तु तथा च तासां निम्नलिखितानुसारं श्रेणी कुर्वन्तु –

- केवलं केन्द्रसर्वकार-सम्बद्ध-वार्त्ताः ।
- भवताम् अथवा केनचित् अन्यराज्येन सम्बद्धवार्ताः ।
- केन्द्रस्य राज्यसर्वकारस्य च पारस्परिक-सम्बन्ध-विषयकाः वार्त्ताः ।

- पोखरण इति , यत्र भारतेन निजानि परमाणु-परीक्षणानि विहितानि, राजस्थाने पोखरण इति स्थानम् अस्ति । मन्यन्तां यत् यदि राजस्थान-सर्वकारः केन्द्रसर्वकारस्य परमाणु-कार्यक्रमस्य नीतीनां च विरोधी स्यात् तर्हि किं राजस्थानसर्वकारः केन्द्रसर्वकारस्य परमाणु-परीक्षण-कार्यक्रमस्य विरोधं कर्तुं शक्नोति स्म ?
- मन्यन्तां यत् सिक्किमस्य सर्वकारः प्रदेशविद्यालयेषु नूतनानि पाठ्यपुस्तकानि समावेशयितुम् इच्छति । परन्तु केन्द्रसर्वकाराय नवीनानां पाठ्यपुस्तकानां विषयवस्तु शैली च न रोचते । एतादृश्यां स्थितौ किं सिक्किम-सर्वकाराय नवीनानि पाठ्यपुस्तकानि प्रवर्तयितुं केन्द्रसर्वकारस्य अनुमतेः आवश्यकता अस्ति ?
- मन्यन्तां यत् नक्सल-समस्यायाः समाधानाय याः नीतयः सन्ति तासां नीतीनां विषये आन्ध्रप्रदेशस्य छत्तीसगढस्य ओडिसायाः च मुख्यमन्त्रिणां पृथक् पृथक् विचारः अस्ति । किम् एतस्यां स्थितौ भारतस्य प्रधानमन्त्री हस्तक्षेपं कर्तुं शक्नोति तथा च एतादृशम् आदेशं दातुं शक्नोति यस्य पालनं सर्वे मुख्यमन्त्रिणः कुर्युः ।

सङ्घीय-व्यवस्था कथं प्रवर्तते ?

सङ्घीयव्यवस्थायाः प्रभावि-कार्याय संवैधानिकं प्रावधानम् आवश्यकम् अस्ति परन्तु एतावत् एव पर्याप्तं नास्ति । यदि भारते सङ्घीय-शासन-व्यवस्था प्रभावशालिनी जाता तर्हि तत्र कारणं केवलं संवैधानिकानि प्रावधानानि एव मात्रं न सन्ति । भारते सङ्घीय-व्यवस्थायाः साफल्यस्य श्रेयः अत्रत्यै लोकतान्त्रिक-राजनैतिक-प्रक्रियायै दातव्यं स्यात् इति ।



अस्मासु भारतीयेषु सङ्घवादस्य भावना अस्ति, विविधतां प्रति आदरभावः वर्तते, तथा च पारस्परिकभावं प्रति दृढा इच्छा अस्ति एतस्मात् कारणात् एव देशः सामूहिकादर्शस्य रूपेण आत्मानं स्थापयितुं समर्थः जातः । आयान्तु, केषुचित् प्रमुखविषयेषु अवधानं कुर्मः यैः अवगम्यते यत् एतत् कार्यं कथम् अभवत् ।

भाषाधारेण राज्यसंरचना

भाषायाः आधारेण प्रान्तानां निर्माणम् अस्माकं देशस्य लोकतान्त्रिक-राजनीतेः कृते प्रथमा कठिनपरीक्षा च आसीत् । भारतं 1947 तमे वर्षे लोकतान्त्रिक-प्रक्रियया निजयात्राम् आरब्धवत् । 1947 तमवर्षाद् आरभ्य 2006 तमवर्षं यावत् यदि भवन्तः राजनैतिकं मानचित्रं द्रक्ष्यन्ति तर्हि एतस्मिन् अवधौ जातानि परिवर्तनानि दृष्ट्वा भवन्तः आश्चर्यान्विताः भविष्यन्ति । नैके पुरातनाः प्रान्ताः लुप्ताः जाताः तथा च नैके नवीनाः प्रान्ताः अस्तित्वं प्रति आगताः । नैकेषां प्रान्तानां सीमानः क्षेत्राणि नामानि च अपि परिवर्तितानि ।

नवीनानां राज्यानां निर्माणाय 1950 तमे दशके भारतस्य नैकेषां पुरातन-राज्यानां सीमानः परिवर्तिताः । एतत् कार्यम् एतदर्थं कृतं यत् एकभाषाभाषिणः जनाः एकस्मिन् एव राज्ये वसेयुः इति । ततः परं केषाञ्चित् राज्यानां विरचनं भाषायाः आधारेण न, अपि तु संस्कृतेः भौगोलिक-परिस्थितेः जातेः विभिन्नतायाः च आधारेण विशिष्ट-आदरार्थं च अपि कृतम् इति । एतेषु राज्येषु उत्तराखण्ड-नागालैण्ड-झारखण्ड-सदृशानि च राज्यानि सम्मिलितानि सन्ति ।

यदा कस्याश्चित् भाषायाः आधारेण राज्यानां रचनसम्बद्धा चर्चा आरब्धा तदा केचन राष्ट्रियनेतारः अपि भयभीताः आसन् यत् एतस्मात् क्वचित् देशस्य एव विदारणं खण्डनं वा न भवेत् इति । अस्माकम् अनुभवः अस्ति यत् भाषाधारेण राज्यरचनेन देशः आधिक्येन ऐक्यं दृढतां च उपगतः इति । एतस्मात् प्रशासनम् अपि पूर्वापेक्षया अधिकं सौविध्यपूर्णं सञ्जातम् इति ।

- *किं भवतां ग्रामः अथवा नगरं स्वतन्त्रतायाः प्राप्तेः अनन्तरम् एकस्य एव प्रान्तस्य अन्तर्गतम् अस्ति ? यदि एवं नास्ति तर्हि एतस्मात् पूर्वतनस्य राज्यस्य किं नाम आसीत् ?*
- *किं भवन्तः 1947 तमवर्षस्य त्रयाणां राज्यानां नामानि स्मर्तुं शक्नुवन्ति यानि अद्य परिवर्तितानि सन्ति ?*
- *त्रीणि एतादृशानि राज्यानि परिचिन्वन्तु यानि महतां राज्यानां विभाजनं कृत्वा निर्मितानि सन्ति ।*

भाषा-नीतिः

भारतस्य सङ्घीयसंरचनायाः अपरा परीक्षा भाषा-नीतिम् अधिकृत्य जाता । अस्माकं संविधाने कस्यै अपि एकस्यै भाषायै राष्ट्रभाषायाः स्थानं न दत्तम् । हिन्दी राजभाषारूपेण मता परन्तु हिन्दी केवलं चत्वारिंशत् प्रतिशतं भारतीयानां मातृभाषा अस्ति अतः अन्यभाषाः संरक्षयितुं नैके अन्ये उपायाः कृताः । संविधाने हिन्दीभाषाम् अतिरिच्य अन्याः 21 भाषाः अनुसूचित-भाषा मताः । केन्द्रसर्वकारस्य कस्यापि पदस्य प्रत्याशी एतासु कया अपि भाषया परीक्षां लेखितुं शक्नोति परन्तु प्रत्याशी विकल्परूपेण तस्याः भाषायाः चयनं कुर्यात् । राज्यानाम् अपि स्वीयाः राजभाषाः सन्ति । राज्यसर्वकाराणाम् अधिकांशकार्यं स्थानीयभाषया एव भवति ।

हिन्द्याः एव किमर्थम् ? बाङ्ग्लायाः तेलगुभाषायाः च किमर्थं प्रयोगं न कुर्याम ?

श्रीलङ्कायाः विपरीतम् अस्माकं देशस्य राजनेतारः हिन्द्याः उपयोगस्य वर्धनस्य विषये सावधानाः आसन् । संविधानस्य अनुसारं सर्वकारीय-कार्यस्य भाषायाः रूपेण आङ्ग्ल-भाषायाः प्रयोगः 1965 तमे वर्षे निषेद्धव्यः आसीत् । परन्तु नैकेषाम् अहिन्दीभाषि-प्रदेशानां जनानां कथनम् आसीत् यत् ते हिन्दीभाषां समुचितरूपेण न जानन्ति अतः आङ्ग्लप्रयोगे प्रतिबन्धः न स्यात् इति । तमिलनाडुराज्ये तु जनाः भाषासम्भाषणे प्रयोगे च स्वतन्त्रता स्यात् इति विषयम् अधिकृत्य आन्दोलनम् अपि अकुर्वन् तस्य आन्दोलनस्य उग्ररूपम् अपि जातम् । केन्द्रसर्वकारेण राजकीय-कार्येषु हिन्दीभाषया सह आङ्ग्लस्य प्रयोगाय अपि अनुमतिः प्रदत्ता तस्मात् विवादः शान्तः जातः इति । नैकेषां जनानां मतम् आसीत् यत् एतादृशेन समाधानेन आङ्ग्लभाषि-जनाः लाभान्विताः भविष्यन्ति इति । राजभाषायाः रूपेण हिन्दीभाषायाः वर्धनं विस्तारः च भवेत् इति भारतसर्वकारस्य काचित् नीतिः एतदर्थम् अस्ति परन्तु एतस्य एषः अभिप्रायः नास्ति यत् केन्द्रसर्वकारः तेषु राज्येषु अपि अनिवार्यतया हिन्दीभाषां नियोजयेत् यत्र अधिकतराः जनाः प्रादेशिकभाषायाः प्रयोगं सर्वत्र कुर्वन्ति । भारतीयराजनेतारः भाषाविषये दृढतया अथवा दुराग्रहपूर्वकं व्यवहारं न कृतवन्तः तस्मात् कारणात् एव अस्माकं स्थितिः श्रीलङ्कावत् न जाता ।

केन्द्र-राज्य-सम्बन्धः

केन्द्रस्य राज्यस्य च परस्परं सम्बन्धेषु नैरन्तर्येण जातस्य परिवर्तनस्य उदाहरणं ज्ञापयति यत् व्यवहारिक-रूपेण संघवादः कथं दृढः जातः । सत्तायाः सहभागितायाः संवैधानिकी व्यवस्था वास्तविकतायां कीदृशं रूपं ग्रहीष्यति एतत् आधिक्येन एतस्मिन् तथ्ये आश्रयति यत् शासक-दलानि नेतारः च कथम् एतादृश्याः व्यवस्थायाः अनुसरणं कुर्वन्ति । चिरकालं यावत् भारतदेशे केन्द्रे अधिकतरेषु राज्येषु च एकस्य एव दलस्य शासनम् आसीत् । एतस्य व्यवहारिकः अभिप्रायः अयम् अस्ति यत् राज्यसर्वकाराः स्वतन्त्र-सङ्घीय-संस्थायाः रूपेण निजाधिकाराणां प्रयोगं न अकुर्वन् । यदा केन्द्रे राज्येषु च पृथक् पृथक् दलानां सर्वकाराः आसन् तदा केन्द्रसर्वकारेण राज्य-सर्वकाराणाम् अधिकाराणाम् अवहेलनस्य प्रयासः कृतः । तेषु दिनेषु केन्द्रसर्वकारः प्रायः संवैधानिक-प्रावधानानां दुरुपयोगं कृत्वा विपक्षि-दलानां राज्यसर्वकाराणां स्थगनं करोति स्म । इदं सङ्घवादस्य भावनायाः प्रतिकूलं कार्यम् आसीत ।

1990 तमवर्षात् परम् इयं स्थितिः महता प्रमाणेन परिवर्तिता । एतस्मिन् अवधौ देशस्य नैकेषु राज्येषु क्षेत्रीय-दलानाम् उदयः जातः । एतस्मिन् एव अवधौ केन्द्रे अपि घटबन्धन-सर्वकारस्य आरम्भः जातः । यतो हि किमपि दलं लोकसभा-निर्वाचन-प्रक्रियायां स्पष्ट-बहुमतं न प्राप्नोत् अतः बाध्यतावशात् प्रमुखैः राष्ट्रियदलैः क्षेत्रीयदलैः च मिलित्वा घटबन्धन-सर्वकारः रचितः । अनेन सत्तायां सहभागितायाः राज्यसर्वकाराणां च स्वतन्त्रतायाः सम्मानस्य काचित् नवीना संस्कृतिः प्रादुर्भूता । सर्वोच्च-न्यायालयस्य केनचित् निर्णयेन अपि अत्र साहाय्यं कृतम् । एतस्य निर्णयस्य अनुसारं केन्द्रसर्वकारः स्वेच्छया राज्य-सर्वकारस्य निरस्तीकरणं न कर्तुं शक्नोति स्म अर्थात् निरस्तीकरणं कठिनं जातम् । अनेन प्रकारेण अद्य सङ्घीय-व्यवस्थायाः अन्तर्गतं सत्तायाः सहभागिता संविधानस्य क्रियान्वयनात् परं यथा आसीत् तदपेक्षया अधिका प्रभाववती अस्ति ।

कथनं रहस्योद्घाटनम्

घटबन्धन-सर्वकारः – एकाधिकैः राजनैतिक-दलैः सह एव मिलित्वा रचितः सर्वकारः घटबन्धन-सर्वकारः इति उच्यते । सामान्यतः घटबन्धन-सर्वकारे सम्मिलितानि दलानि राजनैतिक-घटबन्धनं कुर्वन्ति तथा च कञ्चित् सामूहिक-कार्यक्रमं स्वीकुर्वन्ति ।

राज्यसर्वकाराः इतोऽपि शक्तीः अधिकारान् च याचन्ते -----

कुट्टी-लाफिंग विद् कुट्टी

संयुक्त-सर्वकारस्य आसन्दः

अजित नीनन- इण्डिया टुडे बुक ऑव कार्टून्स इति

अत्र चित्रितैः व्यङ्ग्यचित्रैः केन्द्र-सर्वकारस्य राज्य-सर्वकाराणां च मध्यस्थः सम्बन्धः दर्शितः अस्ति। किं राज्यसर्वकारैः केन्द्रसर्वकारः प्रार्थनीयः यत् तेभ्यः केचन अन्ये अपि अधिकाराः भवेयुः ? कस्यापि संयुक्त-सर्वकारस्य नेता सर्वकारेण सम्मिलितानि अन्यदलानि कथं सन्तोषयेत् ?

भवन्तः एतत् कथयन्ति यत् क्षेत्रवादभावना लोकतन्त्राय लाभकारिणी अस्ति ? किं भवन्तः गाभीर्येण इत्थं कथयन्ति ?

भारतस्य भाषायी-विविधता

भारते कति भाषाः सन्ति ? एतस्य प्रश्नस्य उत्तरः गणनाकर्तुः अनुसारं भवति यत् सः भाषाणां गणनां कथं करोति इति । एतस्मिन् विषये अधिकृता नवीनतमा सूचना 2001 तमवर्षस्य जनगणनायाः अङ्कैः प्राप्यते । अनया जनगणनायाः अनुसारं (1500) पञ्चदशशताधिकाः पृथक् पृथक् भाषाः निजमातृ-भाषाणां रूपेण जनाः अङ्कितवन्तः आसन् । एताः भाषाः काभिश्चित् प्रमुखभाषाभिः सह समूहबद्धाः क्रियन्ते । यथा – भोजपुरी, मगही, बुन्देलखण्डी,छत्तीसगढी, राजस्थानी, भीली, इत्येताः । एतादृश्यः अन्याः भाषाः अपि हिन्दीभाषया सह सम्बद्धाः क्रियन्ते । एतादृशस्य समूहीकरणस्य अनन्तरम् अपि जनगणनायां 114 प्रमुखभाषाः प्राप्ताः । एतासु द्वाविंशतिः भाषाः (22) भारतीय-संविधानस्य अष्टम्याम् अनुसूच्यां स्थापिताः तथा च एतस्मात् कारणात् एव एताः अनुसूचितभाषाः इति कथ्यन्ते । भाषायाः दृष्ट्या भारतं विश्वस्य सम्भवतः सर्वाधिक-विविधता-सम्पन्नः देशः अस्ति ।

अत्रप्रदत्तांभाषासूचींदृष्ट्वास्पष्टीभवतियत्काचित्एका भाषा बहुसङ्ख्यकानां भारतीयानां मातृभाषा नास्ति । व्यापकप्रमाणेन या हिन्दीभाषा प्रयुज्यते सा अपि केवलं 41 प्रतिशतं जनानाम् एव मातृभाषारूपेण अस्ति । द्वितीय-स्थानीयाः तृतीयस्थानीयाः च ये हिन्दीभाषा-भाषिणः जनाः सन्ति इति मत्वा तेषां सङ्ख्याम् अपि योजयामः चेत् 2001 तमवर्षे जातायाः जनगणनायाः अनुसारं पञ्चाशत् प्रतिशतात् अपि न्यूनाः एव जनाः हिन्दीभाषा-भाषिणः आसन् । गणनायाः अनुसारं 0.20 प्रतिशतं जनानां मातृभाषा आङ्ग्लम् आसीत् । द्वितीयायाः तृतीयायाः च भाषायाः रूपेण (11) एकादशप्रतिशतं जनाः एव आङ्ग्लभाषां जानन्ति स्म ।

एतां सूचीं सावधानं पश्यन्तु परन्तु एतस्याः स्मरणस्य आवश्यकता नास्ति,केवलम् एतानि कार्याणि कुर्वन्तु –

- एतस्याः सूचनायाः आधारेण तालिकां रचयन्तु ।
- एतादृशं मानचित्रं रचयन्तु यत् भारतस्य भाषिक-विविधतां दर्शयेत् । मानचित्रे विभिन्न-क्षेत्राणि पृथक् पृथक् वर्णैः पूरयन्तु तथा च दर्शयन्तु यत् तेषां क्षेत्राणां जनाः कया भाषया भाषन्ते ।
- एतादृशीः तिस्रः भाषाः अन्वेषयन्तु यासां प्रयोगं भारतीयाः कुर्वन्ति परन्तु एतस्यां सूच्यां ताः न सन्ति ।

भारतस्य भाषाः याः सूच्यां न सन्ति

भाषाः	भाषा-भाषिणाम् अनुपातः (%)
असमिया	1.28
बाङ्ला	8.11
बोडो	0.13
डोगरी	0.22
गुजराती	4.48
हिन्दी	41.03
कन्नडः	3.69
कश्मीरी	0.54
कोङ्कणी	0.24
मैथिली	1.18
मलयालमः	3.21
मणिपुरी	0.14
मराठी	6.99
नेपाली	0.28
ओडिया	3.21
पंजाबी	2.83
संस्कृतम्	नगण्यम्
सन्थाली	0.63
सिन्धी	0.25
तमिलः	5.91
तेलुगुः	7.19
उर्दूः	5.1

एतस्याः तालिकायाः प्रथमे कोष्ठके भारतीय-संविधानस्य अष्टम-अनुसूच्याम् अङ्किताः भाषाः लिखिताः । द्वितीये कोष्ठके कियन्तः प्रतिशतं भारतीयाः तया भाषया भाषणं कुर्वन्ति इति अनुपातः दर्शितः अस्ति । एते उपर्युक्ताः अङ्काः 2001 तमवर्षस्य जनगणनायाः अनुसारं सन्ति ।

2001 तमे वर्षे या जनगणना जाता तस्यां प्रत्येकं भाषा-भाषिक्षेत्रस्य प्रतिशतम् अङ्कितम् अस्ति परन्तु मणिपुर-राज्यस्य सेनापति-जनपदस्य मो-मरामः, पोओमाता,पुरुल इति अनुमण्डलानि अत्र न परिगणितानि सन्ति ।

स्रोतः - http://www.censusindia.gov.in/census_Data_2001/census_data_online/language/statement4.htm

प्रसिद्धस्य इतिहासकारस्य रामचन्द्रगुहा इत्यस्य आलेखात् उद्धृतानि निम्नलिखितानि उद्धरणानि पठन्तु। अयम् आलेखः "टाइम्स ऑफ इण्डिया " इत्यस्मिन् 2006 तमे वर्षे नवम्बरमासे प्रथमदिनाङ्के च प्रकाशितः आसीत् –

राज्य-पुनःसंरचना-आयोगस्य समाख्या वर्तमानकालात् पञ्चाशत् वर्षेभ्यः पूर्वं 1956 तमवर्षस्य नवम्बरमासस्य प्रथमदिनाङ्के प्रवर्तिता आसीत्। अनया समाख्यया राष्ट्रस्य राजनैतिकं संस्थागतं च जीवनं सर्वथा परिवर्तितम् आसीत् ---- गान्धिना अन्यनेतृभिः च निजानुयायिनां समक्षे प्रतिज्ञा स्वीकृता आसीत् यत् यदा भारतदेशः स्वतन्त्रः भविष्यति तदा एतस्मिन् नवीने देशे नवीनाः प्रान्ताः भविष्यन्ति तथा च भाषायाः आधारेण प्रान्तानां पुनः रचना भविष्यति। परन्तु यदा देशः स्वतन्त्रः जातः तदा एतस्य विभाजनम् अपि अभवत् ----

धर्मे या जनानां सनातनी श्रद्धा आस्था च आसीत्, सा अपि विभाजने कारणरूपा आसीत्। भाषा अपि तथैव अस्ति अतः एतस्याः आधारेण अधुना कियन्ती विभाजनानि भविष्यन्ति ? नेहरोः पटेलस्य राजाजी इत्यस्य च मनसि अयं प्रश्नः विद्यमानः आसीत्।

वस्तुतः, भाषायाः आधारेण येषां नवीनानां राज्यानां रचना जाता तस्मात् भारतस्य ऐक्यं न कृशतां गतम् अपितु दृढं जातम् इति। कश्चित् एकः जनः कन्नड-प्रान्तीयः भारतीयः च, अथवा बङ्गीयः भारतीयः च अथवा भारतीयः तमिल-वासी च , अथवा भारतीयः गुर्जर-वासी च , इति द्विविध-परिचय-युक्तः सारल्येन भवति।

एषः विवादः सुखदः तु नास्ति परन्तु आधिक्येन असमीचीनः अस्ति इत्यपि न वक्तुं शक्यते।

भाषाणाम् आधारेण भारते राज्यानां रचना जाता तेन भयानक-स्थितेः भारतस्य रक्षणम् अभवत्। यदि तेलुगु-मराठी-भाषिणां भावनानुसारं रचनं न अभविष्यत् तर्हि भारतस्य स्थितिः एवम् अभविष्यत् यत् एका भाषा, चतुर्दश पञ्चदश वा राष्ट्राणि इति।

स्वीयं राज्यम् अथवा एतादृशं किञ्चित् एतादृशं राज्यम् उदाहरणरूपेण स्वीकुर्वन्तु यत् भाषायाः आधारेण पुनः रचनया प्रभावितम्। अत्र यः तर्कः समुपस्थापितः अस्ति तस्य समर्थने अथवा विरोधे उदाहरणैः सह टिप्पणीं कुर्वन्तु।

भारते विकेन्द्रीकरणम्

अस्तु ! तर्हि, अत्र रेलयानस्य तृतीयायाः श्रेण्याः इव व्यवस्था अस्ति ! मह्यं तु अधस्तनम् आसनम् एव रोचते।

अस्माभिः कदाचित् पठितम् अस्ति यत् सङ्घीय-सर्वकाराणां सोपानद्वयम् अथवा तस्मात् अपि अधिकानि सोपानानि भवन्ति। अस्माभिः भारते एतादृशः सर्वकारः दृष्टः अस्ति यस्य द्वे सोपाने स्तः परन्तु भारतसदृशे विशाले देशे केवलं द्विस्तरीयया शासन-व्यवस्थया एव समुचितं शासनं न सञ्चालयितुं शक्यते। भारतस्य प्रान्ताः यूरोपस्य स्वतन्त्र-देशेभ्यः अपि महान्तः सन्ति। जनसङ्ख्या-दृष्ट्या उत्तरप्रदेशः रूसदेशात् अपि विशालः अस्ति। महाराष्ट्रं प्रायः जर्मनीदेशस्य समानम् अस्ति। भारतस्य नैकानि राज्यानि स्वयम् अपि आन्तरिकरूपेण विविधताभिः पूर्णानि सन्ति। अनेन प्रकारेण एतेषु राज्येषु अपि सत्तायाः विभाजनस्य आवश्यकता अस्ति। भारते सङ्घीय-सत्तायाः सहभागिता स्तरत्रयेण करणस्य आवश्यकता अस्ति यत्र तृतीयं स्तरं स्थानीय-सर्वकाराणां भवेत् तथा च इदं प्रान्तीय-सर्वकारस्य अधः स्यात् इति। भारते सत्तायाः विकेन्द्रीकरणस्य विषये अयमेव तर्कः उपस्थापितः। परिणामतः त्रिस्तरीयस्य सर्वकारस्य सङ्घीयं संरचनं जातं यत्र तृतीय-स्तरः एव स्थानीय-शासनम् इति उच्यते।

यदा केन्द्रतः राज्यसर्वकारात् च अधिकाराः स्वीकृत्य स्थानीयसर्वकारेभ्यः दीयन्ते तदा एतत् एव सत्तायाः विकेन्द्रीकरणम् इति उच्यते। विकेन्द्रीकरणस्य मूले आधारभूतं चिन्तनम् इदम् एव अस्ति यत् नैकासां समस्यानां समाधानं स्थानीयस्तरे एव समुचित-प्रकारेण कर्तुं शक्यते। जनाः स्वीय-क्षेत्रीय-समस्यानां विषये समुचितरूपेण जानन्ति। जनाः एतस्मिन् विषये अपि जानन्ति यत् धनस्य व्ययः नियोगः वा कुत्र स्यात् इति तथा च संसाधनानां समुचितः उपयोगः अधिक-कुशलतया कुत्र कर्तुं शक्यते। एतदतिरिच्य स्थानीयस्तरे जनाः निर्णयेषु प्रत्यक्षतः सहभागिनः कर्तुं शक्यन्ते। अनेन लोकतान्त्रिक-सहभागितायाः प्रवृत्तिः अपि जनेषु वर्धते। स्थानीय-सर्वकाराणां स्थापनं स्व-शासनस्य लोकतान्त्रिक-सिद्धान्तानां यथार्थी-करणाय श्रेष्ठः उपायः अस्ति।

विकेन्द्रीकरणस्य आवश्यकता अस्माकं संविधाने अपि स्वीकृता अस्ति। ततः परं ग्रामस्य नगरस्य च स्तरे सत्तायाः विकेन्द्रीकरणस्य नैके प्रयासाः जाताः। सर्वेषु राज्येषु ग्रामीणस्तरे ग्राम-पञ्चायत्तानां नगरेषु च नगरपालिका-संस्थानां स्थापना कृता। परन्तु एताः सर्वाः संस्थाः प्रत्यक्षतः राज्यसर्वकाराणां नियन्त्रणे स्थापिताः। एतासां स्थानीय-संस्थानां कृते नियमितरूपेण निर्वाचन-प्रक्रिया अपि न आश्रीयते स्म। एतादृशीनां संस्थानां पार्श्वे न तु वैयक्तिकाः अधिकाराः आसन् न च एव संसाधनम् इति। अनेन प्रकारेण प्रभाविरूपेण सत्तायाः विकेन्द्रीकरणं स्वल्प-प्रमाणेन एव जातम् आसीत्।

वास्तविक-विकेन्द्रीकरणस्य दिशि महत् कार्यं 1992 तमवर्षे कृतम्। संविधाने संशोधनं कृत्वा लोक-तान्त्रिक-शासन-व्यवस्थायाः अयं तृतीयः स्तरः अधिकः प्रभावी शक्तिशाली च कृतः।

- सम्प्रति स्वशासि-निकायानां निर्वाचनं नियमितरूपेण संवैधानिकी बाध्यता अस्ति।
- निर्वाचितानां स्वशासि-निकायानां सदस्यानां पदाधिकारिणां च पदेषु अनुसूचित-जातीयानाम् अनुसूचित-जनजातीयानां पश्चवर्ति-जातीयानां च कृते स्थानानि आरक्षितानि सन्ति।
- न्यूनातिन्यूनं तृतीयांशत्मकानि पदानि महिलानां कृते आरक्षितानि सन्ति।
- प्रत्येकस्मिन् राज्ये पञ्चायत्तस्य नगरपालिकायाः च निर्वाचनाय राज्य-निर्वाचन-आयोग-नाम्न्याः स्वतन्त्र-संस्थायाः रचनं कृतम् अस्ति।
- राज्यसर्वकारैः निज-राजस्वस्य अधिकाराणां च कश्चन भागः एतेभ्यः स्थानीय-स्वशासि-निकायेभ्यः दातव्यः भवति। सत्तायां सहभागितायाः प्रकृतिः प्रत्येकस्मिन् राज्ये पृथक् पृथक् अस्ति।

ग्राम-स्तरे विद्यमाना स्थानीय-शासन-व्यवस्था पञ्चायत्तीराज इति नाम्ना अभिज्ञायते। प्रत्येकस्मिन् ग्रामे कश्चित् ग्रामपञ्चायत्तः भवति।

इयं काचित् परिषद् अस्ति यस्याः नैके सदस्याः एकः च अध्यक्षः भवति । सदस्याः विभागेषु चीयन्ते ते सामान्यतः पञ्च इति कथ्यन्ते । अध्यक्षः प्रधानः इति पदेन अथवा सरपञ्च इति उच्यते । एतेषाम् उपर्युक्तानां पदाधिकारिणां चयनं विभागस्य निवासिनः वयस्काः जनाः मतदानस्य माध्यमेन कुर्वन्ति । पञ्चायत्त-संस्था सम्पूर्णानां पञ्चायत्तस्थानां जनानां विषये निर्णयान् स्वीकरोति । पञ्चायत्त-संस्थायाः कार्यं ग्रामसभायाः सहयोगेन चलति । ग्रामस्य सर्वे मतदातारः एतस्याः सदस्याः भवन्ति । ग्रामसभया वर्षे द्वित्रिवारम् उपवेशनस्य अथवा गोष्ठ्याः वा आयोजनं करणीयं भवति गोष्ठीनां माध्यमेन ग्रामपञ्चायत्त-संस्थायाः व्ययविवरणस्य कृतकार्याणां च समीक्षणं क्रियते ।

स्थानीय–शासनस्य प्रारूपं जनपद-स्तरीयम् अस्ति । नैकासां ग्रामपञ्चायत्त-संस्थानां संयोजनं कृत्वा पञ्चायत्त-समितेः रचनं भवति । एतत् मण्डलस्तरीयम् अथवा प्रखण्डस्तरीयं पञ्चायत्तम् अपि वक्तुं शक्नुमः । पञ्चायत-समितेः सदस्यानां चयनं तस्य क्षेत्रस्य सर्वे पञ्चायत्त-सदस्याः कुर्वन्ति । कस्यचित् जनपदस्य सर्वासां पञ्चायत्त-समितीनां संयोजनं कृत्वा जनपद-परिषदः रचनं भवति । जनपद-परिषदः अधिकतराणां सदस्यानां निर्वाचनं भवति । जनपद-परिषदि तस्मात् जनपदात् लोकसभायै विधानसभायै च अपि सांसदाः विधायकाः तथा च जनपदस्तरीय-संस्थानां च केचन अधिकारिणः अपि सदस्यरूपेण भवन्ति । जनपद-परिषदः प्रमुखः एतस्याः परिषदः राजनैतिक-प्रधानः भवति ।

अनेन प्रकारेण स्थानीय-शासन-युक्ताः संस्थाः नगरेषु अपि कार्यं कुर्वन्ति । नगरेषु नगरपालिका इति संस्था भवति । महत्सु नगरेषु नगर-निगमस्य रचनं भवति । नगर-पालिकायाः नगर-निगमस्य च इति द्वयोः कार्यं निर्वाचित-प्रतिनिधयः कुर्वन्ति । नगरपालिका-प्रमुखः नगरपालिकायाः राजनैतिक-प्रधानः भवति । नगरपालिकायाः एतादृशः पदाधिकारी महापौरः (मेयर) इति उच्यते ।

स्थानीय-सर्वकाराणां इयं नवीना व्यवस्था विश्वे लोकतन्त्रस्य अद्यावधिः सर्वोच्च-प्रयोगः अस्ति ।

प्रधानमन्त्री देशं सञ्चालयति । मुख्यमन्त्रिणः राज्यशासन-व्यवस्थां पश्यन्ति । एवमेव जनपद-परिषदः प्रधानेन जनपदस्य शासनस्य करणीयम् । पुनः, जनपदानां शासनं जनपदायुक्ताः अथवा जनपदाधीशाः किमर्थं कुर्वन्ति ?

ते जातानां विकेन्द्रीकरणस्य प्रयासानां विषये वार्त्तापत्रस्य कर्तितपृष्ठेषु किम् उक्तम् अस्ति ?

ब्राजीलद्वारा कृतः कश्चित् प्रयोगः

ब्राजीलस्य पोर्तो-एलग्रे इत्यस्य नगरस्य जनाः विकेन्द्रीकरणस्य नागराणां च सक्रिय-सहभागिता-युक्तस्य लोकतन्त्रस्य मेलस्य कञ्चन विलक्षणं प्रयोगम् अकुर्वन्। एतस्य नगरस्य नगर-परिषदः नातिदूरे किञ्चन सङ्घटनं कृतं तथा च निज-नगरस्य विषये यथार्थस्य निर्णयस्य अधिकारः स्थानीय-निवासिभ्यः दत्तः। एतस्य नगरस्य प्रायः त्रयोदश-लक्षं जनाः स्वीयनगरस्य आय-व्यय-विवरण-पत्रस्य सज्जीकरणे साहाय्यं कुर्वन्ति, यानि वयं वार्ड् इति उपविभाग-रूपेण कथयामः। तथैव तत्रत्याः जनाः नगरम् उपक्षेत्रेषु विभाजितवन्तः सन्ति। प्रत्येकम् उपक्षेत्रस्य पृथक् पृथक् सम्मेलन-कार्यक्रमः भवति यथा भारते ग्रामसभा भवति तद्वदेव सः कार्यक्रमः भवति कार्यक्रमे तस्य क्षेत्रस्य सर्वे नागराः भागं स्वीकर्तुं शक्नुवन्ति। पुनः, केचन सम्मेलन-कार्यक्रमाः तान् विषयान् अधिकृत्य भवन्ति यैः सम्पूर्णं नगरं प्रभावितं भवति। एतस्मिन् कार्यक्रमे कश्चन अपि नागरः भागं ग्रहीतुं शक्नोति। कार्यक्रमे नगरस्य व्यय-विवरणपत्रे चर्चा भवति। ततः परं चर्चित-प्रस्तावाः नगरपालिकायाः समक्षं प्रस्तूयन्ते सा एव अन्तिमरूपेण निर्णयति।

निर्णय-ग्रहणस्य अस्मिन् कार्यक्रमे प्रतिवर्षं विंशतिसहस्रं जनाः भागं गृह्णन्ति। सर्वेषां नागराणां समक्षे निर्णयाः योजनाः वा प्रस्तुताः भवन्ति तस्मात् सुनिश्चितं भवति यत् धनस्य व्ययः केवलं धनाढ्यानां जनानां वसतिषु एव न करिष्यते अपितु समानरूपेण सर्वेषां नागराणां कृते करिष्यते। अधुना प्रत्येकं निर्धन-वसतिं यावत् अपि बसयानानां सौविध्यम् अस्ति पुनर्वासस्य व्यवस्थां विना निर्धनानां पर्णकुटीरान् भवन-निर्मातारः न उत्पाटयितुं शक्नुवन्ति।

भारते अपि केरलस्य केषुचित् क्षेत्रेषु एतादृशाः प्रयोगाः कृताः सन्ति। तत्र सामान्यजनाः अपि स्वीयानां वसतीनां विकासाय योजनायाः सज्जीकरणे साहाय्यं कृतवन्तः।

नगरपालिकानां ग्रामपञ्चायत-संस्थानां च कृते उपषट्त्रिंशत्-लक्षं जनानां निर्वाचनं भवति। इयं सङ्ख्या एव विश्वस्य नैकदेशानां जनसङ्ख्यातः अपि अधिका अस्ति। भारते स्थानीय-सर्वकाराः (संस्थाः) संवैधानिक-संस्थाः सन्ति इति कारणात् लोकतन्त्रव्यवस्था दृढा जाता। लोकतन्त्रे महिलाः अपि प्रतिनिधित्वं कुर्वन्ति तस्मात् ताः सशक्ताः जाताः। वस्तुतः, एवम्भूते सति अपि नैकाः समस्याः अधुना अपि विद्यमानाः सन्ति। पञ्चायत-संस्थानां निर्वाचनानि तु नियमितरूपेण भवन्ति तत्र च जनाः सोत्साहं भागम् अपि आवहन्ति परन्तु ग्रामसभानां सम्मिलनकार्यक्रमाः नियमितरूपेण न भवन्ति। अधिकतराः राज्यसर्वकाराः स्थानीयसंस्थाभ्यः पर्याप्त-अधिकारान् न दत्तवन्तः। अनेन प्रकारेण वयं स्वशासनस्य आदर्शस्थितेः अधुना अपि बहुदूरे स्मः।

निजग्रामस्य नगरस्य वा स्थानीयसर्वकारस्य विषये जानन्तु।

यदि भवन्तः ग्रामे निवसन्ति तर्हि निम्नलिखितानां नामानि जानन्तु – स्वीयस्य पञ्चस्य सरपञ्चस्य पञ्चायतसमितेः सदस्यानां जनपदपरिषदः अध्यक्षस्य च। इदम् अपि जानन्तु यत् ग्रामसभायाः गतसम्मेलन-कार्यक्रमः कदा अभवत् तथा च कार्यक्रमे कति जनाः भागं गृहीतवन्तः।

यदि भवन्तः नगरे निवसन्ति तर्हि निम्नलिखितस्य नामानि जानन्तु – भवतां परामर्शदातुः, नगरनिगम-प्रमुखस्य अथवा नगरपालिकायाः प्रमुखस्य। स्व-नगरपालिकायाः अथवा नगर-निगमस्य व्ययविवरण-पत्रस्य जायमानस्य व्ययस्य च अपि सूचनां प्राप्नुवन्तु।

1. भारतस्य रिक्ते राजनैतिके मानचित्रे मणिपुरस्य सिक्किमस्य छत्तीसगढस्य गोवायाः इत्येतेषां राज्यानाम् उपस्थितिम् अङ्कयन्तु ।

2. विश्वस्य रिक्ते मानचित्रे भारतम् अतिरिच्य सङ्घीय-शासनवतां त्रयाणां देशानाम् अवस्थितिं ज्ञापयन्तु तथा च तेषां मानचित्रं वर्णैः पूरयन्तु।

3. भारतस्य सङ्घीय-व्यवस्थायां बेल्जियम-सदृशाम् एकां विशेषतां ततः च पृथक् एकां विशेषतां ज्ञापयन्तु।

4. शासनस्य सङ्घीयस्य एकात्मक-स्वरूपेषु काः काः मुख्य-विशेषताः सन्ति ? एतां विशेषताम् उदाहरणानां माध्यमेन स्पष्टीकुर्वन्तु।

5. 1992 तमात् संविधान-संशोधनात् पूर्वस्य अनन्तरस्य च स्थानीय-शासनस्य महत्त्वपूर्णं विभिन्नताद्वयं ज्ञापयन्तु।

6. रिक्त-स्थानानि पूरयन्तु –

   यतो हि अमेरिका ---- इव सङ्घः अस्ति इतः तत्रत्याभ्यः सर्वाभ्यः संस्थाभ्यः समानाः अधिकाराः सन्ति। सङ्घीय-सर्वकारस्य अपेक्षया प्रान्त----------सन्ति। परन्तु भारतस्य सङ्घीय-प्रणाली ---- अस्ति तथा च अत्रत्यानां केषाञ्चित् राज्यानां पार्श्वे अन्येषाम् अपेक्षया अधिकाः अधिकाराः सन्ति।

7. भारतस्य भाषानीतेः विषये अधः तिस्रः प्रतिक्रियाः प्रदत्ताः सन्ति। एतासु याः भवन्तः समीचीनाः इति अनुभवन्ति तासां पक्षे तर्कम् उदाहरणं च उपस्थापयन्तु।

   संगीता – प्रमुखभाषाणां सम्मेलनस्य या नीतिः अस्ति तया राष्ट्रियम् ऐक्यं दृढं कृतम् अस्ति।
   अरमानः – भाषायाः आधारेण राज्यानां यत् रचनं जातं तेन वयं विभाजिताः। वयम् एतेन कारणेन एव निजभाषां प्रति जागरूकाः जाताः।

8. सङ्घीय-सर्वकारस्य काचित् विशेषता अस्ति –

   (क) राष्ट्रिय-सर्वकारः स्वीयान् काञ्चन् अधिकारान् प्रान्तीयसर्वकारेभ्यः यच्छति।
   (ख) अधिकाराः विधायिकायाः कार्य-पालिकायाः न्याय-पालिकायाः च मध्ये विभक्ताः भवन्ति।
   (ग) निर्वाचिताः पदाधिकारिणः एव सर्वकारे सर्वोच्चशक्तेः उपयोगं कुर्वन्ति।
   (घ) सर्वकारस्य शक्तिः शासनस्य विभिन्नस्तराणां मध्ये विभक्ता भवति।

9. भारतीय-संविधानस्य विभिन्नासु सूचीसु अङ्किताः केचन विषयाः अत्र प्रदत्ताः सन्ति। एतान् विषयान् तालिकायां विद्यामानायां सङ्घीयसूच्यां राज्यसूच्यां समवर्ति-सूचीयुक्तेषु समूहेषु च लिखन्तु।

   (क) रक्षा (ख) आरक्षकाः, (ग) कृषिः, (घ) शिक्षा, (ङ) कुसीदव्यवस्था, (च) वनानि, (छ) सञ्चारव्यवस्था, (ज) वाणिज्यम्, (झ) विवाहः।

सङ्घीय-सूची	
राज्यसूची	
समवर्तिसूची	

10. अधः भारते शासनस्य विभिन्नस्तराणां तेषां च अधिनियम-रचनायाः अधिकारक्षेत्रस्य युग्मानि दत्तानि सन्ति। एतेषु युग्मेषु किं युग्मं समुचित-मेलयुक्तं नास्ति ?

(क) राज्यसर्वकारः	राज्यसूची
(ख) केन्द्रसर्वकारः	सङ्घीय-सूची
(ग) केन्द्रसर्वकारः राज्यसर्वकारः च	समवर्तिसूची
(घ) स्थानीय-सर्वकारः	अवशिष्ट-अधिकारः

11. प्रथमसूच्यां द्वितीयसूच्यां च समानताम् अन्वेषयन्तु तथा च अधः प्रदत्तायाः कूटसङ्ख्यायाः आधारेण समुचितम् उत्तरं चिन्वन्तु।

प्रथमा सूची	**द्वितीया सूची**
1. भारतीयसङ्घः	(अ) प्रधानमन्त्री
2. राज्यम्	(ब) सरपञ्च इति
3. नगरनिगमः	(स) राज्यपालः
4. ग्राम-पञ्चायत्त इति	(द) महापौरः

	1	2	3	4
(सा)	द	अ	ब	स
(रे)	ब	स	द	अ
(गा)	अ	स	द	ब
(मा)	स	द	अ	ब

12. एतानि कथनानि सावधानं पठन्तु –

(अ) सङ्घीय-व्यवस्थायां सङ्घस्य प्रान्तीय-सर्वकाराणां च अधिकाराः स्पष्टरूपेण सुनिश्चिताः भवन्ति।

(ब) भारतम् एकः सङ्घः अस्ति यतो हि केन्द्रस्य राज्यसर्वकाराणां च अधिकाराः संविधाने स्पष्टरूपेण निहिताः सन्ति तथा च निजेषु विषयेषु तेषां स्पष्ट-अधिकारः अस्ति।

(स) श्रीलङ्कायां सङ्घीया व्यवस्था अस्ति यतो हि सा प्रान्तेषु विभक्ताः अस्ति।

(द) भारते सङ्घीया व्यवस्था नास्ति यतो हि राज्यानां केचन अधिकाराः स्थानीय-शासनस्य कासाञ्चित् संस्थानां मध्ये विभाजिताः।

उपरि प्रदत्तेषु कथनेषु कानि कानि समुचितानि सन्ति।

(सा) अ, ब तथा च स (रे) अ, स तथा च द (गा) अ तथा च ब (मा) ब तथा च स इति।

लोकतन्त्रं विविधता च

परिचयः

गते अध्याये अस्माभिः दृष्टं यत् भाषाणां क्षेत्रीय-विविधतानां च अवहेलनम् अकृत्वा अर्थात् समायोजनेन सत्तायाः विभाजनं कर्तुं शक्यते। परन्तु,जनानां विशिष्ट-अभिज्ञानं केवलं भाषायाः क्षेत्रस्य च आधारेण एव न जायते। बहुधा जनाः स्वीयं परिचयम् अन्यैः सह च सम्बन्धं, शारीरिकसंरचनायाः वर्गस्य धर्मस्य लिङ्गस्य जातेः समुदायस्य च आधारेण अपि परिभाषितं कुर्वन्ति। अस्मिन् अध्याये वयं द्रक्ष्यामः यत् कथं लोकतन्त्रं सर्वासां सामाजिक-विभिन्नतानाम् अन्तराणाम् असमानतानां च मध्ये सामञ्जस्यं स्थापयित्वा उपस्थित-समस्यानां समाधानस्य प्रयासं करोति । अत्र वयं सामाजिक-विभाजनानां सार्वजनिक-अभिव्यक्तेः उदाहरण-माध्यमेन निजतथ्यं स्पष्टीकर्तुं प्रयत्नं करिष्यामः। ततः परं वयं चर्चां करिष्यामः यत् सामाजिक-विभिन्नता कथं पृथक् पृथक् रूपाणि धरति। पुनः वयम् इदम् अपि अवगमिष्यामः यत् सामाजिकी विभिन्नता लोकतान्त्रिक-राजनीतिः च कथम् अन्योऽन्यं प्रभावयति।

अध्यायः – ३

मैक्सिको-ओलम्पिक-कालिकी कथा

कार्लोसाय स्मिथाय च नमः। किं मयि अपि एवंविधं कर्तुं कदाचित् उत्साहः स्यात् ?



एतस्मिन् पृष्ठे प्रकाशितं चित्रम् अमेरिकायां जातस्य नागर-अधिकार-आन्दोलनस्य कयाचित् प्रमुख-घटनया सम्बद्धम् अस्ति। इदं तात्कालिकं चित्रम् अस्ति यदा 1968 तमे वर्षे मैक्सिको-नगरे जातानाम् ओलम्पिक-स्पर्धानाम् अन्तर्गतायाः 200 मीटर-परिमित-धावनस्पर्धायाः पदक-समारोहः आसीत्। अमेरिकायाः राष्ट्रगानं जायते नतशिरसौ मुष्टिके उत्तोल्य च द्वौ क्रीडकौ स्थितौ स्तः, एकः अमरीकीयः धावकः टॉमीस्मिथः वर्तते अपरः च जॉन-कार्लोसः इति अस्ति। एतौ एफ्रो-अमेरिकीयौ स्तः। एतौ क्रमशः स्वर्णं कांस्यपदकं च जितवन्तौ। तौ उपानहौ न धृतवन्तौ। केवलं पादकोशं धृतवन्तौ तया अवस्थया एव पुरस्कारं स्वीकृत्य द्वौ एव एवं ज्ञापयितुं प्रयत्नं कुरुतः यत् अमेरिकायाः अश्वेताः जनाः निर्धनाः सन्ति। स्मिथः निजे गले कृष्णगलबन्धम् अपि धृतवान् आसीत् तत् अश्वेतजनानाम् आत्मगौरवस्य प्रतीकम् अस्ति। कार्लोसः मृतानाम् अश्वेतजनानां स्मरणे कृष्णमणिका-युक्तां मालाम् अपि धृतवान्। स्वीय-एवंविधानां प्रतीकानाम् उपायानां च माध्यमैः तौ अमेरिकायां जायमानं रङ्गभेदं प्रति अन्ताराष्ट्रिय-समुदायस्य ध्यानाकर्षणाय प्रयत्नं कृतवन्तौ। कृष्ण-वर्णीयाः हस्तकोशाः बद्धमुष्टयः च अश्वेत-शक्तेः प्रतीकरूपेण आसन्। रजतपदक-विजेता आस्ट्रेलियायाः धावकः पीटर-नार्मनः पुरस्कार-समारोहे स्वीये क्रीडायुतके मानवाधिकार-मुद्राम् अङ्कयित्वा एतयोः द्वयोः अमेरिकीय-क्रीडकयोः समर्थनम् अकरोत्।

किं कार्लोस-वर्येण स्मिथ-वर्येण च अमेरिकीय-समाजस्य आन्तरिक-सन्दर्भानाम् अन्ताराष्ट्रिय-समुदायस्य समक्षे उपस्थापनं समुचितम् आसीत् ? किं भवन्तः तयोः कार्यं राजनैतिकं मंस्यन्ते ? पीटरनार्मन-वर्यः, यः न तु अमेरीकीयः आसीत्, न चैव अश्वेतः,सः किमर्थम् एतस्मिन् विरोधे सम्मिलितः ? किं भवन्तः तस्य स्थाने भवेयुः तर्हि तथाविधम् एव अकरिष्यन् ?

अन्ताराष्ट्रिय-ओलम्पिक-सङ्घः अवदत् यत् कार्लोस-स्मिथाभ्यां राजनैतिक-कथनस्य इयं युक्तिः ओलम्पिक-भावनायाः विरोधिनी अस्ति।

2005 तमे वर्षे सैन-होज़-स्टेट-विश्वविद्यालय-पक्षतः टॉमी-स्मिथ-वर्यस्य जॉन-कार्लोस-वर्यस्य च विरोध-प्रदर्शनस्य प्रतीकरूपेण विंशति-फुट-परिमिता उन्नता प्रतिमा स्थापिता। 1968 तमवर्षीयस्य पदक-वितरण-समारोहस्य यथार्थ-चित्रम् अपि उपरि अङ्कितम् अस्ति।

कथनं रहस्योद्घाटनम्

एफ्रो-अमरीकी - एफ्रो-अमरीकन इति, अश्वेत-अमेरिकीयाः जनाः ,अश्वेत इति शब्दः तेषाम् अफ्रीकीय-जनानां वंशजानां कृते प्रयुज्यते ये सप्तदश-शताब्दात् नवदश-शताब्दस्य आरम्भिककालं यावत् क्रीतदासाः कृत्वा अमेरिकां प्रति आनीताः आसन्।

अमेरिकायां नागर-अधिकार-आन्दोलनम् (1954 - 1968), घटनानां संशोधन-आन्दोलनानां च काचित् अजस्र-शृङ्खला यस्याः उद्देश्यः एफ्रो-अमरीकीय-जनान् विरुद्ध्य जायमानस्य जातेः आधारितस्य भेदभावस्य नाशः आसीत्। मार्टिन-लूथर-किंग-जूनियर(कनिष्ठस्य) इत्यस्य नेतृत्वे युद्धस्य एतस्य आन्दोलनस्य स्वरूपं सर्वथा अहिंसकम् आसीत्। एतस्य आन्दोलनस्य माध्यमेन अभ्यर्थितं यत् भेदभावकारिणाम् अधिनियमानां व्यवहाराणां च समाप्तिः स्यात् एवंविधं तत् अभ्यर्थनं याचनं वा साफल्यं गतम्।

अश्वेत-शक्ति-आन्दोलनम् – इदम् आन्दोलनं 1966 तमे वर्षे उद्गतम् तथा च 1975 तमवर्षं यावत् गतम्। जातीय-भेद-भावम् अधिकृत्य जातस्य एतस्य आन्दोलनस्य स्वरूपम् अधिकम् उग्रम् आसीत्। एतस्य आन्दोलनस्य आन्दोलन-कारिणां मतम् आसीत् यत् अमेरिकातः जातीय-भेदभावनायाः मार्जनाय हिंसायाः आश्रय-ग्रहणे अपि सङ्कोचः नास्ति।

एतस्मात् कारणात् सः दोषी इति घोषितः तथा च तस्य पदकानि प्रतिस्वीकृतानि। नार्मन-वर्यः अपि अश्वेत-आन्दोलनस्य समर्थनं कृतवान् आसीत् तस्मात् कारणात् अग्रिमायाम् ओलम्पिक-स्पर्धायाम् आस्ट्रेलियादले तस्मै स्थानं नासीत् परन्तु पुनरपि तेन यः निर्णयः कृतः आसीत् तस्मात् अमेरिकायां वर्धमानं नागराधिकार-आन्दोलनं प्रति विश्व-समुदायस्य ध्यानाकर्षणाय साफल्यम् अधिगतवान्। सद्य एव सैन-होज़-विश्वविद्यालयेन (यत्र ताभ्याम् अधीतम् आसीत्) द्वयोः अभिनन्दनं कृतं तथा च विश्वविद्यालयस्य आभ्यन्तरे तयोः प्रतिमे स्थापिते। यदा 2006 तमे वर्षे नार्मन-वर्यस्य मृत्युः अभवत् तदा तस्य शवस्य वोढृषु स्मिथ-वर्यः कार्लोस-वर्यः च अपि आस्ताम्।

चर्चामध्ये

केचन दलित-समूहाः 2001 तमे वर्षे डरबनमध्ये जायमाने संयुक्त-राष्ट्रस्य जातीय-भेद-विरोधिनि सम्मेलने भागग्रहणस्य निर्णयम् अकुर्वन्, ते याचितवन्तः च यत् सम्मेलनस्य कार्यसूच्यां जातिभेद इति विषयः अपि चर्चनीयः भवेत्। एतस्य निर्णयस्य सन्दर्भे तिस्रः प्रतिक्रियाः प्रकाशपथम् आयाताः –

अमनदीप-कौरः (सर्वकारीयः अधिकारी) – अस्माकं संविधाने वर्णितम् अस्ति यत् जातिगतभेदभावना असंवैधानिकी अस्ति। यदि क्वचित् अनया भेदभावनया व्यवहरति तर्हि एषः अस्माकम् आन्तरिकः प्रसङ्गः अस्ति प्रशासनिक-अक्षमतायाः च रूपेण एतत् द्रष्टव्यम्। अन्ताराष्ट्रिय-मञ्चे एवंविधस्य विषयस्य उपस्थापनं भवेत् इत्यस्य विचारस्य अहं विरोधी अस्मि।

ओइनम-महोदयः (समाज-शास्त्री) – जातीया भेदभावना नस्ल इति च समान-सामाजिक-विभाजनं न स्तः अतः अहम् एतयोः विरोधी अस्मि। जातेः आधारः सामाजिकः अस्ति अपरञ्च प्रजातेः (नस्ल) आधारः जीवशास्त्रीयः भवति। प्रजातेः विरोधिनि सम्मेलने जातेः विषयस्य उपस्थापनं द्वयोः विषययोर्मध्ये साम्यं दर्शयिष्यति।

अशोकः (दलित-कार्यकर्ता) – इदम् आन्तरिक-प्रकरणम् अस्ति इति उक्त्वा चर्चनीय-विषयस्य अनुपस्थापनं दमनस्य भेदभावनायाः च विषये चर्चायाः रोधनम् एव अस्ति। प्रजातिः इति विशुद्धरूपेण जीवशास्त्रीया नास्ति, इयं जातीयस्य वर्गीकरणस्य इव समाजशास्त्रीयं वैधानिकं च वर्गीकरणम् अस्ति। एतस्मिन् सम्मेलने जातिगत-भेदभावनायाः विषयः अवश्यमेव समुपस्थापनीयः।

एतेषु परामर्शेषु भवन्तः कं परामर्शं समुचितम् अनुभवन्ति ? सकारणं ज्ञापयन्तु।

अहं पाकिस्तानस्य बालिकानां केनचित् समूहेन अमिलम् अहम् अनुभूतवती यत् स्वदेशस्य कस्यचित् भागस्य बालिकानाम् अपेक्षया ताः मां प्रति अधिकां समानतायाः भावनां कुर्वन्ति , किम् एतत् मेलनं राष्ट्रविरोधि इति कथयिष्यते ?

समानताः असमानताः विभाजनं च

उपरि प्रदत्ते उदाहरणे क्रीडकाः सामाजिकस्य विभाजनस्य सामाजिक्याः च भेदभावनायाः च स्वदृष्ट्या विरोधं कुर्वन्ति स्म। परन्तु किम् एवंविधा भेदभावना केवलं प्रजातेः वर्णस्य च आधारेण एव भवति ? गतयोः द्वयोः अध्याययोः अस्माभिः सामाजिकस्य विभाजनस्य कानिचन अन्यानि रूपाणि दृष्टानि। उदाहरणार्थं बेल्जियमे श्रीलङ्कायां च इदं विभाजनं क्षेत्रीयस्य सामाजिकस्य च स्तरयोः विद्यमानम् आसीत्। बेल्जियमे पृथक् पृथक् क्षेत्राणां निवासिनः जनाः पृथक् पृथक् भाषाभिः सम्भाषन्ते स्म। श्रीलङ्कायाम् इदं विभाजनं भाषायाः क्षेत्रस्य च आधारेण दृश्यते। अनेन प्रकारेण प्रत्येकस्मिन् समाजे सामाजिकी विविधता पृथक् पृथक् रूपेण परिलक्ष्यते।

सामाजिक्याः भेदभावनायाः उत्पत्तिः

सामाजिक-विभाजनम् अधिकांशतः जन्मनः आधारेण भवति । सामान्यतः निजसमुदायस्य चयनम् अस्माकम् अधीनं न भवति । अनेन आधारेण वयं कस्यचित् विशिष्ट-समुदायस्य सदस्यरूपेण भवामः यत् अस्माकं जन्म तस्य समुदायस्य कस्मिंश्चित् परिवारे जातः । जन्म-आधारितं सामाजिक-विभाजनं वयं दैनिकजीवने प्रायः अनुभवामः । वयं स्वीये परिवेशे पश्यामः यत् कामं काचित् स्त्रीः पुरुषः वा स्यात्, दीर्घः वामनः वा स्यात् सर्वेषां चर्मणः वर्णः पृथक् पृथक् अस्ति, सर्वेषां शारीरिक्यः क्षमताः अक्षमताः च पृथक् पृथक् सन्ति । वस्तुतः, सर्वविधानि सामाजिक-विभाजनानि केवलं जन्मनः आधारेण एव न भवन्ति । कदाचित् अस्माकं रुच्यनुगुणं चयनस्य च आधारेण अपि सामाजिक-विभाजनस्य निश्चयः भवति । केचन जनाः वंशपरम्पराप्राप्तं धर्मं परित्यज्य निजरुच्यनुगुणं धर्मम् अङ्गीकुर्वन्ति । वयं सर्वे अपि जनाः अध्ययन-विषयाणां व्यवसायस्य क्रीडायाः सांस्कृतिक-गतिविधीनां च चयनं स्वीयायाः रुच्याः अनुसारम् एव कुर्मः । उपर्युक्तेन आधारेण अपि सामाजिक-समूहाः वर्गाः वा जायन्ते जन्मनः आधारेण वर्गाः जायन्ते ।



ऐस-केरालः कार्टून्स्

एतत् व्यङ्ग्यचित्रं दृष्ट्वा प्रत्येकं जनः पृथक् पृथक् अभिप्रायं वक्तुं शक्नोति । भवन्तः अनेन व्यङ्ग्यचित्रेण किम् अवगच्छन्ति ? भवतः सहपाठिनः अनेन किम् अवगच्छन्ति ?

प्रत्येकं सामाजिकी विभिन्नता सामाजिक-विभाजनस्य रूपं न प्राप्नोति । सामाजिक्यः विभिन्नताः जनानां विभाजनस्य महत्-कारण-रूपेण तु अवश्यमेव भवन्ति परन्तु एताः विभिन्नताः एव कदाचित् पृथक् पृथक् समुदायस्य जनान् परस्परं योजयितुं सेतुरूपाः अपि भवन्ति । विभिन्नानां सामाजिक-वर्गाणां जनाः निजवर्गाणां सीमातः बहिर्भूत्वा अपि समानतानाम् असमानतानां च अनुभवं कुर्वन्ति । यत् उदाहरणं पूर्वम् उपस्थापितं तस्मिन् तु कार्लोसः स्मिथः च एतदृष्ट्या समानौ आस्ताम् (द्वौ अपि एफ्रो अमेरीकीयौ आस्ताम्) किञ्च नार्मनः श्वेतः आसीत् । परन्तु एतेषु त्रिषु अपि काचित् समानता आसीत् एते सर्वे अपि प्रजातेः आधारितस्य भेदस्य विरोधिनः आसन् ।

प्रायः इत्थं दृश्यते यत् समान-धर्मावलम्बिनः जनाः आत्मानम् एकस्यैव समुदायस्य सदस्यरूपेण न अङ्गीकुर्वन्ति यतो हि तेषां जातिः सम्प्रदायः च पृथक् भवति । इदम् अपि सम्भवति यत् पृथक् पृथक् धर्मावलम्बिनः समानजातीयाः जनाः परस्परं विपुलतया आत्मीयभावम् अनुभवेयुः इति । सदृशकटुम्बस्य धनाढ्याः निर्धनाः च परस्परं विपुलतया घनिष्ठसम्बन्धं न स्थापयितुं पारयन्ति यतो हि सर्वे पृथक् पृथक् प्रकारेण चिन्तयितुम् आरभन्ते । अनेन प्रकारेण अस्माकं सर्वेषाम् एकाधिकः परिचयः भवति । अनेन प्रकारेण जनाः एकाधिकानां सामाजिक-समूहानां भागभूताः भवितुं शक्नुवन्ति । वस्तुतः एतस्मिन् सन्दर्भे अस्माकं परिचयः किञ्चित् पृथक् रूपं गृह्णाति ।

विभिन्नतामध्ये सामञ्जस्यं सङ्घर्षस्थितिः च

सामाजिकं विभाजनं तदा भवति यदा काश्चन सामाजिक्यः भिन्नताः अपराणां विभिन्नतानाम् अपेक्षया विपुलाः एकविधानां च विभिन्नतानाम् अभिभव-कारिण्यः भवन्ति । अमेरिकायां श्वेतानाम् अश्वेतानां च मध्ये भिन्नता सामाजिक-विभाजनरूपं गृह्णाति यतो हि अश्वेतजनाः सामान्यतः निर्धनाः, अगृहाः भेदभावनया ग्रस्ताः च सन्ति । अस्माकं देशे अपि दलित-जनाः निर्धनाः भूमिहीनाः च सन्ति ।

तैः अपि प्रायः भेदभावनया अन्यायेन च ग्रस्तैः भवितव्यं भवति । यदा एकविधा सामाजिकी विभिन्नता अन्यविभिन्नतानाम् अपेक्षया अधिका महत्त्वपूर्णा जायते तथा च जनाः अनुभवन्ति यत् ते पृथक् समुदायस्य सन्ति तदा एतस्मात् काचित् सामाजिक-विभाजनस्य स्थितिः उत्पद्यते ।

यदि समानाः सामाजिक्यः असमानताः नैकेषु समूहेषु विद्यमानाः स्युः तर्हि एकस्य समूहस्य अन्यस्मात् समूहात् पार्थक्यं कठिनतया भविष्यति । एतेन ज्ञायते यत् कस्मिंश्चित् एकस्मिन् विषये अनेकेषां समूहानां समान-हितानि भवन्ति अपरञ्च कस्मिंश्चित् अपरस्मिन् विषये तेषां दृष्टौ भेदः भवितुं शक्नोति । उत्तर-आयरलैण्डस्य नीदरलैण्डस्य च उदाहरणं स्वीकुर्मः । द्वौ अपि ख्रिस्त-देशौ स्तः परन्तु अत्रत्याः जनाः प्रोटेस्टेंट कैथोलिक इति द्वयोः भागयोः विभक्ताः सन्ति । उत्तर-आयरलैण्डे वर्गस्य धर्मस्य च मध्ये गहना समानता अस्ति । तत्रत्यः कैथलिक-समुदायः निर्धनः अस्ति । चिरकालात् तेन समुदायेन सह अन्यजनाः भेदभावनया व्यवहरन्ति । नीदरलैण्डे वर्गस्य धर्मस्य च मध्ये एतादृशः संयोगः न दृश्यते । तत्र कैथोलिक-प्रोटेस्टेण्ट इति द्वयोः वर्गयोः मध्ये समानरूपेण निर्धनाः धनाढ्याः च जनाः सन्ति । परिणामः अयम् अस्ति यत् उत्तर-आयरलैण्डस्य कैथोलिकजनानां च मध्ये हिंसापूर्णः व्यवहारः जायते परन्तु नीदरलैण्डे एवं न भवति । यदा सामाजिक्यः विभिन्नताः परस्परं सामञ्जस्यं प्राप्नुवन्ति तदा कस्यचित् गहन-सामाजिक-विभाजनस्य आधारशिला सज्जीभवति । यत्र एताः सामाजिक्यः विभिन्नताः सहैव नैकेषु समूहेषु विद्यमानाः भवन्ति तत्र तेषां समायोजनम् अपेक्षाकृतं सरलं भवति ।

अद्य अधिकतरेषु समाजेषु अनेकविधानि विभाजनानि दृश्यन्ते । देशः दीर्घः स्यात् अथवा लघुः एवंविधं कारणं न भवति । भारतं विशालदेशः अस्ति तथा च एतस्मिन् नैकसमुदायानां जनाः



दलितकव्योः कविते पठन्तु – चित्रस्य उपरि "अप्रकट-रङ्गभेद इति पदं किमर्थं लिखितम् ?

निवसन्ति । बेल्जियमः लघुः देशः अस्ति परन्तु तत्र अपि नैकसमुदायानां जनाः सन्ति । जर्मनी, स्वीडन इति एवं विधाः देशाः समरूपसमाजाः सन्ति तत्र प्रायः जनाः समानजातीयाः समानसंस्कृति-सम्पन्नाः च सन्ति, परन्तु विश्वस्य अन्येभ्यः भागेभ्यः जनाः तत्र आयान्ति तस्मात् कारणात् तत्रापि वेगेन परिवर्तनं जायते । बहिर्भागात् ये जनाः तत्र आयान्ति ते अपि निजसंस्कृत्या सह तत्र प्रविशन्ति । स्वाभाविक-प्रवृत्त्या ते जनाः पृथक् समुदायं वर्गं वा कल्पयन्ति । अनया दृष्ट्या अद्य विश्वस्य अधिकतराः देशाः बहु-संस्कृतिभिः सम्पन्नाः जाताः ।

कथनं रहस्योद्घाटनम्

समरूप-समाजः – कश्चन एतादृशः समाजः यत्र सामुदायिक्यः सांस्कृतिक्यः जातीयाः च विभिन्नताः अधिक-गहनाः न भवन्ति ।

इमराना दशम-कक्षायाः ब इति खण्डस्य छात्रा अस्ति। सा द्वादश-कक्षायाः अन्यच्छात्रेभ्यः प्रास्थानिक-प्रीतिभोजस्य आयोजनाय निजकक्षायाः अन्यैः छात्रैः सह एकादश-कक्षायाः छात्राणां साहाय्यं करोति। गते मासे इमराना निज-खण्डस्य खो-खो-दलस्य पक्षतः दशमकक्षायाः अ इति खण्डस्य दलं विरुध्य जातायां स्पर्धायां भागं गृहीतवती। सा बसयानेन गृहं गच्छति तस्मिन् च याने पारे-यमुनम् अन्ये अपि विद्यार्थिनः भवन्ति ते पृथक् पृथक् कक्षासु पठन्ति। इमराना सर्वैः छात्रैः सह मित्रतया व्यवहरति। इमरानायाः तस्याः च ज्येष्ठभगिन्याः नईमायाः च आक्षेपः अस्ति यत् मात्रा सह ताभ्यां गृह्यकार्यं करणीयं भवति अपरञ्च तयोः भ्राता किमपि कार्यं न करोति। इमरानायाः पिता तस्याः ज्येष्ठभगिन्याः कृते वरस्य अन्वेषणं करोति। तस्य प्रयासः अस्ति यत् वरपक्षीयाणाम् अपि सामाजिक-स्तरः कन्यापक्षीयाणाम् इव स्यात्।

किं भवन्तः सूचयितुं शक्नुवन्ति यत् इमरानायाः परिचयः केन आधारेण कर्तुं शक्यते –

गृहे सा काचित् कन्या अस्ति

धर्मस्य दृष्ट्या सा ----

विद्यालये सा ----

---- सा ------

----- सा ----

सामाजिक-विभाजनानां राजनीतिः

सामाजिक-विभाजनैः राजनीतिः कथं प्रभाविता भवति ? सामाजिक-विभाजनैः राजनीतेः कः सम्बन्धः अस्ति ? प्रथमदृष्ट्या तु राजनीतेः सामाजिक-विभाजनानां च पारस्परिक-सम्बन्धः भयानकः विस्फोटकः च इति प्रतिभाति। लोकतन्त्रे विभिन्नानां राजनैतिक-दलानां मध्ये प्रतिद्वन्द्विताया: वातावरणं भवति। एतस्याः प्रतिस्पर्धायाः कारणात् कश्चन अपि समाजः अन्यसमाजस्य विरोधी भवितुं शक्नोति। यदि राजनैतिक-दलानि समाजे विद्यमानानां विभाजनानां दृष्ट्या राजनैतिकीं प्रतिस्पर्धां कर्तुम् आरप्स्यन्ते तर्हि प्रतिस्पर्धायाः कारणात् सामाजिकं विभाजनं राजनैतिक-विभाजनस्य रूपेण परिवर्तयितुं शक्नोति। इत्थं बहुषु देशेषु जातम् अस्ति।

परिणामानां सीमाक्षेत्रम्

उत्तर-आयरलैण्डस्य एव कञ्चित् उदाहरणं पश्यामः यस्य चर्चा वयं उपरि कृतवन्तः। ग्रेट-ब्रिटेनस्य अयं भागः चिरकालात् हिंसया जातीय-कटुतया राजनैतिक-सङ्घर्षेण च ग्रस्तः आसीत्। अत्रत्या जनसङ्ख्या मुख्यतः ख्रिस्तधर्मिणी एव अस्ति परन्तु एतस्य धर्मस्य द्वयोः प्रमुख-सम्प्रदाययोः अनुचित-प्रकारेण विभक्ता अस्ति। त्रिपञ्चाशत् प्रतिशतं जनसङ्ख्या प्रोटेस्टेंट इति अस्ति अपरञ्च 44 प्रतिशतं रोमन-कैथलिक इति अस्ति। कैथोलिक इत्येतेषां प्रतिनिधित्वं नेशनलिस्ट-दलानि कुर्वन्ति। तेषां याचनम् अस्ति यत् उत्तर-आयरलैण्ड इति आयरलैण्ड-गणराज्येन सह मेलितः स्यात् यत् मुख्यतः कैथोलिक-बहुलम् अस्ति। प्रोटेस्टेंट-जनानां प्रतिनिधित्वं यूनियनिस्ट-दलानि कुर्वन्ति यानि ग्रेट-ब्रिटेनेन सह एव निवसामः इति पक्षे सन्ति यतो हि ब्रिटेनः मुख्यतः प्रोटेस्टेंट-देशः अस्ति। यूनियनिस्ट,नेशनलिस्ट इत्येतयोः मध्ये जायमाने हिंसकसङ्घर्षे ब्रिटेनस्य सुरक्षाबलैः सहिताः शताधिकाः जनाः सेनायाः सैनिकाः च मारिताः। 1998 तमे वर्षे ब्रिटेनस्य सर्वकारस्य नेशनलिस्ट-जनानां च मध्ये शान्तिसन्धिः अभवत् यस्मिन् द्वाभ्याम् एव पक्षाभ्यां स्वीकृतं यत् ते हिंसकान्दोलनं न करिष्यतः। यूगोस्लावियायां कथायाः एतादृशः सुखदः अन्तः न अभवत्। तत्र धार्मिकस्य जातीय-विभाजनस्य च आधारेण जायमानायां राजनैतिक-स्पर्धायां यूगोस्लाविया नैकैः खण्डैः विभक्तः जातः।

एतादृशानाम् उदाहरणानाम् आधारेण केचन जनाः अमुं निष्कर्षं प्राप्नुवन्ति यत् राजनीतेः सामाजिकस्य विभाजनस्य च मेलनं न स्यात्।

बुल्गारिया, रोमानिया अथवा भारतम्

गणेशः विदेशे भ्रमित्वा आगतवान् आसीत् तथा च सः महाश्वेतां ज्ञापयति स्म यत् पूर्वयूरोपस्य विभिन्न-देशेषु ये रोमानीयाः जनाः निवसन्ति तेषां जीवनं कथम् अस्ति। सः योर्दान्कया सह मिलितवान् या बुल्गारियायां परिचारिका आसीत्। रोमानीय-जनानां विषये सा एतानि तथ्यानि उपस्थापितवती आसीत् –

परिचारिकापदे नियुक्तेः परं भवन्तः सर्वेषां परिचर्यां करिष्यन्ति न कोऽपि निराकर्तुं शक्नोति परन्तु एते रोमानीजनाः असमीचीनाः भवन्ति। कस्मिन्नपि कुटुम्बे यदा कश्चित् रोगी भवति तदा कुटुम्बजनाः तम् उत्थाप्य चिकित्सालयं प्रति आनयन्ति तथा च यदा ते चिकित्सालये भवन्ति तदा तत्र बहु कोलाहलं कुर्वन्ति। ते उच्चैः भाषन्ते,धूमदण्डिकां पिबन्ति, सर्वत्र भस्म धूमदण्डिकाखण्डान् च विकिरन्ति तथा च भित्तिषु निष्ठीवन्ति। धैर्यं तु किञ्चिदपि न भवति तेषु। अस्माकं चिकित्सकान् तुदन्ति तैः सह च अभद्रं व्यवहारं कुर्वन्ति। वस्तुतः एते कृष्णचर्मयुक्ताः जनाः अस्मादृशाः न भवन्त्येव। वर्णविषये अपि तेषां रुचिः विचित्रा भवति। किञ्च तेषां वेशं तु पश्यन्तु, अन्ततः ते देशस्य अन्यैः जनैः इव किमर्थं न व्यवहरन्ति ? पुनः वयं सर्वे जानीमः यत् ते चौराः सन्ति इति। मया कथयन्तः जनाः श्रुताः यत् रोमानीजनाः निजरक्तं विक्रीय जीवननिर्वहणं कुर्वन्ति। एतेषु कश्चित् अपि चिकित्सालयस्य व्ययभारं न सोढुं शक्नोति। परन्तु रुग्णे जते सति ते धावं धावं चिकित्सालयं प्राप्नुवन्ति तथा च सज्जनाः ये बुल्गारिया-करदातारः सन्ति तेषां धनेन चिकित्सां कारयन्ति।

एवंविधः वार्त्तालापः मया क्वचित् श्रुतः इति भाति ,महाश्वेता अकथयत्।

गणेशः पुनः रोमानी-मोद्रूजेन्याः विषये अवदत् या रोमानियायां निवसति। यदा सा अष्टादशवर्षीया आसीत् तदा तया चिकित्सालये प्रथमः शिशुः प्रसूतः। तस्याः पार्श्वे चिकित्सकाय परिचारिकायै च दातुं किञ्चित् अपि धनं न आसीत्। सा चिकित्सालये आसीत् परन्तु कश्चित् अपि तया सह मेलितुं तं निरीक्षितुं पालयितुं च न आगतवान्। अन्ततः तत्रत्या स्वच्छताकर्मिणी या स्वयम् अपि रोमानीया आसीत्, तस्याः साहाय्यं कृतं तथा च सा पुत्रं जनितवती। प्रसूतेः परं परिचारिका शिशुम् आदाय आगता अवदत् च स्वीकरोतु, जातः इतोऽपि कश्चित् अपराधी इति ! सर्वकारीय-चिकित्सालयेषु रोमानीयैः जनैः सह यः व्यवहारः क्रियते स्म तस्मिन् विषये सा अज्ञापयत् – चिकित्सकाः निजप्रकोष्ठस्य पुरतः प्रतीक्षां कारयन्ति। एकदा कश्चित् चिकित्सकः अवदत् यत् यदि भवत्या निरीक्षणं कारणीयं तदा आदौ स्नात्वा आयातु इति। निश्चितरूपेण मम शरीरात् दुर्गन्धिः प्रसरति स्म। गर्भावस्थाकाले मया अवकर-कण्डोलतः भोजनं चित्वा भक्षितम् आसीत् यतो हि तदा प्रतिक्षणं बुभुक्षाम् अहम् अनुभवामि स्म। मम पतिः मां परित्यक्तवान्। मम द्वौ शिशू आस्तां तृतीयः च गर्भावस्थायाम् आसीत्। सामाजिकः कार्यकर्ता मह्यं भोजनं न अददात्। अहं प्रायः अनुभवामि यत् एवंविधेषु चिकित्सालयेषु अगमनम् एव वरम् इति।

महाश्वेता गणेशस्य वचांसि अशृणोत् अवदत् च , गणेशः एतानि तथ्यानि अवगन्तुं विश्वस्य अन्यभागान् प्रति गमनस्य का आवश्यकता आसीत् ? इयं रोमानियायाः बुल्गारियायाः चैव कथा नास्ति। इयं तु किञ्चित्, रोमानीय-जनानां कथा अस्ति परन्तु इदं सर्वम् एव तु अत्रापि भवति। अस्माकं देशस्य शासनद्वारा ये जनाः अपराधिनः इति घोषिताः भवन्ति तैः सह अपि तु एवंविधः एव व्यवहारः भवति।

- किं भवद्भ्यः महाश्वेतायाः वचांसि रोचन्ते ? किं भवन्तः निजक्षेत्रस्य एवंविधान् जनान् जानन्ति यैः सह रोमानीय-जनवत् व्यवहारः भवति ?

- किं भवन्तः कदाचित् जनान् एवंविधं वार्तालापं कुर्वतः श्रुतवन्तः यादृशं वार्तालापं योर्दान्का मोद्रुजेनी च कुरुतः स्म ? यदि आम्, तर्हि कल्पयन्तु यत् यदि भवन्तः ताभ्यां यादृशं वार्तालापं श्रोतुम् अवसरं प्राप्तवन्तः स्युः तर्हि इयं कथा कीदृशी भविष्यति ?

- किं बुल्गारियायाः सर्वकारेण अयं प्रयासः कर्तव्यः यत् रोमानीयाः जनाः अपि बुल्गारियायाः अन्येषां जनानाम् इव वस्त्राणि धरेयुः तथा च तद्वदेव आचरणं कुर्युः इति ?

तेषां मतम् आसीत् यत् सर्वश्रेष्ठा स्थितिः तु इयम् अस्ति यत् समाजे कीदृशम् अपि विभाजनं न स्यात्। यदि कस्मिंश्चित् देशे सामाजिकं विभाजनम् अस्ति तर्हि राजनीतौ तस्य अभिव्यक्तिः एव न भवेत्।

परन्तु अनेन सहैव इदम् अपि सत्यम् अस्ति यत् राजनीतौ सामाजिकस्य विभाजनस्य प्रत्येकम् अपि अभिव्यक्तिः मतभेदं न जनयति। अस्माभिः पूर्वम् अपि दृष्टम् अस्ति यत् विश्वस्य नैकेषु देशेषु पृथक् पृथक् प्रकारकस्य विभाजनम् अस्ति तथा च एवंविधानि विभाजनानि राजनैतिकरूपम् अपि प्राप्नुवन्ति एव। लोकतन्त्रे राजनैतिक-दलानि सामाजिक-विभाजनस्य विषये चर्चा तथा विभिन्नसमूहानां च समक्षे पृथक् पृथक् प्रतिज्ञा-स्वीकरणम् इति तेषां स्वाभाविक-प्रवृत्तिः अस्ति, विभिन्नाः समुदायाः समुचितं प्रतिनिधित्वं प्राप्नुयुः तथा च विभिन्नैः समुदायैः याः समुचिताः याचनाः क्रियन्ते तथा च आवश्यकतां पूर्तीकरणस्य नीतीनां च निर्माणम् इत्यपि राजनैतिक-दलानाम् एव दायित्वम् अस्ति। अधिकतरेषु देशेषु मतदान-स्वरूपस्य, सामाजिक-विभाजनानां च मध्ये कश्चित् प्रत्यक्षसम्बन्धः दृश्यते। एतस्य अन्तर्गतं कस्यचित् एकस्य समुदायस्य जनाः कस्मैचित् एकस्मै दलाय अन्येषां दलानाम् अपेक्षया आधिक्येन समर्थनं यच्छन्ति तस्य एव दलस्य पक्षे मतदानम् अपि कुर्वन्ति। नैकेषु देशेषु एवंविधानि दलानि सन्ति यानि केवलम् एकस्मिन् एव समुदाये चिन्तयन्ति तस्य एव हिताय च राजनीतिं कुर्वन्ति। परन्तु एतस्य सर्वस्य परिणतिः देशस्य विखण्डनस्य रूपेण न भवति।

ओरियन/ जुस्का रैंटेनेन-पिलकर डॉट कॉम

उत्तर-आयरलैण्डस्य केषुचित् स्थानेषु प्रोटेस्टेंटजनानां कैथोलिकजनानां च समुदायाः भित्तेः माध्यमेन विभक्ताः सन्ति। एतासु भित्तिषु प्रायः किमपि लिखितं भवति इति दृश्यते। एतस्मिन् चित्रे अपि भवन्तः द्रष्टुं शक्नुवन्ति। आयरिश-रिपब्लिकन-आर्मी इत्यस्य सर्वकारस्य च मध्ये 2005 तमे वर्षे कश्चित् सन्धिः अभवत्। अत्र अङ्कित-भित्ति-लेखनं सामाजिक-अवसादस्य विषये किं कथयति ?

त्रीणि सोपानानि

सामाजिक-विभाजनानां राजनीतेः परिणामः त्रयाणां तथ्यानाम् आधारेण निश्चीयते। प्रथमं तथ्यम् अस्ति जनानां निजपरिचयं प्रति आग्रहस्य भावना इति। यदि जनाः आत्मानम् अन्येषु विशिष्टतमाः वयम् इति मन्तुम् आरभन्ते तदा अन्यैः सह सामञ्जस्यं स्थापयितुं ते काठिन्यम् अनुभवन्ति। यावत्पर्यन्तम् उत्तर-आयरलैण्डस्य जनाः आत्मानं केवलं प्रोटेस्टेण्ट इति अथवा कैथोलिक इति रूपेण द्रक्ष्यन्ति तावत्पर्यन्तं ते शान्ताः न भवितुं शक्नुवन्ति। यदि जनाः आत्मनः बहुस्तरीय-परिचयं प्रति सचेताः जागरूकाः वा सन्ति तथा च अन्याभिज्ञानं राष्ट्रियपरिचयस्य भागरूपेण सहयोगिरूपेण च मन्यन्ते तावत्पर्यन्तं कापि समस्या न स्यात्। यथा – बेल्जियमस्य अधिकतराः जनाः आत्मानं बेल्जियायि-रूपेण एव मन्यन्ते, कामं ते डचभाषया जर्मनभाषया सम्भाषणं कुर्युः इति। अनया दृष्ट्या ते विभिन्नैः जनैः सह स्थातुं साहाय्यं प्राप्नुवन्ति। भारतदेशे अपि अधिकतराः जनाः निजपरिचयम् आधृत्य एतया एव दृष्ट्या व्यवहरन्ति। सर्वादौ ते आत्मानं भारतीयरूपेण मन्यन्ते पुनः कस्यचित् प्रदेशविशिष्टस्य क्षेत्रस्य भाषायाः समूहस्य धर्मस्य सामाजिकसमुदायस्य च सदस्यरूपेण मन्यन्ते।

अपरं महत्त्वपूर्णं तथ्यम् इदम् अस्ति यत् कस्यचित् समुदायस्य याचनाः राजनैतिक-दलानि कथं समुपस्थापयन्ति इति। याः याचनाः संवैधानिक्यः सन्ति तथा च अन्येषां समुदायानां हानिम् अपि न कुर्वन्ति एवंविधानां याचनानां स्वीकरणं प्रवर्तनं वा सरलं भवति। श्रीलङ्कायां, श्रीलङ्कादेशः केवलं सिंहलीजनानां कृते एव अस्ति इति एवंविधा याचना तमिल-समुदायस्य जनानां परिचयस्य हितानां च कृते हानिकारिका आसीत्। यूगोस्लावियायां विभिन्नसमुदायानां नेतारः निजजातीय-समूहानां पक्षतः एवंविधाः याचनाः उपस्थापितवन्तः यत् तासाम् एतस्य देशस्य सीमाभ्यन्तरे स्वीकरणं क्रियान्वयनं च अशक्यम् आसीत्।

तृतीयं तथ्यम् अस्ति सर्वकारस्य मानसिकता । सर्वकारः एतासां याचनानां विषये कां प्रतिक्रियाम् अभिव्यञ्जयति, इदम् अपि महत्त्वपूर्णमस्ति । किञ्च यथा अस्माभिः बेल्जियमस्य श्रीलङ्कायाः च उदाहरणैः दृष्टं, यदि प्राशासनिकाः जनाः सत्तायां सहभागितां कर्तुं सज्जाः स्युः तथा च अल्पसङ्ख्यक-समुदायस्य समुचितयाचनाः पूरयितुं प्रयासः सत्यनिष्ठया क्रियेत तर्हि सामाजिकं विभाजनं देशाय भयकारकं न भवति । यदि प्राशासनिकाः जनाः राष्ट्रिय-एकतायाः व्याजेन जनसमुदायस्य समुचितयाचनाः अभिभवन्ति तदा प्रायः प्रतिकूलाः हानिप्रदाः च परिणामाः भवन्ति । शक्तेः प्रयोगं कृत्वा एकतायाः स्थापनं स्यात् इति प्रयासः भवेत् चेत्, प्रायः तेन एव विभाजनं प्रति समाजः समुदायः देशः वा नीयते ।

अनेन प्रकारेण कस्मिन्नपि देशे सामाजिक-विभिन्नताः अधिकृत्य प्रखरतया विचाराणाम् उपस्थापनं भयानकं स्यात् इति मत्वा न सदैव व्यवहारः करणीयः । लोकतन्त्रे सामाजिक-विभाजनस्य राजनैतिकी अभिव्यक्तिः इति किञ्चित् सामान्यं तथ्यम् अस्ति तथा च इदं कस्याश्चित् स्वस्थ-राजनीतेः लक्षणम् अपि भवितुं शक्नोति । स्वस्थ-राजनीतेः अनुसारम् एव विभिन्नाः लघु-सामाजिक-समूहाः पश्चवर्तिनीः आवश्यकताः समस्याः च प्रकटयन्ति सर्वकारस्य चित्ताकर्षणं आत्मनः प्रति च कुर्वन्ति । राजनीतौ विभिन्न-प्रकारकाणां सामाजिक-विभाजनानाम् अभिव्यक्तिः एवंविधानां विभाजनानां मध्ये संतुलनम् उत्पादयन्ति । एतस्मात् कारणात् एव किञ्चित् अपि सामाजिक-विभाजनं सीमायाः अतिक्रमणं कृत्वा उग्ररूपं न धर्तुं शक्नोति । एतस्यां स्थितौ लोकतन्त्रं दृढताम् एव उपयाति ।

परन्तु विभिन्नताः प्रति सकारात्मक-दृष्टिः, सर्वविषयाणां समावेशस्य च इच्छा इति तावान् सरलः विषयः नास्ति । ये जनाः आत्मानं वञ्चिताः उपेक्षिताः भेदभावना-ग्रस्ताः च वयम् इति मन्यन्ते तैः अन्यायेन सह सङ्घर्षः अपि करणीयः भवति । एतादृशः सङ्घर्षः प्रायः लोकतान्त्रिक-मार्गम् एव आविष्करोति । जनाः संवैधानिकरूपेण शान्त्या च अभियाचनं कुर्वन्ति तथा च निर्वाचनानां माध्यमेन आत्मनः कृते अनुभावम् उत्पादयन्ति अनुभूयमान-समस्यानां समाधानाय च प्रयासं कुर्वन्ति । बहुधा सामाजिक्यः असमानताः एतावता प्रमाणेन असमानत्वं प्राप्नुवन्ति तथा च अन्याय-कारिण्यः भवन्ति यत् तासां स्वीकरणम् अशक्यं भवति । असमानताम् अन्यायं च विरुध्य जायमानः सङ्घर्षः क्वचित् हिंसकमार्गम् अनुसरति तथा च शासनं विरुध्य अपि समुपस्थितः जायते । इतिहासः ज्ञापयति यत् एतादृशीनां समस्तानाम् अव्यवस्थानाम् अभिज्ञानाय विविधतानां च समावेशाय लोकतन्त्रम् एव प्रकृष्टतमः उपायः अस्ति ।



जीवनस्य विभिन्नपक्षेषु दृश्यमानानि सामाजिक-विभाजनेन सम्बद्धानि चित्राणि सङ्गृह्णन्तु अथवा रचयन्तु । किं भवन्तः क्रीडायाः सन्दर्भे सामाजिक-विभाजनस्य अथवा भेदभावनायाः कानिचन उदाहरणानि चिन्तयितुं शक्नुवन्ति ?

...तर्हि किं भवतः कथनस्य अभिप्रायः अस्ति यत् कस्यचित् महतः विभाजनस्य स्थाने अनेकानि लघुविभाजनानि लाभदायकानि भवन्ति ? किञ्च, भवतः कथनस्य अयम् अपि अभिप्रायः अस्ति यत् राजनीतिः एकतायाः उत्पादनस्य शक्तिः अस्ति ?

अभ्यासः

1. एवंविधानां त्रयाणां कारकाणां विषये चर्चां कुर्वन्तु ये सामाजिक-विभाजनानां राजनीतेः परिणामान् निश्चीकुर्वन्ति ।
2. सामाजिक-विभिन्नताः कदा कथं च सामाजिक-विभाजनानां रूपं गृह्णन्ति ?
3. सामाजिकानि विभाजनानि कथं राजनीतिं प्रभावयन्ति ? द्वे उदाहरणे अपि यच्छन्तु ।
4. ---------- सामाजिक्यः भिन्नताः गभीराणि सामाजिक-विभाजनानि अवसाद-स्थितीः च जनयन्ति । ----- सामाजिक्यः भिन्नताः सामान्यतः सङ्घर्षस्य स्थितिं यावत् न गच्छन्ति ।

5. सामाजिक-विभाजनानां धारणस्य सन्दर्भे एतेषु किं कथनं लोकतान्त्रिक-व्यवस्थायाः विषये न प्रवर्तते ?

(क) लोकतन्त्रे राजनैतिक-प्रतिद्वन्द्वितायाः कारणात् सामाजिक-विभाजनानां छाया राजनीतौ अपि निपतति।

(ख) लोकतन्त्रे विभिन्नेभ्यः समुदायेभ्यः शान्तिपूर्ण-प्रकारेण निज-आक्षेपाणाम् अभिव्यक्तिः शक्यते।

(ग) लोकतन्त्र-प्रक्रिया सामाजिक-विभाजनानां समाधानाय प्रकृष्टतमेन उपायरूपेण अस्ति।

(घ) लोकतन्त्रं सामाजिक-विभाजनानाम् आधारेण समाजं विखण्डनं प्रति नयति।

6. निम्नलिखितेषु त्रयाणां कथनानां विचारं कुर्वन्तु –

(अ) यत्र सामाजिक-भिन्नताः परस्परं सङ्घर्षं कुर्वन्ति तत्र सामाजिकविभाजनं भवति।

(ब) इदं भवितुं शक्यते यत् एकस्य जनस्य नैकपरिचयाः स्युः।

(स) केवलं भारतप्रभृतिषु विशालेषु देशेषु एव सामाजिक-विभाजनानि भवन्ति।

एतेषु कथनेषु कानि समुचितानि सन्ति।

(क) अ, ब, स (ख) अ, ब (ग) ब, स (घ) केवलं स इति।

7. निम्नलिखितानि कथनानि तार्किकक्रमेण स्थापयन्तु तथा च अधः प्रदत्तायाः कूटसङ्ख्यायाः आधारेण समुचितम् उत्तरम् अन्वेषयन्तु।

(अ) सामाजिक-विभाजनस्य सर्वाः राजनैतिक-अभिव्यक्तयः भयानक्यः एव स्युः इति आवश्यकं नास्ति।

(ब) प्रत्येकस्मिन् देशे कस्यचित् अपि प्रकारकस्य विभाजनानि भवन्त्येव।

(स) राजनैतिक-दलानि सामाजिक-विभाजनानाम् आधारेण राजनैतिकस्य समर्थन-ग्रहणस्य प्रयासं कुर्वन्ति।

(द) कानिचन सामाजिक-अन्तराणि सामाजिक-विभाजनानां रूपं ग्रहीतुं शक्नुवन्ति।

(क) द, ब, स, अ (ख) द, ब, अ, स (ग) द, अ, स, ब (घ) अ, ब, स, द

8. निम्नलिखितेषु कः देशः धार्मिकस्य जातीय-परिचयस्य च आधारेण विखण्डनस्य सम्मुखीकरणं कर्तुं बाध्यः जातः ?

(क) बेल्जियमः (ख) भारतं (ग) यूगोस्लाविया (घ) नीदरलैण्डम्

9. मार्टिन-लूथर-किंग-जूनियरस्य 1963 तमवर्षस्य प्रसिद्धभाषणस्य निम्नलिखितान् अंशान् पठन्तु। सः कस्य प्रकारस्य सामाजिक-विभाजनस्य विषये चर्चयति ? तस्य आशाः आकाङ्क्षाः च काः आसन् ? किं भवन्तः तस्य कथनस्य मैक्सिको-ओलम्पिकस्य च तस्य घटनायाः मध्ये कमपि सम्बन्धं पश्यन्ति यस्याः घटनायाः वर्णनम् अस्मिन् अध्याये आसीत् ?

''मम कश्चित् स्वप्नः अस्ति यत् मम चत्वारः शिशवः कदाचित् एतादृशे देशे वासं करिष्यन्ति यत्र चर्मणः वर्णस्य आधारेण नैव अपितु तेषां यथार्थ-चारित्रिक-गुणानाम् आधारेण तेषाम् आकलनं भविष्यति। स्वतन्त्रता पूर्वं निजं यथार्थस्वरूपं प्राप्नोत्। स्वतन्त्रता तदा एव बन्धनमुक्ता भविष्यति यदा इयं प्रत्येकं वसतिः, प्रत्येकं ग्रामं यावत् प्राप्स्यति। प्रत्येकस्मिन् राज्ये नगरे च भविष्यति अपि च वयं तत् दिनम् आनेष्यामः यदा ईश्वरस्य प्रत्येकं सन्ततिः अश्वेताः स्त्रीपुरुषाः, श्वेतजनाः, यहूदीजनाः अयहूदीजनाः, प्रोटेस्टेण्टजनाः कैथलिकजनाः च परस्परं भ्रातृभावेन जीविष्यन्ति तथा च इमां पुरातनीं नीग्रो-प्रार्थनां गास्यन्ति --- प्राप्ता स्वतन्त्रता, प्राप्ता स्वतन्त्रता ! प्रभो नतमस्तकाः,प्राप्ता स्वतन्त्रता ! मम क्वचित् स्वप्नः अस्ति यत् कदाचित् देशः जागरयिष्यति निजस्य वास्तविकस्य स्वभावस्य च अनुरूपं वदिष्यति – वयम् एतत् स्पष्टं सत्यं मन्यामहे यत् सर्वे जनाः समानाः सन्ति।''

जातेः धर्मस्य लैङ्गिकाः च विषयाः

अध्यायः - 4

परिचयः

विगते अध्याये अस्माभिः अवगतं यत् सामाजिकी विविधता लोकतन्त्राय भयङ्करी न भवति । राजनीतौ सामाजिकीनाम् असमानतानाम् अभिव्यक्तिः अशक्या नास्ति। अनेकधा तु इयम् अभिव्यक्तिः लोकतन्त्राय लाभकरी अपि भवति। अस्मिन् अध्याये वयम् इमं विचारं भारतीय-लोकतन्त्रस्य कार्यशैल्याः सन्दर्भे अवगन्तुं प्रयत्नं करिष्यामः । अत्र वयं सामाजिक-विभाजन-कर्त्रीणां भेदभावना-युक्तानां च तिसृणाम् असमानतानां विषये चर्चां करिष्यामः। एताः तिस्रः, लिङ्गस्य धर्मस्य जातेः च आश्रिताः सामाजिक्यः विषमताः सन्ति। तिस्रः असमानताः कीदृश्यः सन्ति तथा च केन प्रकारेण राजनीतौ एतासाम् अभिव्यक्तिः भवति , इति विषये वयं क्रमशः चर्चां करिष्यामः । पुनश्च वयम् इमं विषयम् अवगन्तुम् अपि प्रयत्नं करिष्यामः यत् एतासाम् असमानतानाम् आश्रिताः पृथक् पृथक् अभिव्यक्तयः लोकतन्त्राय लाभकारिण्यः सन्ति उत हानिप्रदाः इति।

लैङ्गिक-प्रकरणानि राजनीतिः च

जुबान इति

स्त्रीशक्तेः उद्घोषकं बङ्गालस्य किञ्चित् भित्तिचित्रम्

कथनं रहस्योद्घाटनम्

श्रमस्य लैङ्गिकं विभाजनम् - कार्यविभाजनस्य कश्चित् एवंविधः प्रकारः यत्र गृहाभ्यन्तराणि सर्वाणि कार्याणि कुटुम्बस्य महिलाः एव कुर्वन्ति अथवा निजाधीनैः गृह्यसेवकैः सेविकाभिः च कारयन्ति।

आयान्तु, विषयस्य आरम्भं वयं लैङ्गिकी असमानता इत्यतः कुर्मः । सामाजिक्याः असमानतायाः इदं रूपं प्रत्येकस्मिन् स्थाने दृश्यते परन्तु राजनीतेः अध्ययने कदाचित् एव एतस्य विषयस्य अभिज्ञानं क्रियते। लैङ्गिकी असमानता स्वाभाविकी अस्ति अथवा प्राकृतिकी अपरिवर्तनीया च अस्ति इति मन्यते । परन्तु, लैङ्गिक्याः असमानतायाः आधारः स्त्रीपुरुषयोः जैविकी संरचना नैव अपि तु एतयोः द्वयोः विषये प्रचलिताः पारम्परिक-छवयः निश्चिताः सामाजिक्यः भूमिकाः च सन्ति।

राजनैतिक-विज्ञानस्य अस्मिन् पुस्तके वयं गृह्यकार्यस्य चर्चां किमर्थं कुर्मः ? किम् एषा राजनीतिः अस्ति ?

किमर्थं नैव ? यदि राजनीतेः अभिप्रायः सत्ता अस्ति तर्हि परिवारे पुरुषस्य प्रधानता अपि राजनीतिः इति मन्तव्या।

वैयक्तिकस्य सार्वजनिकस्य च विभाजनम्

बालकानां बालिकानां च पालनस्य पोषणस्य च क्रमे एव इयं भावना तेषां मनःसु दृढीक्रियते यत् महिलानां मुख्यं दायित्वं गृहस्थजीवन-सञ्चालनस्य अर्थात् बालानां पालनस्य पोषणस्य च कार्यं महिलानाम् अस्ति । अधिकतरेषु कुटुम्बेषु श्रमस्य लैङ्गिक-विभाजनेन इदं सर्वं परिलक्ष्यते । महिलाः गृहाभ्यन्तरीयं सर्वं कार्यं यथा – पाककार्यं, स्वच्छता, वस्त्रप्रक्षालनं, बालानां च पालनं पोषणं च इत्येतत् सर्वं कार्यं ताः सम्पादयन्ति, अपरञ्च पुरुषाः उपर्युक्तानि एतानि सर्वाणि कार्याणि न कुर्वन्ति ते बाह्यानि कार्याणि कुर्वन्ति । इत्थं नास्ति यत् पुरुषाः गृह्यकार्याणि न कर्तुं शक्नुवन्ति । वस्तुतः पुरुषाः चिन्तयन्ति यत् गृह्यकार्याणां सम्पादनं महिलानां दायित्वम् अस्ति । परन्तु वस्त्र-सीवन-कर्तन-प्रभृतीनि कार्याणि पुरुषाः गृहात् बहिर्भागं गत्वा कुर्वन्ति यतो हि ते एतैः कार्यैः धनम् अर्जयन्ति तस्मात् प्रसन्नतया एवंविधानि कार्याणि कुर्वन्ति । अधिकतराः सौचिकाः उपाहारगृहस्य च पाचकाः पुरुषाः भवन्ति। अनेन एव प्रकारेण महिलाः गृहात् बहिर्भागं गत्वा कार्याणां सम्पादनं न कुर्वन्ति तथा अपि नास्ति । ग्रामेषु स्त्रियः इन्धनानि आनेतुं क्षेत्रेषु च कार्यं कर्तुं गृहात् बहिर्भागं प्रति गच्छन्ति। नगरेषु वयं पश्यामः यत् काचित् विपन्ना स्त्री कस्मिंश्चित् मध्यमवर्गीये कुटुम्बे गृह्यसेविकायाः कार्यं करोति मध्यमवर्गीया च स्त्री कार्यार्थं कार्यालयं गच्छति । सत्यम् इदम् अस्ति यत् अधिकतराः महिलाः गृह्यकार्यम् अतिरिच्य धनार्जनाय किमपि कार्यं करोति परन्तु महिलानां कार्यम् अधिकं मूल्यवत् नास्ति इति मन्यते, अहोरात्रं कार्यं कृत्वा अपि महिलाः श्रेयः न प्राप्नुवन्ति।

श्रमस्य ईदृशस्य विभाजनस्य परिणामः अयम् अभवत् यत् महिलाः तु गृहस्य आभ्यन्तरे एव सङ्कीर्णतां गताः तथा च बाह्यं सार्वजनिक-जीवनं पुरुषैः अधिगृहीतम् । मनुष्यजातेः जनसङ्ख्यायां पुरुषाणाम् अपेक्षया महिलानाम्

अर्धा सहभागिता अस्ति परन्तु सार्वजनिके जीवने विशेषतः राजनीतौ तासां भूमिका नगण्या एव अस्ति। अधिकतराणां समाजानां सन्दर्भे उपर्युक्तः विचारः एव प्रवर्तते। पूर्वं पुरुषाः एव सार्वजनिक-सन्दर्भेषु सहभागितायाः मतदानस्य सार्वजनिक-पदानां निर्वाचन-प्रक्रियायाः च कृते योग्याः इति मन्यन्ते स्म। परन्तु शनैः शनैः राजनीतौ लैङ्गिक-विषयान् अधिकृत्य अपि चर्चा आरब्धा। संसारस्य पृथक् पृथक् भागेषु महिलाः सङ्घीभूताः जाताः, समानतायाः अधिकारं प्राप्तुं च जनान्दोलनम् अकुर्वन्। विभिन्नेषु देशेषु महिलाः अपि मतदान-प्रक्रियायां भागं स्वीकुर्युः एतदर्थं जनान्दोलनानि जातानि। आन्दोलनकारिणां याचना आसीत् यत् महिलाः राजनैतिक-वैधानिक-प्रक्रियासु पर्याप्तभागं गृह्णन्तु तथा च शिक्षा-प्राप्तेः वृत्तेः अवसराः अपि ताः विपुलतया प्राप्नुयुः इति ।

आदर्शस्त्रियः कानिचन रूपाणि ----

चिन्वन्तु , एतेषु भवत्यः काः सन्ति ?

स्वीये समुदाये आदर्शस्त्रियः विषये प्रचलिताः धारणाः अधिकृत्य चर्चयन्तु। किं भवन्तः एताभिः धारणाभिः सहमताः सन्ति ? यदि न सन्ति तर्हि ज्ञापयन्तु यत् आदर्शस्त्रियः विषये भवतां का धारणा अस्ति ?

जानन्ति इति ज्ञानम्?

महिलानां वर्तमानजीवन-शैल्याः परिवर्तनं स्यात् इति विषयम् आधारीकृत्य यानि आन्दोलनानि जातानि, तेषां माध्यमेन अभ्यर्थितं यत् वैयक्तिके कुटुम्बजीवने च अपि समानाधिकाराः महिलानां भवेयुः इति। एवंविधानि आन्दोलनानि नारीवादि-आन्दोलनानि इति उच्यन्ते।

लैङ्गिक-विभाजनस्य राजनैतिक-अभिव्यक्ति-विषयके च प्रश्ने या राजनैतिकी चर्चा जाता तया अपि सार्वजनिक-जीवने महिलानां भूमिकायाः विस्तारः कृतः। अद्य अनुसन्धानस्य चिकित्सायाः प्रबन्धनस्य अभियान्त्रिक्याः शिक्षायाः च क्षेत्रेषु नैकाः महिलाः कार्यं कुर्वत्यः दृश्यन्ते, पूर्वम् उपर्युक्तेषु क्षेत्रेषु महिलाः कार्यं कर्तुम् अर्हाः न सन्ति इति मन्यते स्म। विश्वस्य केषुचित् तद्यथा - स्वीडन-नार्वे-फिनलैण्ड-प्रभृतिषु स्कैण्डिनेनवियायी-देशेषु सार्वजनिकजीवने महिलानां सहभागितायाः स्तरः पर्याप्तरूपेण उन्नतः अस्ति।

स्वयं कुर्वन्तु, सम्यं शिक्षन्ताम्

देशस्य षट्सु राज्येषु समस्य उपयोगः इति विषयसम्बद्धं किञ्चित् सर्वेक्षणं कृतम्। तेन अवगतं यत् एका महिला सामान्यतः प्रतिदिनं सार्द्धसप्तहोराधिकं कालं यावत् कार्यं करोति अपरञ्च एतत् अपि अवगतं यत् पुरुषः प्रतिदिनं सार्द्ध-षड्-होराः यावत् कार्यं करोति। पुनरपि पुरुषैः कृतकार्यम् एव आधिक्येन दृश्यते यतो हि तेन धनस्य अर्जनं भवति। महिलाः अपि अप्रत्यक्षतः बहूनि एवंविधानि कार्याणि कुर्वन्ति यैः अपि आयः भवति परन्तु महिलानाम् अधिकतरं कार्यं गृहाभ्यन्तरे भवति। एतदर्थं ताः धनं न प्राप्नुवन्ति अतः महिलाभिः कृतं कार्यं जनैः न दृश्यते।

समयस्य उपयोगः दैनिक-होरात्मकस्य कलात्मकस्य च रूपेण

गतिविधयः	पुरुषाः	महिलाः
आयस्य दिनानि	6:00	2:40
गृह्यकार्याणि	0.30	5:00
वार्त्तालापः	1:25	1:20
अकार्यकालः	3:40	3:50
शयनं,शारीरिकशौचादिः,अध्ययनादिः	12:25	11:10

स्रोतः भारत-सर्वकारः,समयोपयोग-सर्वेक्षणम्, 1998-99

भवन्तः स्वीये कुटुम्बे अपि समस्य उपयोगः इति विषयस्य सर्वेक्षणं कर्तुं शक्नुवन्ति। निजकुटुम्बस्य सर्वेषां वयस्क-पुरुषाणां महिलानां च कार्यस्य सप्ताहपर्यन्तं निरीक्षणं कुर्वन्तु तथा च अङ्कयन्तु यत् निम्नलिखित-कार्येभ्यः प्रत्येकं जनः कियन्तं कालं व्ययीकरोति –

कार्यसूची इत्थम् अस्ति – कार्यालयस्य आपणस्य शिल्पशालायाः क्षेत्रस्य च कार्याय , गृह्यकार्याय यथा - पाकाय, सम्मार्जनाय पात्रप्रक्षालनाय वस्त्रप्रक्षालनाय जलस्य आनयनाय बालानां वृद्धानां च पोषणाय पालनाय च,अध्ययनाय, मनोरञ्जनाय,वार्त्तालापाय,शारीरिकस्वच्छतायै विश्रान्तये शयनाय च कियन्तं कालं व्ययी कुर्वन्ति। आवश्यकं स्यात् चेत् भवन्तः नवीनां श्रेणीम् अपि रचयितुं शक्नुवन्ति। एतेषु कार्येषु प्रत्येकं कार्याय यः कालः गच्छति तस्य आसप्ताहं योगं कुर्वन्तु तथा च पुनः सप्तसङ्ख्यया भागं दत्वा प्रत्येकं सदस्यस्य दैनिकं सामान्यकालं परिगणयन्तु (निष्कासयन्तु)। किं भवतां कुटुम्बे अपि महिलाः पुरुषाणाम् अपेक्षया अधिकं कार्यं कुर्वन्ति ?

कथनं रहस्योद्घाटनम्

नारीवादी – महिलानां पुरुषाणां च समानाधिकारेषु अवसरेषु च ये विश्वसन्ति एवंविधाः महिलाः पुरुषाः च।

अस्माकं देशे स्वतन्त्रतायाः परं महिलानां स्थितेः किञ्चित् संशोधनं जातं परन्तु ताः अधुना अपि पुरुषेभ्यः पश्चवर्तिन्यः सन्ति । अस्माकं समाजः अधुना अपि पितृ-प्रधानः अस्ति । महिलाः प्रति अधुना अपि अनेकप्रकारकाः भेदव्यवहाराः भवन्ति तासां च दमनम् अपि भवति –

- महिलानां साक्षरता-प्रतिशतम् अधुना अपि (54) चतुःपञ्चाशत् अस्ति, अपरञ्च पुरुषाणां (76) षड्सप्ततिप्रतिशतम् अस्ति । अनेन एव प्रकारेण याः बालिकाः विद्यालयीय-शिक्षां प्राप्नवत्यः तत्र च उत्तीर्णाः जाताः तादृश्यः सीमितसङ्ख्यया एव उच्चशिक्षां प्रति अग्रेसराः भवन्ति । यदा वयं विद्यालयीय-परीक्षाणां परिणामानां विषये सावधानं विचारयामः तर्हि अवगच्छामः यत् बहुत्र बालिकाः बालकानाम् अपेक्षया उन्नतस्थानानि प्राप्नवत्यः तथा च नैकस्थानेषु बालिकानां प्रदर्शनं बालकेभ्यः उत्तमः नास्ति परन्तु न्यूनम् अपि नास्ति । परन्तु उच्चशिक्षायाः द्वाराणि तासां कृते प्रायः पिहितानि भवन्ति यतो हि पितरौ निजसंसाधनानां व्ययं (प्रयोगं) समानरूपेण बालिकाबालकयोः न कर्तुम् इच्छन्ति ।
- एतस्मात् कारणात् अधुना अपि तादृशीनां महिलानां सङ्ख्या न्यूना एव अस्ति याः उच्चपदासीनाः अधिक-वेतनग्रहीत्र्यः च भवेयुः इति । भारते सामान्यतः काचित् स्त्री कस्यचित् पुरुषस्य अपेक्षया प्रतिदिनं एकहोरा अधिकं कार्यं करोति ।

किं भवन्तः एतस्मिन् मानचित्रे स्वीयं जनपदम् अन्वेष्टुं शक्नुवन्ति ? अस्मिन् जनपदे स्त्रीपुरुषयोः अनुपातः कियान् अस्ति ? भवन्तः इमम् अनुपातं पृथक् वर्णैः अङ्कित-जनपदेभ्यः कियन्तं न्यूनम् अथवा अधिकम् इति लभ्यन्ते ? तान् प्रान्तान् अभिजानन्तु यत्र बाल-लिङ्ग-अनुपातः 850 इति सङ्ख्यातः न्यूनः अस्ति ।

अग्रिमपृष्ठे प्रदत्तेन भित्तिचित्रेण सह एतस्य मानचित्रस्य तुलनां कुर्वन्तु । एते द्वे अपि कथम् अस्मान् एकस्याः एव घटनायाः विषये पृथक् पृथक् रूपेण बोधयन्ति ?

पितृ-प्रधानः – एतस्य पदस्य शाब्दिकः अर्थः तु पितुः शासनम् इति अस्ति परन्तु एतस्य पदस्य प्रयोगः महिलानाम् अपेक्षया पुरुषाणां महत्त्व-प्रतिपादिकायाः व्यवस्थायै अपि क्रियते ।

माता – सदैव बाह्यजनैः सह कथयति – ‘ अहं कार्यं न करोमि’ । अहं तु गृहिणी अस्मि । परन्तु अहं पश्यामि यत् सा निरन्तरं कार्यं करोति । यदि सा यत् करोति तत् कार्यं न उच्यते तर्हि पुनः किं कार्यम् उच्यते ?



2001 तमे वर्षे चत्वारि राज्यानि एतादृशानि आसन् यत्र प्रतिसहस्रं पुरुषेषु स्त्रीणां सङ्ख्या 800 तः अपि न्यूना आसीत् । पञ्जाब-हरियाणा-हिमाचल-प्रदेश-गुर्जर-प्रभृतिषु राज्येषु स्थितिः गभीरा अस्ति ।एतेषु राज्येषु बाल-लिङ्गानुपातः वेगेन विकलितः । एतेषु राज्येषु प्रतिसहस्रं बालकेषु बालिकानां सङ्ख्या 800 तः अपि न्यूना आसीत् । प्रतिसहस्रं बालकेषु 950 तः अधिकसङ्ख्यायुक्त-जनपदानां सङ्ख्या 1991 तमवर्षस्य अपेक्षया 2001 तमवर्षे न्यूना जाता ।

स्रोतः - एन्एफ्एच्

इदं मानचित्रं मापाधारितम् अस्ति ।

कथनं रहस्योद्घाटनम्

पितृ-प्रधानः – एतस्य पदस्य शाब्दिकः अर्थः तु पितुः शासनम् इति अस्ति परन्तु एतस्य पदस्य प्रयोगः महिलानां अपेक्षया पुरुषाणां महत्त्व-प्रतिपादिकायाः व्यवस्थायै अपि क्रियते ।



ऑक्सफेम-जी.बी.

परन्तु या महिला अधिकं कार्यं करोति सा धनं न प्राप्नोति अतः तया कृतं कार्यं मूल्यवत् न मन्यते।

- समान-श्रम-सम्बद्ध-अधिनियमे उक्तम् अस्ति यत् समानकार्यार्थं समान-पारिश्रमिकं दास्यते । वस्तुतः, कार्यस्य प्रत्येकस्मिन् क्षेत्रे अर्थात् क्रीडाजगतः प्रभृतिः चलच्चित्रगृहं यावत् तथा च शिल्पशालाभ्यः उद्योगागारेभ्यः प्रभृतिः कृषिक्षेत्रं यावत् महिलाः पुरुषाणाम् अपेक्षया न्यूनं पारिश्रमिकं प्राप्नुवन्ति, भवेत् स्त्रीपुरुषयोः कार्यं समानं परन्तु पारिश्रमिकं तु समानं न भवति।
- भारतस्य अनेकभागेषु पितरौ केवलं पुत्रस्य काङ्क्षिणौ भवतः । पुत्र्याः जन्मनः प्राक् एव तस्य हननम् एतादृश्याः मानसिकतायाः परिणामरूपेण अस्ति । कन्या-भ्रूण-हत्यायाः कारणात् देशे लिङ्गानुपातः (प्रति सहस्रं बालकेषु बालिकानां सङ्ख्या) विकलय्य 850, क्वचित् च 800 सङ्ख्यातः अपि अधः अगच्छत्।

महिलानाम् उत्पीडनस्य शोषणस्य हिंसायाः च वार्त्ताः वयं प्रतिदिनं शृणुमः । नागर-क्षेत्राणि तु महिलाभ्यः विशेषतया अरक्षिताः सन्ति । ताः निजगृहेषु अपि सुरक्षिताः न सन्ति, यतो हि तत्र अपि ताभिः गृह्यहिंसा मानसिकः क्लेशः च सोढव्यः भवति।

भारते महिलानां प्रतिनिधित्वम् अत्यल्पम् अस्ति। किं भवन्तः कानिचन कारणानि एतस्मिन् सन्दर्भे उपस्थापयितुं शक्नुवन्ति ? किं भवन्तः मन्यन्ते यत् अमेरिकायां यूरोपे च महिलानां प्रतिनिधित्वम् एतत् स्तरं यावत् प्राप्नोत् यत् तत् सन्तोषजनकम् इति वक्तुं शक्येत ?

विश्वस्य विभिन्न-क्षेत्राणां राष्ट्रिय-संसत्सु महिलानां सङ्ख्या-प्रतिशतम् (%)



यूरोपः- ओ.एस.सी.ई (आर्गेनाइजेशन फॉर सिक्युरिटी एण्ड कोऑपरेशन इन यूरोपः)नार्डिकदेशानां (डेनमार्कः, फिनलैण्डः, आयसलैण्डः, नॉर्वे स्वीडनः च) इत्येतान् परित्यज्य ओ.एस.सी.ई सदस्यदेशाः

टिप्पणी - एतत् विवरणं 31 दिसम्बर् 2011 पर्यन्तं प्रत्यक्षरूपेण निर्वाचितसदनेषु महिलानां प्रतिशतस्थितिं सूचयन्ति।

स्रोतांसि : www.ipu.org/winn-e/world.htm

महिलानां राजनैतिकं प्रतिनिधित्वम्

इदं किञ्चित् अपि गुप्तं तथ्यं नास्ति यत् महिलानां हिताय समानतायै च ये विषयाः सन्ति तेषां विषये पर्याप्तावधानं न कृतम् । एतस्मात् कारणात् एव विभिन्नाः नारीवादिनः समूहाः महिलान्दोलन-कर्तारः च विषयस्य सारभूतं तत्त्वम् अवगतवन्तः यत् यावत् महिलानां सत्तायाः नियन्त्रणं न स्यात् तावत् अस्याः समस्याः समाधानं न भवेत् । एतस्य लक्ष्यस्य प्राप्तये कश्चित् उपायः अयम् अस्ति यत् जनताद्वारा चितेषु प्रतिनिधिषु महिलानां सहभागितायाः वर्धनं विस्तारः च भवेत् इति ।

भारतस्य विधायिकायां महिला-प्रतिनिधीनां सङ्ख्यायाः अनुपातः अतीव न्यूनः अस्ति । यथा, लोकसभायां महिला-सांसदानां सङ्ख्या प्रथमवारं 2009 तमे वर्षे दशप्रतिशतात् अधिका जाता । राज्यानां विधानसभासु महिलानां प्रतिनिधित्वं पञ्चप्रतिशतात् अपि न्यूनम् अस्ति । एतस्मिन् विषये भारतस्य क्रमाङ्कः विश्वस्य देशेषु अधस्तनसोपाने अस्ति। (चतुश्चत्वारिंशत् पृष्ठं पश्यन्तु)। भारतदेशः एतस्मिन् विषये अफ्रीकायाः लातिनामेरीकायाः च नैकेभ्यः विकासशीलदेशेभ्यः अपि पश्चवर्ती अस्ति । कदाचित् काचित् महिला प्रधानमन्त्रिणः अथवा मुख्यमन्त्रिणः च पदम् आरूढवती परन्तु मन्त्रिपरिषदि महिलानाम् एव वर्चस्वम् अस्ति ।

उपर्युक्तायाः समस्यायाः समाधानस्य कश्चित् उपायः तु निर्वाचित-संस्थासु महिलाभ्यः वैधानिकरूपेण समुचितभागस्य निश्चयीकरणम् अस्ति । भारतदेशे पञ्चायती-राज-संस्थानाम् अन्तर्गता काचित् एवंविधा व्यवस्था एव कल्पिता अस्ति । स्थानीय-सर्वकारीय-संस्थासु अर्थात् पञ्चायत्त-संस्थासु नगरपालिकासु च तृतीयांशत्वेन पदानि महिलानां कृते आरक्षितानि सन्ति । अद्य भारतस्य ग्रामीणेषु नागर-स्थानीय-निकायेषु निर्वाचित-महिलानां सङ्ख्या दशलक्षतः अपि अधिका अस्ति ।

महिलासङ्घटनानां महिलाकार्यकर्तृणां च अभ्यर्थनम् अस्ति यत् लोकसभायां राज्यविधान-सभासु अपि तृतीयांशरूपेण पदानि महिलानां कृते आरक्षितानि भवेयुः । संसदि एवंविधः कश्चन विधेयकः अपि प्रस्तुतः आसीत् परन्तु दशाधिकवर्षेभ्यः सः लम्बितः अस्ति । सर्वाणि राजनैतिक-दलानि इमं विधेयकम् अधिकृत्य एकमताः न सन्ति तस्मात् एषः विधेयकः न उत्तीर्णतां प्राप्नोत् ।

लैङ्गिक-विभाजनम् एतस्य तथ्यस्य पक्षे उदाहरणरूपेण अस्ति यत् कानिचन विशिष्टप्रकारकाणि सामाजिक-विभाजनानि राजनैतिक-रूपं प्राप्नुयुः इति आवश्यकम् अस्ति । एतेन इदम् अपि अवगम्यते यत् यदा सामजिक-विभाजनं किञ्चित् राजनैतिक-विषयरूपेण समुपस्थितं भवति तदा वञ्चितसमूहाः कथं लाभान्विताः भवन्ति । किं भवन्तः अनुभवन्ति यत् यदि महिलाः प्रति भेदभाव-पूर्णस्य व्यवहारस्य विषयः राजनैतिकरूपेण उपस्थितः न अभविष्यत् तर्हि किं महिलाः लाभान्विताः न भवितुं शक्नुवन्ति स्म ?

यदि जातिवादः सम्प्रदायवादः च अनुचितः अस्ति तर्हि नारीवादः कथम् उचितः अस्ति ? वयं जातेः धर्मस्य अथवा लिङ्गस्य च आधारेण समाजस्य वण्टनाय प्रत्येकं विषयस्य विरोधं किमर्थं न कुर्मः ?

चिन्तां मा कुरु ! वयं भवतां समस्यायाः किमपि समाधानं निश्चयेन करिष्यामः ------



सौन्दर्य, द हिन्दू

अनेन व्यङ्ग्यचित्रेण प्रतिपाद्यते यत् महिला-आरक्षण-विधेयकः संसदि किमर्थम् उत्तीर्णतां न प्राप्नोत् । किं भवन्तः अनेन दृष्टिकोणेन एकमताः सन्ति ?

धर्मः, साम्प्रदायिकता राजनीतिः

कथनं रहस्योद्घाटनम्

पारिवारिकः अधिनियमः– विवाहः, सम्बन्धविच्छेदः क्रोडीकृतःधर्मपुत्रः, उत्तराधिकारः च इत्येतैः सम्बद्धः पारिवारिक-सन्दर्भस्य अधिनियमः। अस्माकं भारतदेशे सर्वेषां सम्प्रदायानां कृते पृथक् पृथक् पारिवारिकाः अधिनियमाः सन्ति।



आयान्तु, अधुना सर्वथा पृथक् सामाजिक-विभाजनस्य चर्चां कुर्मः अर्थात् धार्मिक-भिन्नता-आधारितस्य विभाजनस्य विषये विचारं कुर्मः। इदं विभाजनं लैङ्गिस्य विभाजनस्य इव सार्वभौमिकरूपेण तु नास्ति परन्तु विश्वे धार्मिकी विभिन्नता अद्य अतीव व्यापकरूपं धरति। भारतसहितेषु नैकदेशेषु पृथक् पृथक् धर्मावलम्बिनः जनाः निवसन्ति परन्तु यथा अस्माभिः उत्तर-आयरलैण्डस्य विषये दृष्टम्, यदि जनाः समानं धर्मम् अवलम्बन्तां तथा च तेषां पूजायाः पद्धतिः मान्यताः च पृथक् पृथक् स्युः तदा अपि गभीरः मतभेदः उत्पद्यते। लैङ्गिकस्य विभाजनस्य विपरीतं धार्मिक-विभाजनं प्रायः राजनीतिक्षेत्रे अभ्यनक्ति।

किञ्चित् एतानि तथ्यानि सावधानं पठन्तु –

- गान्धी कथयति स्म यत् धर्मः कदाचित् अपि राजनीतितः पृथक् न कर्तुं शक्यते। धर्म इति शब्देन तस्य अभिप्रायः हिन्दु-इस्लामप्रभृतिभ्यः धर्मेभ्यः नासीत् अपितु नैतिकमूल्यैः आसीत् यानि सर्वैः धर्मैः सम्बद्धानि सन्ति। गान्धिनः कथनम् आसीत् यत् राजनीतिः धर्मद्वारा स्थापित-मूल्यैः निर्देशिता स्यात्।
- निजदेशस्य मानवाधिकार-समूहानां कथनम् आसीत् यत् अस्मिन् देशे सांप्रदायिक-उपद्रवेषु मृतकाः अधिकतराः जनाः अल्पसङ्ख्यक-समुदायानां सन्ति। अल्पसङ्ख्यकानाम् अभ्यर्थनम् अस्ति यत् सर्वकारः तेषां रक्षायै विशिष्टप्रयासान् कुर्यात्।
- महिला-आन्दोलनस्य कार्यकर्तृणां कथनम् अस्ति यत् सर्वेषु धर्मेषु वर्णिताः पारिवारिक-अधिनियमाः महिलाः भेदभावनया पश्यन्ति। आन्दोलनस्य प्रार्थनाविषयः अस्ति यत् सर्वकारेण तथा करणीयं यथा एते अधिनियमाः समतामूलकाः स्युः अतः एतेषां परिवर्तनम् आवश्यकम् अस्ति।

एते सर्वे विषयाः धार्मिकाः राजनैतिकाः च सन्ति परन्तु एते सर्वथा अनुचिताः अथवा भयानकाः इत्यपि न प्रतिभाव्यन्ते। विभिन्नैः धर्माचार्यैः समुपस्थापिताः विचाराः आदर्शाः मूल्यानि च राजनीतौ सहायकानि भवितुं शक्नुवन्ति। धार्मिकसमुदायस्य रूपेण जनाः निजावश्यकताः हित-सम्बद्धविचारान् प्रार्थनाविषयान् च राजनैतिकजनानां समक्षे उपस्थापयितुम् अधिकृताः भवेयुः।

अहं धार्मिका नास्मि,
मया साम्प्रदायिकतायाः
धर्मनिरपेक्षतायाः च
चिन्ता किमर्थं करणीया ?

ये जनाः राजनैतिक-सत्तायां स्युः ते धर्मसम्बद्ध-कार्यस्य अपि परिशीलनं कुर्युः तथा च धार्मिकाधारेण कोऽपि जनः केनापि सह भेदपूर्ण-दृष्ट्या व्यवहरति अथवा कस्यापि दमनस्य अनुमोदनं करोति तर्हि सः वारणीयः । यदि प्रशासनिकाः जनाः सर्वेषां धर्माणां जनैः सह समानतया व्यवहरन्ति तर्हि तैः क्रियमाणानाम् एवंविधानां कार्याणां कोऽपि आलोचनां न करोति ।

साम्प्रदायिकता

समस्यायाः आरम्भः तदा भवति यदा धर्मः एव राष्ट्रस्य आधारः इति मन्यते । गताध्यायस्य उत्तर-आयरलैण्डस्य उदाहरणेन राष्ट्रवादस्य एवंविध-अवधारण-सम्बद्ध-भयानि दर्शयन्ते । समस्या तदा विकरालरूपं धरति यदा राजनीतौ धर्मस्य अभिव्यक्तिः कस्यचित् समुदायस्य विशिष्टतायाः प्रतिज्ञायाः पक्षपोषणस्य च रूपं गृह्णाति तथा च एकस्य धर्मस्य अनुयायिनः अन्यधर्मस्य अनुयायिनः विरुध्य आन्दोलनस्य आरम्भं कुर्वन्ति । इत्थं तदा भवति यदा एकस्य धर्मस्य विचाराः अन्यधर्मस्य विचारेभ्यः श्रेष्ठाः इति मन्यन्ते । तथा च कस्यचित् धार्मिक-समूहस्य प्रार्थनाविषयः अन्यधर्मस्य अवमानना इति भवति । एतस्यां प्रक्रियायां यदा राज्यं निजसत्तायाः प्रयोगं कस्यचित् एकस्य धर्मस्य पक्षे कर्तुम् आरभते तदा स्थितिः इतोऽपि विकटा जायते । राजनीत्या सह धर्मस्य एतादृशः सम्बन्धः एव साम्प्रदायिकता अस्ति ।

साम्प्रदायिक-राजनीतेः आधारः एवंविधं चिन्तनं भवति यत् धर्मः एव सामाजिक-समुदायस्य निर्माणं करोति । एतस्याः मान्यतायाः अनुकूलचिन्तनम् एव साम्प्रदायिकता अस्ति । एतस्य चिन्तनस्य अनुसारं कस्मिंश्चित् विशिष्टे धर्मे आस्थावन्तः जनाः समानस्य एव समुदायस्य भवन्ति । तेषां मौलिक-हितानि सदृशानि भवन्ति तथा च समुदायस्य जनानां पारस्परिक-मतभेदाः सामुदायिकजीवने किमपि महत्त्वं न दधते । एवंविधे चिन्तने इदं तथ्यम् अपि सम्मिलितम् अस्ति यत् केचन पृथक् धर्मावलम्बिनः जनाः अपरस्य सामाजिक-समुदायस्य भागरूपेण न भवितुं शक्नुवन्ति, यदि विभिन्न-धर्मावलम्बिनां जनानां चिन्तने कापि समानता न दृश्यते तर्हि ते असत्यनिष्ठाः इति मन्यन्ते । पृथक् पृथक् धर्माणां जनानां हितसम्बद्धाः विषयाः तु पृथक् पृथक् एव भविष्यन्ति परस्परं च सङ्घर्षः अपि तत्र भविष्यति एव । साम्प्रदायिक-चिन्तनेन यदा वर्ध्यते तदा तत्र एतस्य विचारस्य अपि समावेशः भवति यत् अन्येषां धर्माणाम् अनुयायिनः एकस्मिन् एव राष्ट्रे समान-नागरस्य रूपेण न स्थातुं शक्नुवन्ति । एतादृश्याः मानसिकतायाः अनुसारं कस्यचित् एकस्य समुदायस्य जनैः अन्यसमुदायस्य वर्चस्वि-जनैः सह स्थातव्यं भविष्यति अथवा पुनः तेषां कृते पृथक् राष्ट्रस्य निर्माणं करणीयं भविष्यति ।

इयं मान्यता आधारभूतरूपेण अनुचिता अस्ति कस्यचित् एकस्य धर्मस्य जनानां हितानि आकाङ्क्षाः च प्रत्येकस्मिन् विषये समानाः स्युः – इति न सम्भवति । प्रत्येकं जनः अनेकविधाः भूमिकाः निर्वहति । तस्य सामर्थ्यम् अभिज्ञानं च पृथक् पृथक् भवति । प्रत्येकस्मिन् अपि समुदाये पृथक् पृथक् विचारसम्पन्नाः जनाः भवन्ति । प्रत्येकं निजविचारं प्रस्तौतुम् अधिकारी अस्ति अतः समानधर्मिणां जनानाम् अपरधर्मिणां जनानाम् इव दर्शनं तस्य समुदायस्य विभिन्न-विचाराणाम् अभिभवनम् अस्ति ।

साम्प्रदायिकता राजनीतौ नैकरूपाणि धर्तुं शक्नोति –

- साम्प्रदायिकतायाः सर्वोच्चसामान्या अभिव्यक्तिः दैनिकजीवने एव लक्ष्यते । एतस्याम् धार्मिक-पूर्वाग्रहस्य धार्मिकाणां समुदायानां विषये पूर्वकल्पिताः धारणाः तथा च एकः धर्मः अपरधर्मात् श्रेष्ठः अस्ति इत्येतादृश्यः मान्यताः सम्मिलिताः सन्ति । एताः घटनाः यावत्यः सामान्याः सन्ति यत् प्रायः वयं तासां विषये सावधानाः न भवामः अपरञ्च अस्माकम् आत्मनि एव विराजन्ते ।
- साम्प्रदायिक-चिन्तनं प्रायः स्वीयस्य धार्मिक-समुदायस्य राजनीतिक-प्रभुत्वं स्थापयितुम् अवसरम् अन्विष्यति । ये जनाः बहुसङ्ख्यक-समुदायस्य भवन्ति तेषाम् ईदृशं चिन्तनं बहुसङ्ख्यक-वादस्य रूपं गृह्णाति । साम्प्रदायिक-चिन्तनत्वात् ये अल्पसङ्ख्यक-समुदायस्य भवन्ति ते पृथक् राजनैतिकदलं निर्मातुम् इच्छन्ति ।

अहं प्रायः अन्येषां धर्मावलम्बिजनानां विषये हास्यकणिकाः श्रावयामि । किम् एतस्मात् अहम् अपि साम्प्रदायिकः भवामि ?



- साम्प्रदायिकेन आधारेण राजनैतिक-लाभ-स्वीकरणं साम्प्रदायिकतायाः अपरं रूपम् अस्ति । साम्प्रदायिकताम् आधारीकृत्य धर्मस्य पवित्र-प्रतीकानां धर्मगुरूणां च उपयोगः क्रियते तथा च भावनात्मकं निवेदनं कृत्वा स्वजनानां मनस्सु भयस्य उत्पादनम् इति एतत् उपर्युक्तं सर्वम् अपि सामान्यरूपेण दृश्यते। निर्वाचनीय-राजनीतौ कस्यचित् एकस्य धर्मस्य मतदातृणां भावनानां हित-सम्बद्ध-विषयाणां च उपस्थानम् इत्येतादृशाः उपायाः प्रायः अङ्गीक्रियन्ते।
- कदाचित् साम्प्रदायिकता निकृष्टतमं रूपं प्राप्य सम्प्रदायस्य आधारेण हिंसायाः उपद्रवस्य नरसंहारस्य च समर्थनं करोति । विभाजनस्य काले भारतस्य पाकिस्तानस्य च मध्ये भयावहाः साम्प्रदायिकोपद्रवाः जाताः । स्वतन्त्रतायाः परम् अपि अत्यधिका साम्प्रदायिकी हिंसा प्रवृत्ता।

धर्मनिरपेक्ष-शासनम्

साम्प्रदायिकता अस्माकं देशस्य लोकतन्त्राय व्यापकाह्वानरूपेण चिरकालात् आसीत्। अस्माकं संविधान-निर्मातारः एतत् आह्वानं प्रति सावधानाः आसन् । एतस्मात् कारणात् एव ते धर्मनिरपेक्ष-शासनस्य प्रारूपं चितवन्तः अनेन एव च आधारेण संविधाने नैकानि प्रावधानानि कृतानि एतेषां विषये वयं गताध्याये पठितवन्तः ।

- भारतीय-राज्येन कश्चित् अपि धर्मः राजकीयधर्मरूपेण न स्वीकृतः । श्रीलङ्कायां बौद्धधर्मस्य पाकिस्ताने इस्लामस्य इङ्ग्लैण्डे च ख्रिस्तधर्मस्य यत् स्थानम् अस्ति एतेषां विपरीतं भारतस्य संविधानेन न कस्मैचित् अपि धर्माय विशिष्टं स्थानं दत्तम्।
- कमपि धर्मम् अनुपालयितुं प्रचारयितुं च भारतीयसंविधानं सर्वेषां नागरेभ्यः समुदायेभ्यः च स्वतन्त्रतां यच्छति।
- संविधानं धर्मस्य आधारेण क्रियमाणं सर्वविधम् अपि भेदभावम् असंवैधानिकम् इति घोषयति।

● संविधानं धार्मिकसमुदायेषु समानतां सुनिश्चेतुं शासनाय एतादृशम् अधिकारं दत्तवत् यत् शासनं धार्मिकविषयेषु हस्तक्षेपं कर्तुं शक्नुयात् । यथा – संविधानद्वारा अस्पृश्यतायाः अनुमतिः न कस्मै अपि दीयते ।

अनया दृष्ट्या पश्यामः चेत् धर्मनिरपेक्षता केषाञ्चित् दलानां जनानां च विचारधारा-मात्रं न अस्ति । एते विचाराः अस्माकं संविधानस्य आधारभूताः सन्ति । साम्प्रदायिकता भारते केवलं केषाञ्चित् जनानां कृते एव भीतिः नास्ति । इयं भारतस्य आधारभूत-अवधारणायै अपि आह्वानम् अस्ति, भीतिः अस्ति । भारतीयसंविधानम् इव धर्मनिरपेक्ष-संविधानम् आवश्यकम् अस्ति परन्तु संविधानबलेन एव साम्प्रदायिकरूपेण आह्वानेन सह न स्पर्धितुं शक्यते । अस्माभिः निजे दैनिके जीवने साम्प्रदायिक-पूर्वाग्रहाणां दुष्प्रचाराणां च नाशाय सङ्घर्षः करणीयः स्यात् तथा च धर्माधारितस्य प्राप्यमाणस्य लाभस्य नाशाय अपि सङ्घर्षः राजनैतिकपरिधौ करणीयः इत्यपि आवश्यकम् अस्ति ।

जातिः राजनीतिः च

अस्माभिः राजनीतौ सामाजिक-विभाजनस्य द्वे अभिव्यक्ती दृष्टे । एतयोः एका स्थूलरूपेण सकारात्मिकी लाभप्रदा च अस्ति अपरा च नकारात्मिकी हानिप्रदा च अस्ति । आयान्तु, अधुना अन्तिमस्य प्रमुख-विभाजनस्य अर्थात् जातेः राजनीतेः च चर्चां कुर्मः एतस्य सकारात्मकः नकारात्मकः च द्वौ अपि पक्षौ स्तः ।

जातिगताः असमानताः

लिङ्गस्य धर्मस्य च आधारेण विभाजनं तु सम्पूर्णे संसारे अस्ति परन्तु जातेः आधारित-विभाजनं केवलं भारतीय-समाजे एव दृश्यते । प्रत्येकेषु समाजेषु काश्चन सामाजिक्यः असमानताः कस्यचित् अपि प्रकारस्य श्रम-विभाजनं तु विद्यमानं भवति । अधिकतरेषु समाजेषु व्यवसायः वंशानुक्रमेण अपरवंशानुक्रमं प्रति गच्छति । परन्तु जातिव्यवस्था एतस्य किञ्चित् अतिवादि स्थायिरूपं च अस्ति । अन्यसमाजेषु विद्यमानाभ्यः असमानताभ्यः इयं जातिव्यवस्था विशिष्टप्रकारेण पृथक् अस्ति । अत्र व्यवसायस्य वंशानुगत-

अजीत-नीनन,द-टाइम्स ऑफ इण्डिया

इयम् आसन्दिका तस्मै अस्ति यः मुख्यमन्त्रिपदम् अलङ्करिष्यति यतः सः स्वीयं धर्मनिरपेक्षता-भावं प्रमाणीकुर्यात्---- अत्र महत् प्रणोदनं भविष्यति ----

विभाजनं रीतीनां परम्पराणां च रूपेण अस्ति । कस्यचित् जातिवर्गस्य जनाः समान-व्यवसायानां तु भवन्ति एव परन्तु सहैव ते पृथक् पृथक् सामाजिक-समुदायस्य रूपेण अपि दृश्यन्ते । तेषु परस्परम् एव विवाह-विधिः भुक्ति-पीति-विधिः च भवति । अन्य-जातीयवर्गेषु तेषां सन्ततीनां न तु विवाहः शक्यते न च महत्त्वपूर्णेषु पारिवारिकेषु सामाजिकेषु च आयोजनेषु तेषां पङ्क्तौ अर्थात् तैः सह उपविश्य भिन्नजातीयाः जनाः भोजनं कर्तुं शक्नुवन्ति ।

वर्ण-व्यवस्था पृथक् जातीयैः जनैः सह भेदभावनया व्यहरन्ति आत्मानं च तेभ्यः पृथक् मन्यन्ते इत्येवं चिन्तनं वर्णव्यवस्थायाम् आधाररूपेण अस्ति। ये ब्राह्मणादयः सुवर्णाः आसन् तैः अंत्यजैः अर्थात् शूद्रादिभिः सह अस्पृश्यता-पूर्णः व्यवहारः क्रियते स्म । एतस्य विषयस्य चर्चा अस्माभिः नवमकक्षायाम् अपि कृता आसीत् । इदम् एव कारणम् आसीत् यत् ज्योतिबाफुले-महात्मगान्धि-डॉ.आम्बेडकर-पेरियाररामास्वामि-नायकर-प्रभृतयः नेतारः समाजपरिवर्तकाः च जातिगत-भेदभावनाभ्यः मुक्तायाः समाजव्यवस्थायाः विषये चर्चां कार्यं च अकुर्वन् ।

कथनं रहस्योद्घाटनम्

वर्ण-व्यवस्था – जाति-समूहानां पदानुक्रमः यत्र समानजातीयाः जनाः कथमपि सामाजिक-सोपान-क्रमे सर्वोच्चस्थाने भवन्ति तथा च केचन अन्यजातीयाः जनाः क्रमागतरूपेण तेषाम् अधः भवन्ति ।

भारतस्य सामाजिकी धार्मिकी च विविधता

जनगणनायां प्रत्येकेभ्यः दशवर्षेभ्यः परं सर्वेषां नागराणां धर्माः अपि अङ्क्यन्ते । जनगणना-विभागस्य अधिकारिणः कर्मचारिणः च प्रतिगृहं गत्वा जनान् तेषां विषये पृच्छन्ति अनेन प्रकारेण ते जनानां विषये सूचनाः एकत्रीकुर्वन्ति । धर्मसहितेषु सर्वेषु विषयेषु यत्किमपि जनाः सूचयन्ति, तदेव प्रपत्रे उल्लिख्यते । यदि कश्चित् कथयति यत् सः नास्तिकः अस्ति अथवा कस्यचित् अपि धर्मस्य अनुसरणं न करोति तदा प्रपत्रे अपि तत्सम्बद्ध-विवरणं दीयते । अनेन कारणेन देशे विभिन्नानां धर्मावलम्बिनां जनानां सङ्ख्या तेषां सङ्ख्यायां च जातस्य परिवर्तनस्य विषये अस्माकं पार्श्वे विश्वसनीयाः सूचनाः सन्ति । अधः प्रदत्त-विवरण-तालिकया देशस्य प्रमुखाणां धार्मिक-समुदायानां जनसङ्ख्यायाः विषये सूच्यते ।

स्वतन्त्रतायाः परं प्रत्येकं धार्मिक-समूहस्य जनसङ्ख्या तु विपुलतया वर्धिता अस्ति परन्तु सम्पूर्ण-जनसङ्ख्यायां तेषाम् अनुपातः आधिक्येन न परिवर्तितः । प्रतिशत-दृष्ट्या पश्यामः चेत् 1961 तमवर्षात् हिन्दु-जैन-ख्रिस्त-समुदायस्य च भागः स्वल्परूपेण विकलितः अस्ति अपरञ्च मुस्लिम-सिख-बौद्धानां च भागप्रतिशतं स्वल्पतया वर्धितम् अस्ति ।

काचित् सामान्या परन्तु भ्रान्तधारणा इयम् अस्ति यत् देशस्य जनसङ्ख्यायां मुस्लिमजनानां सङ्ख्याप्रतिशतम् एतावत् वर्धिष्यते यत् तेषाम् अपेक्षया अन्येषां धार्मिकसमुदायानां सङ्ख्याप्रतिशतं न्यूनं भविष्यति । प्रधानमन्त्रिद्वारा नियुक्तायाः उच्चस्तरीय-समित्याः आकलनस्य अनुसारं स्पष्टीभवति यत् मुस्लिम-जनसङ्ख्यायाः अनुपातः स्वल्पम् अवश्यं वर्धिष्यते परन्तु अग्रिमैः पञ्चाशत् वर्षैः अपि वर्धनं त्रिचतुःप्रतिशतम् एव भविष्यति । एतस्मात् प्रमाणीभवति यत् कस्मिंश्चित् व्यापकफलके विभिन्न-धार्मिक-समुदायानाम् अनुपाते किञ्चित् महत् परिवर्तनं न भविष्यति ।

उपयुक्तं तथ्यम् एव प्रमुख-जाति-समूहानां विषये अपि प्रवर्तते । जनगणनायां केवलं द्वयोः विशिष्टसमूहयोः तद्यथा – अनुसूचितजातेः अनुसूचित-जनजातेः च गणना पृथक्तया अङ्क्यते । एतयोः द्वयोः महतोः समूहयोः एतादृश्यः शताधिकाः जातयः आदिवासिसमूहाः च सम्मिलिताः सन्ति येषां नामानि सर्वकारीय-अनुसूच्याम् उल्लिखितानि सन्ति । एतस्मात् एव एतेषां नामभिः सह अनुसूचित इति शब्दः योजितः अस्ति । अनुसूचित-जातिषु ये सामान्यतः दलितः इति पदेन आहूयन्ते, सामान्यतः तत्र तादृशीनां हिन्दुजातीनां समावेशः अस्ति याः हिन्दु-सामाजिक-व्यवस्थायाम् अस्पृश्याः इति मन्यन्ते स्म । एताभिः जातिभिः सह भेदपूर्ण-व्यवहारः क्रियते स्म तथा च तिरस्कारदृष्ट्या तद्जातीयाः दृश्यन्ते स्म । अनुसूचित-जनजातिषु सामान्यतः ते जनाः सम्मिलिताः सन्ति ये आदिवासिनः इति कथ्यन्ते, आदिवासिनः प्रायः पर्वतीय-क्षेत्रेषु वनक्षेत्रेषु च निवसन्ति येषां च अन्यसमाजस्य जनैः सह अधिकः व्यवहारः मेलनं च न आसीत् । 2001 तमे वर्षे देशस्य जनसङ्ख्यायाम् अनुसूचितजातीनां भागः 16.2 प्रतिशतं अनुसूचित-जनजातीनां च भागः 8.2 प्रतिशतम् आसीत् ।

जनगणनायाम् अधुनापर्यन्तम् अन्यासां पश्चवर्ति-जातीनां गणना न क्रियते । एतादृशीनां जातीनां विषयिणी चर्चा अस्माभिः नवमकक्षायां कृता आसीत् । सम्पूर्णे देशे एतासां जनसङ्ख्या कियती अस्ति – एतस्य तथ्यस्य सन्दर्भे स्पष्टा ऊहा नास्ति । राष्ट्रिय-प्रतिरूप-सर्वक्षणं, 2004-05 अनुसारम् अनुमीयते यत् एतासां जनसङ्ख्याः प्रायः 41 प्रतिशतम् अस्ति । अनेन प्रकारेण देशस्य जनसङ्ख्यायाम् अनुसूचित-जातीयानाम् अनुसूचित-जनजातीयानां च जनानाम् अन्यपश्चवर्तिजातीयानां च भागः प्रायः 2/4 इति तथा च हिन्दुजनानां जनसङ्ख्यायाः प्रायः ¾ इति भागः अस्ति ।

भारते विभिन्नानां धार्मिक-समूहानां जनसङ्ख्या, 2001



अन्येषु सम्मिलिताः सन्ति – बौद्धाः – 0.8 % ,जैनाः – 0.4%, अन्ये धर्माः – 0.6%, कस्यापि धर्मस्य न सन्ति – 0.1 %

स्रोतः – जनगणना, 2001

एतेषां महापुरुषाणां प्रयासैः सामाजिकानाम् आर्थिकानां च परिवर्तनानां कारणात् आधुनिके भारते जातेः संरचनायाः जातेः व्यवस्थायाः च महत् परिवर्तनम् अभवत् । आर्थिक-विकासेन नागरीकरणेन साक्षरतया शिक्षाविकासेन व्यवसाय-चयनस्य स्वतन्त्रतया ग्रामेषु च भूस्वामित्व-व्यवस्थायाः निर्बलीकरणेन जातिव्यवस्थायाः पुरातनस्वरूपस्य वर्णव्यवस्थाश्रित-मानसिकतायाः च परिवर्तनं भवति । नागरक्षेत्रेषु च अधुना आधिक्येन एतत् न अवलोक्यते यत् रेलयाने अथवा बसयाने भवद्भिः सह कस्याः जातेः जनः उपविष्टः अस्ति अथवा उपाहारगृहे कः एकस्याम् उत्पीठिकायां परिवेषित-भोजनं करोति । संविधाने सर्वविधस्य जातिगत-भेदभावस्य निषेधः कृतः अस्ति । संविधाने जातिव्यवस्थायाः उत्पन्नस्य अन्यायस्य समाप्तये नीतयः कल्पिताः तासाम् आधारेण निश्चयः कृतः अस्ति । यदि कश्चित् एतादृशः जनः यः शतं वर्षेभ्यः पूर्वं भारते जातः आसीत् अधुना पुनः भारतम् आगच्छेत् तर्हि अत्र जातानि परिवर्तनानि दृष्ट्वा आश्चर्यान्वितः भविष्यति ।

वस्तुतस्तु, समकालिक-भारतात् जातिप्रथा सर्वथा लुप्ता नास्ति । जातिव्यवस्थायाः केचन पुरातन-पक्षाः अधुना अपि विद्यमानाः सन्ति । अधुना अपि अधिकतराः जनाः निज-जातौ कुटुम्बे समुदाये वा विवाहं कुर्वन्ति । स्पष्टतया संवैधानिकं प्रावधानम् अस्ति तथापि अस्पृश्यता-प्रथा अधुना सर्वथा न नष्टा । जातिव्यवस्थायाः अन्तर्गतं शताब्दीभ्यः केचन समूहाः लाभस्थितौ केचन च अधुना अपि अभिभूय वर्तन्ते । जातिप्रथायाः प्रभावः शताब्दीभ्यः परम् अद्यापि दृश्यते । येषु जातीयेषु आदितः एव अध्ययनस्य अध्यापनस्य च प्रचलनं परम्परा वा आसीत् तथा च ये समीचीनतया शिक्षिताः आसन्, आधुनिकशिक्षा-व्यवस्थायाम् अपि तेषाम् एव वर्चस्वम् अस्ति । यस्याः जातेः जनाः पूर्वं शिक्षातः वञ्चिताः इति स्थाप्यन्ते स्म तेषां सदस्याः अधुना अपि स्वाभाविकरूपेण पश्चवर्तिनः सन्ति । इदम् एव कारणम् अस्ति यत् नागर-मध्यमवर्गे अग्रणीजातेः जनानाम् अनुपातः सामान्यरूपेण बहु अधिकम् अस्ति । जातेः आर्थिक-सामर्थ्यस्य च मध्ये पर्याप्तं समानत्वम्

अहं निज-जातिविषये चिन्तां न करोमि । वयं पाठ्यपुस्तके जातेः चर्चां किमर्थं कुर्मः ? किं वयं जातेः विषये चर्चां कृत्वा जातिवादस्य वर्धनं न कुर्मः ?

अधुना भवद्भ्यः एतत् न रोचते । किं भवद्भिः एव न कथितम् आसीत् यत् यत्रापि प्रभुत्वस्य वर्चस्वस्य च विषयः आगच्छेत् तदा अस्माभिः राजनैतिक-विज्ञाने तस्य चर्चा करणीया ? किं भवत्सु मौनेषु सत्सु जाति-व्यवस्था समाप्ता भविष्यति ?

अस्ति । (जातिगत-असमानताः इति शीर्षक-मञ्जूषां पश्यन्तु)

राजनीतौ जातिः --

साम्प्रदायिकतायाः इव जातिवादः अपि एतस्यां मान्यातायाम् आधारितः अस्ति यत् जातिः एव समाजिक-समुदायस्य घटनस्य एकमात्रम् आधाररूपा अस्ति । एतस्याः चिन्तन-पद्धत्या अनुसारम् एकस्याः जातेः जनाः कस्यचित् एकस्य स्वाभाविक-सामाजिक-समुदायस्य निर्णाणं कुर्वन्ति तथा च तेषां हितविषयाः अपि समानाः भवन्ति तथा च अपरजातेः जनैः सह तेषां हित-विषयाणां कश्चित् अपि सम्बन्धः न भवति। यथा अस्माभिः साम्प्रदायिकतायाः विषये दृष्टम् अस्ति, इयं मान्यता अस्माकम् अनुभवेन पुष्टा न भवति। अस्माकम् अनुभवानाम् अनुसारं जातिः अस्माकं जीवनस्य कश्चित् पक्षः अवश्यमेव अस्ति परन्तु अयं नाममात्रम् अस्ति अथवा महत्त्वपूर्णतमः पक्षः नास्ति । राजनीतौ जातिः विविधरूपाणि ग्रहीतुं शक्नोति ---

- यदा राजनैतिक-दलानि निर्वाचनेभ्यः प्रत्याशिनां नामानि निश्चीकुर्वन्ति तदा निर्वाचन-क्षेत्रस्य मतदातॄणां जातीनां विषये आकलनं परिगणनं च भवति अर्थात् जाति-विषयं मनसि निधाय कार्यं क्रियते यतः निर्वाचने विजयी-भवितुम् आवश्यक-मतानि प्राप्तुं शक्नुयुः । यदा सर्वकारस्य घटनं क्रियते तदा राजनैतिक-दलानि एतत् तथ्यम् अपि मनसि धारयन्ति यत् सर्वकारे विभिन्न-जातिभ्यः सम्प्रदायेभ्यः समुदायेभ्यः वा कति जनाः सन्ति तदनुसारं च तेभ्यः पदानि अपि दीयन्ते ।

कथनं रहस्योद्घाटनम्

नागरीकरणम् --
ग्रामीण-क्षेत्राणि परित्यज्य जनानां नगरेषु निवासः एव नागरीकरणम् इति उच्यते ।

जातिगत-असमानता

आर्थिक-असमानतायाः कश्चित् महत्त्वपूर्णः आधारः जातिः अपि अस्ति यतो हि जात्या विभिन्नसंसाधनानि यावत् जनानां प्राप्तिः सुनिश्चिता भवति। उदाहरणार्थं पूर्वं याः जातयः अस्पृश्याः इति मन्यन्ते स्म ताः भूमिस्थापनाय अधिकृताः न आसन् अपरञ्च द्विज-जातीयेभ्यः एव शिक्षाप्राप्तेः अधिकारः आसीत्। अद्य जातेः आधारिताः एतादृश्यः औपचारिक्यः प्रकटाः असमानताः च अवैधानिक्यः इति जाताः सन्ति परन्तु शताब्दीभ्यः यया व्यवस्थया केचिदत् समूहाः लाभस्थितौ अथवा हानिस्थितौ स्थापिताः तस्याः व्यस्थायाः सङ्घातप्रभावः अधुना अपि अनुभवितुं शक्यते। एतावत् एव न, एतस्मिन् अन्तरे नवीनाः असमानताः अपि प्रादुर्भूताः सन्ति।

निश्चितरूपेण जातेः आर्थिक-सामर्थ्यस्य च या पुरातनी स्थितिः आसीत् तस्याः विपुलपरिवर्तनं जातम् अस्ति। अद्यत्वे उच्चजातौ निम्नजातौ च अपि धनाढ्यतमाः निर्धनतमाः च जनाः द्रष्टुं शक्यन्ते। विंशतिवर्षेभ्यः अथवा त्रिंशत् वर्षेभ्यः पूर्वम् इत्थं नासीत्। तदा अधस्तनजातिषु विरलतया एव कश्चित् धनाढ्यः जनः भवति स्म। परन्तु, राष्ट्रिय-जनगणना-सर्वेक्षणेन स्पष्टमस्ति यत् – अद्य अपि जातिः आर्थिक-सामर्थ्यं निश्चेतुम् अतीव महत्त्वपूर्ण-भूमिकां निर्वहति।

- सामान्य-आर्थिक-सामर्थ्यम् (यत् मासिक-व्ययविवरण-माध्यमेन माप्यते) अधुना अपि वर्णव्यवस्थया सह घनिष्ठसम्बन्धं दर्शयति अर्थात् उच्चजातीय-जनानाम् आर्थिकस्थितिः श्रेष्ठा अस्ति। दलितानाम् आदिवासिजनानां च आर्थिकस्थितिः निकृष्टतमा अस्ति, अपरञ्च पश्चवर्ति-जातीयाः जनाः मध्यमस्थितौ सन्ति।
- प्रत्येकं जातौ निर्धनाः सन्ति परन्तु ये अत्यन्त-दरिद्राः (सर्वकारीयायाः निर्धनरेखातः अधः) सन्ति तेषु आधिक्येन निम्नजातिषु एव सन्ति। उच्चजातिषु निर्धनतायाः प्रतिशतम् अत्यन्तं न्यूनम् अस्ति। अत्रापि पश्चवर्ति-जातीयाः जनाः मध्यमस्थितौ सन्ति।
- अद्य सर्वासु जातिषु धनाढ्याः जनाः सन्ति परन्तु अत्रापि उच्चजातीयानां जनानाम् अनुपातः अर्थात् सङ्ख्या अधिका अस्ति तथा च निम्नजातीयानाम् अनुपातः अतिन्यूनम् अस्ति।

निर्धनतारेखायाः अधः जीवन-निर्वहणं ये जनाः कुर्वन्ति तेषां प्रतिशतम् अनुपातः, 1999-2000

जातिः समुदायः च	ग्रामीणाः	नागराः
अनुसूचित-जनजातयः	45.8	35.6
अनुसूचित-जातयः	35.9	38.3
अन्याः पश्चवर्तिजातयः	27.00	29.5
मुस्लिम-अग्रिम-जातयः	26.8	34.2
हिन्दु-अगडी-जातयः	11.7	9.9
ख्रिस्त-अग्रिम-जातयः	9.6	5.4
उच्चजातीयाः सिखाः	0.0	4.9
अन्य-अग्रिम-जातयः	16.0	2.7
सर्वे समूहाः	27.0	23.4

सूचना – अत्र अग्रिम इति शब्देन सवर्णजातेः उल्लेखः अस्ति। सवर्णजातेः जनाः अनुसूचितजातेः अनसूचितजनजातेः पश्चवर्तिजातेः च अन्तर्गताः न भवन्ति। निर्धनतारेखायाः अधः इत्यस्य कथनस्य अभिप्रायः अस्ति – प्रतिजनं प्रतिमासं 327 रूप्यकाणि व्ययीकुर्वन्ति इति ग्रामीणक्षेत्राय निश्चितम्, तथा च 455 रूप्यकेभ्यः न्यूनं ये नागराः जनाः व्ययीकुर्वन्ति इत्येतादृशाः जनाः निर्धनरेखायाः अधः सन्ति इति उच्यते।

स्रोतः – राष्ट्रिय-जनगणना-सर्वेक्षणम्, 55तमः, 1999-2000।

● राजनैतिक-दलानि प्रत्याशिनः च जनसमर्थनस्य प्राप्तये जातिगत-भावनाः आन्दोलयन्ति । कानिचन दलानि कासाञ्चित् जातीनां साहायकानि सन्ति इति रूपेण तानि दृश्यन्ते ।

● सार्वभौम-वयस्क-मताधिकारस्य व्यवस्थया तथा च प्रतिजनम् एकस्य एव मतदानस्य व्यवस्थया राजनैतिक-दलानि बाध्यीकृतानि यत् तानि राजनैतिक-समर्थनस्य प्राप्तये जनान् निजपक्षे कर्तुं सक्रियानि भवेयुः । एतस्मात् यासां जातीनाः जनाः क्षुद्राः इति मन्यन्ते स्म तादृशीनां जातीनां जनेषु अपि नवचेतनायाः सञ्चारः जातः ।

राजनीतौ कदाचित् जातिविषये विशिष्टः विचारः क्रियते तस्मात् कदाचित् इयं धारणा जायते यत् निर्वाचनं तु जातीय-क्रीडावत् अस्ति, अन्यत् किमपि नैव । इदं तथ्यं सत्यं नास्ति । किञ्चित् एतानि तथ्यानि सावधानतया पश्यन्तु –

● देशस्य कस्मिन् अपि एकस्मिन् संसदीय-निर्वाचन-क्षेत्रे कस्याश्चित् एकस्याः जातेः जनानां सङ्ख्या विपुला नास्ति अतः प्रत्येकं दलस्य जातेः च प्रत्याशिना निर्वाचने विजयी भवितुं कस्याचित् एकस्याः जातेः समुदायस्य च जनानां वा मतानि आधिक्येन ग्रहीतव्यानि भवन्ति ।

● किञ्चित् अपि राजनैतिकदलं समानजातेः समुदायस्य च सर्वेषां जनानां मतानि न प्राप्तुं शक्नोति । यदा जनाः काम् अपि जातिविशिष्टां कस्यचित् राजनैतिक-दलस्य मतकोश-रूपेण पश्यन्ति तदा एतस्य अभिप्रायः अस्ति यत् तस्याः जातेः अधिकतराः जनाः तस्मै अपि राजनैतिक-दलाय निजमतानि प्रयच्छन्ति ।

● यदि कस्मिंश्चित् निर्वाचनक्षेत्रे समानजातीयानां जनानां प्रभुत्वं मन्यते तदा नैकानि राजनैतिक-दलानि तस्याः एव जातेः जनं प्रत्याशिरूपेण चेतुं कोपि न रोद्धुं शक्नोति । एतादृश्यां स्थितौ केषाञ्चित् मतदातॄणां पुरतः तेषां जातेः एकाधिकाः प्रत्याशिनः भवन्ति तथा च कस्यचित् जातेः मतदातॄणां पुरतः तेषां जातेः एकः अपि प्रत्याशी न भवति ।

● अस्माकं देशे प्रायः सत्तारूढदलेन वर्तमानसांसदैः विधायकैः च पराजयः आस्वादनीयः भवति । यदि विभिन्नजातिस्थ-3जनानां समुदायानां च राजनैतिकरुचिः समाना स्यात् तर्हि इत्थं स्यात् ।

स्पष्टमस्ति यत् निर्वाचने जातेः भूमिका महत्त्वपूर्णा भवति किन्तु अन्यानि कारणानि अपि एतावन्ति एव प्रभावशालीनि भवन्ति । मतदातारः निजजातिभिः सहयावन्तं घनिष्ठसम्बन्धं स्थापयन्ति प्रायः ततोऽधिकं घनिष्ठसम्बन्धं राजनैतिकदलैः सह स्थापयन्ति । समानजात्याः समुदायस्य च आभ्यन्तरे अपि धनिकानां निर्धनानां च जनानां हितविषयाः पृथक् पृथक् भवन्ति । समानस्य एव समुदायस्य निर्धनाः धनिकाः च जनाः प्रायः पृथक् पृथक् राजनैतिकदलानां प्रत्याशिभ्यः मतदानं कुर्वन्ति । सर्वकारेण कृतकार्यस्य विकासस्य च जनानां विचाराणां नेतॄणां च लोकप्रियतायाः निर्वाचनेषु प्रायः निर्णायकप्रभावः भवति ।

जातेः आन्तरिक-राजनीतिः

अधुना यावत् अस्माभिः एतस्मिन् एव तथ्ये अवधानं कृतं यत् राजनीतौ जातेः का भूमिका अस्ति । परन्तु , एतस्य अयम् अभिप्रायः नास्ति यत् जातेः राजनीतेः च मध्ये केवलम् एकपक्षीयः सम्बन्धः भवति । राजनैतिक-जनाः अपि विभिन्नजातीय-जनान् राजनैतिक-व्यवस्थां प्रति आनीय



अजीत नीनन- इण्डिया टुडे बुक ऑफ कार्टून्स

किं भवन्तः इमां वार्त्तां सत्यम् अनुभवन्ति यत् राजनेतारः कस्यापि जातेः जनान् स्वस्य मतकोषस्य रूपेण पश्येयुः ?



अप्रकटः

रङ्गभेदः

एतस्मिन् देशे लब्धजन्मानः दोषिणः---

प्रयान्ति ये विदेशं

परभाषया च संभाषन्ते,धरन्ति च अपरिचितवेशं
तथा च स्वदेशं विस्मरन्ति,
तान् अहं प्रणमामि !
तथा च ये न विस्मरन्ति
शताब्दीः यावत् समस्याग्रस्ताः सन्तः अपि न परिवर्तन्ते
- एतादृशान् जनान् अहं पृच्छामि –
- किं कथयिष्यन्ति यदि केनचित् भवन्तः पृष्टाः –
यत् अस्पृश्यता का भवति
किम् ईश्वरवत् इयम् अविनाशिनी अस्ति ?
अस्पृश्यः कीदृशः भवति ?
कथमिव दृश्यते ?
किं सः आत्मनि कुष्ठचित्रं भवति,
अथवा पुनः, धर्माधीशानां शत्रुः ?
किं सः विधर्मी भवति – कश्चित् पापी अथवा पुनः नास्तिकः
मां बोधयन्तु !
किं प्रत्युत्तरं स्यात् भवताम् ?
किं भवन्तः निःसङ्कोचं वक्तुं शक्ष्यन्ति –
अहम् एव अस्मि अस्पृश्यः ?
एतस्मात् एव अहं कथयामि –
अस्मिन् देशे जन्म प्राप्तेः दोषिणः !
भवद्भिः अधुना दोषस्य संशोधनं करणीयं स्यात् –
देशं त्यजन्तु अथवा युद्धं कुर्वन्तु !
- बाबूराव-बागुलस्य कवितायाः अनुदितरूपम् ।

जातिगतम् अभिज्ञानं प्रभावयन्ति । अनेन प्रकारेण, न केवलं राजनीतिः एव जातिग्रस्ता भवति, जातिः अपि राजनीतिग्रस्ता भवति । इयं घटना विविधरूपाणि गृह्णाति –

- प्रत्येकं जातिः आत्मनः महत्त्वस्य विस्तारम् इच्छति । अतः, आदौ सा निजसमूहस्य याः

- उपजातीन् लघु इति आत्मानः बहिर्भागं स्थापयितुम् इच्छति स्म अधुना ताः आत्मना सह आनेतुं प्रयत्नं करोति ।

- यतो हि एका जातिः निजबलेन सत्तायाः अधिग्रहणं न कर्तुं शक्नोति अतः सा अधिकं राजनैतिक-बलं प्राप्तुम् अन्यजातीनां समुदायानां च

एकीकरणस्य प्रयासं करोति तथा च अनेन प्रकारेण तेषां मध्ये संवादः सामञ्जस्यं च भवति।

- राजनीतौ नव्य-प्रकारकं जातिगत-एकीकरणम् अपि जातम् अस्ति यथा (अग्रिमाः) सवर्णादिजातयः पश्चवर्तिनः च इति रूपेण।

इत्थं जातिः राजनीतौ नैकविधाः भूमिकाः निर्वहति तथा च एवमेव प्रकारेण यथा भारते अस्ति तथैव आविश्वं राजनीतौ भवति। आविश्वं राजनैतिक-दलानि मतानि प्राप्तुं सामाजिक-समूहान् समुदायान् च सङ्घीकर्तुं प्रयत्नं कुर्वन्ति। कासुचित् विशिष्टासु परिस्थितिषु राजनीतौ जातिगताः विभिन्नताः असमानताः च वञ्चितानां निर्बल-समुदायस्य च जनानां कृते निजान् हितविषयान् अग्रे वर्धयितुं समुपस्थापयितुं सत्तायां च सहभागिताप्राप्तेः अपि अवसरान् कल्पयन्ति। अस्मिन् अर्थे जातिगता राजनीतिः दलितानां पश्चवर्ति-जातीयानां जनानां च कृते सत्ता-पर्यन्तं प्राप्तेः निर्णयप्रक्रियां च सुप्रकारेण प्रभावितां कर्तुं स्थितिः अपि कल्पिता अस्ति। नैकानि राजनैतिक-दलानि तथा च अराजनैतिसङ्घटनानां कार्यकर्तारः विशिष्टजातीयान् जनान् विरुध्य जायमानस्य भेदपूर्ण-व्यवहारस्य समाप्तये तथा च तैः सह सम्मानजनक-व्यवहारः स्यात् इति तथा च ते भूमिं सम्पत्तिं च प्राप्तुम् अवसरान् प्राप्नुयुः इति विषयम् अधिकृत्य आन्दोलनम् अपि कुर्वन्ति। परन्तु, अनेन सहैव एतत् अपि सत्यमस्ति यत् केवलं जातेः विषये एव बलाघातः हानिप्रदः अपि भवितुं शक्नोति। यथा धर्मविषयेण स्पष्टीभवति, केवलं जातिगत-परिचय-आधारिता राजनीतिः लोकतन्त्राय शुभसङ्केतरूपेण नास्ति। एतस्मात् प्रायः निर्धनता-विकास-भ्रष्टाचारप्रभृतिः महत्तम-विषयेभ्यः जनानाम् ऐकाग्र्यं न भवति। अनेकधा जातिवादः अवसादं सङ्घर्षं हिसां च अपि प्रेरयति।

1. जीवनस्य तेषां विभिन्नानां पक्षाणां वर्णनं कुर्वन्तु येषु भारते स्त्रिभिः सह भेदपूर्ण-व्यवहारः भवति, अथवा ताः दुर्बलावस्थायां भवन्ति।
2. विभिन्न-प्रकारिकायाः साम्प्रदायिक्याः राजनीतेः विवरणं यच्छन्तु तथा च प्रत्येकं सह एकैकम् उदाहरणम् अपि यच्छन्तु।
3. ज्ञापयन्तु यत् भारते कस्य प्रकारस्य जातिगताः असमानताः अधुना अपि प्रवर्तन्ते।
4. कारणद्वयं ज्ञापयन्तु यत् किमर्थं केवलं जातेः आधारेण एव भारते निर्वाचनस्य परिणामाः निश्चिताः न भवितुं शक्नुवन्ति।
5. भारतस्य विधायिकासु महिलानां प्रतिनिधित्वस्य स्थितिः का अस्ति ?
6. कयोश्चित् द्वयोः प्रावधानयोः वर्णनं कुर्वन्तु ये भारतं धर्मनिरपेक्ष-रूपेण उपस्थापयतः।
7. यदा वयं लैङ्गिक-विभाजनस्य विषये वार्त्तालापं कुर्मः तर्हि अस्माकम् अभिप्रायः भवति –
   (क) स्त्रीपुरुषयोः मध्ये जैविकम् अन्तरम्
   (ख) समाजद्वारा स्त्रीपुरुषाभ्यां प्रदत्ते द्वे असमाने भूमिके
   (ग) बालिकाबालकयोः सङ्ख्यायाः अनुपातः।
   (घ) लोकतान्त्रिक-व्यवस्थासु महिलाभ्यः मतदानस्य अधिकारस्य अप्राप्तिः
8. ऐभारते अत्र महिलाभ्यः आरक्षणस्य व्यवस्था अस्ति –
   (क) लोकसभायाम्
   (ख) विधानसभायाम्
   (ग) मन्त्रिमण्डले
   (घ) पञ्चायत्तराज-संस्थासु

9. साम्प्रदायिक-राजनीतेः अर्थसम्बद्धेषु निम्नलिखित-कथनेषु अवधानं कुर्वन्तु। साम्प्रदायिक-राजनीतिः एतस्यां धारणायाम् आधारिता अस्ति यत् –

(अ) एकः धर्मः अपरधर्मात् श्रेष्ठः अस्ति।

(ब) विभिन्नधर्माणां जनाः समान-नागररूपेण प्रसन्नतापूर्वकं स्थातुं शक्नुवन्ति।

(स) समानधर्मस्य अनुयायिनः कञ्चित् समुदायं रचयन्ति।

(द) कस्यचित् धार्मिक-समूहस्य प्रभुत्वम् अन्येषु सर्वेषु धर्मेषु स्थापयितुं शासनस्य शक्तेः प्रयोगः न कर्तुं शक्यते।

एतेषु किं कथनं समुचितम् अस्ति ?

(क) अ, ब, स, द च (ख) अ, ब तथा च द (ग) अ स च (घ) ब द च

10. भारतीय-संविधानस्य विषये एतेषु किं कथनम् अनुचितम् अस्ति ?

(क) इदं धर्मस्य आधारेण भेदपूर्ण-व्यवहारस्य निषेधं करोति।

(ख) इदं कमपि एकं धर्मं राजकीयधर्मं करोति।

(ग) सर्वे जनाः किमपि धर्मम् अवलम्बयितुं स्वतन्त्राः सन्ति इति स्वतन्त्रतां यच्छति।

(घ) कस्मिन् अपि धार्मिकसमुदाये सर्वेभ्यः नागरेभ्यः समानतायाः अधिकारं यच्छति।

11. ------- इत्यस्मिन् आधारितं सामाजिकं विभाजनं केवलं भारते एव अस्ति।

12. प्रथमसूच्या सह द्वितीयसूच्या मेलनं कुर्वन्तु तथा च अधः प्रदत्तस्य कूटस्य आधारेण समुचितम् उत्तरम् अन्वेषयन्तु।

	सूची - I	**सूची – II**
1.	एतादृशः जनः यः अधिकाराणाम् अवसराणां च विषये स्त्रीपुरुषौ समानरूपेण मन्यते	(क) साम्प्रदायिकः
2.	एतादृशः जनः धर्मं समुदायस्य मुख्याधारं मन्यते।	(ख) नारीवादी
3.	एतादृशः जनः यः जातिं समुदायस्य मुख्याधाररूपां मन्यते	(ग) धर्मनिरपेक्षः
4.	एतादृशः जनः यः जनमध्ये धार्मिकास्थायाः आधारेण भेदपूर्णं व्यवहारं न करोति	(ग) जातिवादी

	1	2	3	4
(सा)	ख	ग	क	घ
(रे)	ख	क	घ	ग
(गा)	घ	ग	क	ख
(मा)	ग	क	ख	घ

प्रश्नावली

जनसङ्घर्षः जनान्दोलनं च

परिचयः

विगतेषु अध्यायेषु अस्माभिः पठितं यत् लोकतन्त्रे सत्तायाः विभाजनं किमर्थम् आवश्यकम् अस्ति तथा च सर्वकारस्य पृथक् पृथक् अङ्गभूतसंस्थाः तथा च विभिन्नाः सामाजिकसमूहाः कथं सत्तायां सहभागिनः भवन्ति । अस्मिन् अध्याये वयम् एतादृशीम् एव गतचर्चां वर्धयन्तः द्रक्ष्यामः यत् सत्ताधारिणः स्वतन्त्राः न सन्ति । तान् अभिलक्ष्य यः प्रभावः जायते तस्मात् मुक्ताः ते न स्थातुं शक्नुवन्ति । लोकतन्त्रे प्रायः हितविषयाणां विविध-विचाराणां च मध्ये सङ्घर्षः जायते । हितानां विविध-विचाराणां च एतस्य द्वन्द्वस्य अभिव्यक्तिः सङ्घटित-प्रकारेण भवति । येषां पार्श्वे सत्ता भवति तैः परस्पर-विरुद्धानाम् अभियाञ्चानां प्रभावानां च मध्ये सन्तुलनं करणीयं भवति । अस्य अध्यायस्य आरम्भे वयम् अवगमिष्यामः यत् कथं परस्परविरुद्ध-याचनानां प्रभावाणां च मध्ये लोकतन्त्रम् आकारं गृह्णाति । एतस्याः चर्चायाः क्रमे वयम् इदम् अपि अवगमिष्यामः यत् सामान्याः नागराः विभिन्नानाम् उपायानां सङ्घटनानां च आश्रयेण लोकतन्त्रे स्वीयां भूमिकां निर्वहन्ति । अस्मिन् अध्याये वयं तादृशानाम् अप्रत्यक्षाणाम् उपायानां विषये अपि चर्चां करिष्यामः ये राजनीतिं प्रभावयन्ति अर्थात् प्रभाविसमूहानाम् आन्दोलनानां विषये चर्चां करिष्यामः । अनेन प्रकारेण वयम् अग्रिमाध्याये चर्चयिष्यमाण-विषयेभ्यः सज्जाः भवामः, यत्र राजनैतिकसत्तां राजनैतिकदलानां माध्यमेन नियन्त्रयितुं प्रत्यक्ष-उपायानां चर्चा अस्ति ।

नेपाले बोलिवियायां च जन-सङ्घर्षः

किं भवन्तः पोलैण्डे यः लोकतन्त्रस्य विजयः जातः तद्विषयक-कथां स्मरन्ति? अस्माभिः एतस्याः कथायाः विषये गतवर्षे नवमकक्षायाः पाठ्यपुस्तकस्य प्रथमे अध्याये पठितम् आसीत् । इयं कथा अस्मान् लोकतन्त्रस्य रचनायां जनतायाः भूमिकां स्मारयति । आयान्तु, एवंविधयोः द्वयोः सद्योजातयोः घटनयोः विषये पठामः अवगच्छामः च यत् लोकतन्त्रे सत्तायाः प्रयोगः कथं भवति इति ।

नेपाले लोकतन्त्राय जन-आन्दोलनम्

2006 तम-वर्षस्य अप्रैलमासे नेपाले किञ्चित् विलक्षणं जन-आन्दोलनं जातम् । प्रायः भवतां स्मरणे स्यात् यत् नेपालः लोकतन्त्रस्य तृतीयलहरी इत्येतेषु देशेषु कश्चित् अस्ति यत्र लोकतान्त्रिक-व्यवस्था 1990 तमदशके प्रवर्तिता । नेपाले राजा औपचारिकरूपेण राज्यस्य प्रधानः आसीत् परन्तु वास्तविकसत्तायाः प्रयोगः जनताद्वारा निर्वाचित-प्रतिनिधीनाम् अधिकारे आसीत् । आत्यन्तिक-राजतन्त्रात् संवैधानिक-राजतन्त्रस्य रूपे यत् सङ्क्रमणं जातमं तत् राजा वीरेन्द्रः स्वीकृतवान् आसीत् परन्तु राजकुलस्य रहस्यपूर्ण-रूपेण हननप्रकरणे राजा वीरेन्द्रस्य हत्या जाता । नेपालस्य नवीनः राजा ज्ञानेन्द्रः लोकतान्त्रिक-शासनं स्वीकर्तुं सज्जः न आसीत् । लोकतान्त्रिक-रूपेण निर्वाचितस्य सर्वकारस्य या अलोकप्रियता आसीत् तां दृष्ट्वा सः लोकतान्त्रिक-व्यवस्थां न स्वीकर्तुम् इच्छति स्म । 2005 तमे वर्षे फरवरीमासे राजा ज्ञानेन्द्रः तात्कालिकं प्रधानमन्त्रिणम् अपदस्थं कृत्वा जनताद्वारा निर्वाचितसर्वकारं निरस्तीकृतवान् । 2006 तमवर्षस्य अप्रैलमासे यत् जनान्दोलनं जातं तस्य जनान्दोलनस्य कार्यकर्तृणां लक्ष्यम् आसीत् यत् शासनस्य दायित्वं राज्ञः पार्श्वे न भवेत् अपितु जनतायाः पार्श्वे स्यात् इति ।

संसदः सर्वेषां वरिष्ठ-राजनैतिकदलानां नेतारः सप्तदलीयघटबन्धनं(सेवेन-पार्टी-अलायंस) रचितवन्तः तथा च आन्दोलनकारिणः नेपालस्य राजधान्यां काठमाण्डूमध्ये चतुर्दिनात्मकस्य कार्य-बहिष्कारस्य घोषणाम् अकुर्वन् । अनेन प्रतिरोधेन शीघ्रमेव अनियतकालिक-पिधानस्य रूपं गृहीतं तथा च एतस्मिन् जनान्दोलने माओवादिनः,

मिन-बहादुर आचार्यः

नेपालस्य जनाः राजनैतिकदल-नेतारः च जन-संप्रचलन-कार्यक्रमे लोकतन्त्रस्य मुक्तिं याचमानाः सन्ति ।

बागी इति तथा च अन्येषां सङ्घटनानां जनाः च अपि सम्मिलिताः जाताः । जनाः निषेधाज्ञायाः उल्लङ्घनं कृत्वा राजमार्गेषु आगतवन्तः । प्रायः लक्षं जनाः प्रतिदिनं सम्भूय लोकतन्त्रस्य मुक्तेः याचनां कुर्वन्ति स्म आन्दोलनकारिणां च जनसङ्ख्या अतीव विपुला जाता तस्मात् सुरक्षाकर्मिणः अपि किमपि नियन्त्रणं न कर्तुं शक्तवन्तः । अप्रैलमासस्य एकविंशे दिनाङ्के आन्दोलनकारिणां सङ्ख्या 3-5 लक्षपर्यन्तं जाता तथा च आन्दोलनकारिणः नृपाय निर्णयाय निश्चिततिथिं दत्तवन्तः । बाध्यतया राजा अपूर्णमनसा कानिचन राज्यानि दातुं घोषणाम् अकरोत् परन्तु आन्दोलनस्य नेतारः राज्ञः एतादृशं निर्णयं न स्वीकृतवन्तः । नेतारः निजसङ्कल्पे दृढाः आसन्, ते इच्छन्ति स्म यत् संसदः मोचनं स्यात्, सर्वदलीय-सर्वकारस्य नवीनायाः संविधानसभायाः च रचना स्यात् ।

2006 तमवर्षस्य अप्रैलमासस्य 24 दिनाङ्के आन्दोलनकारिभिः राज्ञे प्रदत्तस्य निर्णायक-समय-अवधेः अन्तिमदिनम् आसीत् । अस्मिन् दिने राजा तिस्रः याचनाः मन्तुं बाध्यः जातः । सप्त-दलीय-घटबन्धन-दलस्य नेतारः गिरिजाप्रसादकोयिरालाम् अन्तरिम-सर्वकारस्य प्रधानमन्त्रिणं चितवन्तः । संसदः मोचनम् अभवत् तथा च संसदः सदस्याः उपवेशने अधिनियमान् प्रवर्तितवन्तः । एतेषाम् अधिनियमानां माध्यमेन राज्ञः अधिकतराः शक्तयः तस्मात् प्रतिस्वीकृताः । नवीनायाः संविधानसभायाः निर्वाचनस्य उपायानां विषये सप्तदलीय-नेतृणाम् माओवादि-नेतृणां च मध्ये मतैक्यं जातम् । अयं सङ्घर्षः नेपाले लोकतन्त्रस्य मुक्तये द्वितीयान्दोलनम् इति कथितः । नेपालस्य जनानाम् अयं सङ्घर्षः सम्पूर्णविश्वस्य लोकतन्त्र-प्रेमिभ्यः प्रेरणायाः स्रोतोरूपेण जातः ।

बोलिविया-देशस्य जल-युद्धम्

नेपालस्य पोलैण्डस्य च कथाः लोकतन्त्रस्य स्थापनस्य तस्य पुनरुद्धारस्य च विषये सूचयन्ति । परन्तु, जनसङ्घर्षस्य भूमिका लोकतन्त्रस्य स्थापनया सह समाप्ता न भवति । बोलिविया-देशे जनाः जलस्य निजीकरणं विरुध्य कञ्चन सफलं सङ्घर्षं सञ्चालितवन्तः ।

कथनं रहस्योद्घाटनम्

माओवादी – चीन-क्रान्तेः नेता माओ इत्यस्य अनुयायिनः साम्यवादिजनाः । मोओवादिनः जनाः, श्रमिकाणां कृषकाणां च शासनं स्थापयितुं सशस्त्रक्रान्तेः माध्यमेन सर्वकारम् उत्पाटयितुम् इच्छन्ति ।

एतस्मात् ज्ञायते यत् लोकतन्त्रस्य जीवन्ततया सह जनसङ्घर्षस्य आन्तरिक-सम्बन्धः अस्ति।

बोलिविया-देशः लातिनी-अमरीकायाः कश्चन निर्धनदेशः अस्ति । विश्वकोशस्य अधिकारिणः बलपूर्वकम् अवदन् यत् बोलिविया-देशस्य सर्वकारः नगरपालिकाद्वारा यां जलापूर्तिं करोति अधुना तत् जलापूर्तिकार्यं नगरपालिकायाः नियन्त्रणे न स्यात्। बोलिविया-सर्वकारः कोचबम्बानगरे जलापूर्तेः अधिकारं कस्मैश्चित् बहुराष्ट्रिय-समवायाय विक्रीतवान् । अनेन समवायेन त्वरया जलस्य मूल्यं चतुर्गुणितं वर्धितम्। नैकजनानां जलविषयकं मासिकभाटकं 1000 रूप्यकाणि यावत् जातम् अपरञ्च बोलिवियायां जनानां सामान्यः आयः 5000 रूप्यकाणि मासिकम् आसीत्। परिणामतः स्वतः एव तत्र जनसङ्घर्षः आरब्धः।

2000 तमे वर्षे जनवरीमासे श्रमिकाणां मानवाधिकार-कार्यकर्तृणां सामुदायिक-नेतृणां च सङ्घटनं जातम् अनेन सङ्घटनेन नगरे चतुर्दिनात्मकः सफलः कार्यबहिष्कारः आयोजितः । सर्वकारः उपस्थापितेषु विषयेषु वार्त्तालापार्थं सज्जः जातः तस्मात् कार्यबहिष्कारः प्रतिस्वीकृतः । परन्तु पुनरपि साफल्यं न अधिगतम् । फरवरीमासे पुनः आन्दोलनस्य आरम्भः अभवत् परन्तु अधुना आरक्षकाः क्रूरतया दमनम् अकुर्वन्। अप्रैलमासे पुनः कश्चित् कार्यबहिष्कार-दिवसः आयोजितः सर्वकारेण च (मार्शल लॉ) सैन्याधिनियमः सैन्यशासनं वा प्रवर्तितम् । परन्तु, जनतायाः सङ्घटितशक्तेः पुरतः बहुराष्ट्रिय-समवायस्य अधिकारिणः नगरात् पलायितुं बाध्याः जाताः । सर्वकारः आन्दोलनकारिणां सर्वान् प्रार्थनाविषयान् पालयितुं बाध्यः जातः। बहुराष्ट्रिय-समवायेन सह कृतानुबन्धः निरस्तीकृतः तथा च जलापूर्तिकार्यं पुनः नगरपालिकायै समर्प्य जलस्य पुरातनमूल्यम् एव स्थापितम्। एतत् आन्दोलनं "बोलिवियायाः जलयुद्धम्" इति नाम्ना प्रसिद्धिं गतम्।

लोकतन्त्रं जन-सङ्घर्षः च

एतयोः द्वयोः कथयोः सन्दर्भः अतीव पृथक् पृथक् अस्ति । नेपाले जातस्य आन्दोलनस्य लक्ष्यं लोकतन्त्रस्य स्थापनम् आसीत् अपरञ्च बोलिवियायाः जनसङ्घर्षे कश्चित् निर्वाचितः लोकतान्त्रिक-सर्वकारः च जनतायाः अभ्यर्थनां मन्तुं बाध्यः कृतः। बोलिवियायाः जनसङ्घर्षः सर्वकारस्य कस्याश्चित् विशिष्टनीतेः विरोधरूपः आसीत् अपरञ्च नेपाले जातेन आन्दोलनेन निश्चितं यत् देशस्य राजनीतेः आधारः कः भविष्यति। एतौ द्वौ अपि सङ्घर्षौ सफलौ जातौ परन्तु एतयोः प्रभावस्तरौ पृथक् पृथक् आसन्।

एतासु भिन्नतासु सतीसु अपि द्वयोः कथयोः कानिचन एतादृशानि तथ्यानि सन्ति यानि लोकतन्त्रस्य अतीताय भविष्याय च प्रासङ्गिकानि सन्ति । एते द्वे कथे राजनैतिक-सङ्घर्षस्य उदाहरणरूपेण स्तः। द्वयोः एव घटनयोः जनता अत्यधिका समस्या-ग्रस्ता जाता। जनसमर्थनस्य सार्वजनिक-अभिव्यक्तिद्वारा विवादः तस्य परिणामपर्यन्तं प्रापितः। अनेन सह एव वयं इदम् अपि पश्यामः यत् द्वयोः एव घटनयोः राजनैतिक-सङ्घटनानां भूमिके निर्णायिक्यौ आस्ताम्। यदि भवन्तः नवमकक्षायाः पाठ्यपुस्तकस्य प्रथमम् अध्यायं स्मरन्ति चेत् भवन्तः अवगमिष्यन्ति यत् सम्पूर्णविश्वस्य लोकतन्त्रस्य विकासः इत्थम् एव अभवत्। अनेन प्रकारेण वयम् एताभ्याः द्वाभ्याम् उदाहरणाभ्यां सामान्यं सारं प्रकटीकर्तुं शक्नुमः।

- लोकतन्त्रस्य जनसङ्घर्षस्य माध्यमेन विकासः भवति। इदम् अपि शक्यते यत् केचन महत्त्वपूर्णनिर्णयाः सर्वसम्मत्याः भवेयुः तथा च एतादृशानां निर्णयानां कारणात् कस्यापि प्रकारस्य सङ्घर्षः न स्यात्। पुनरपि, अयम् अपवादः एव कथयिष्यते । लोकतन्त्रस्य निर्णायक-कालः प्रायः तदेव भवति यदा सत्ताधारिणां सत्तायां च समानभाग-काङ्क्षिणां मध्ये सङ्घर्षः भवति । एतादृशः कालः तदा आयाति यदा कश्चित् देशः लोकतन्त्रं प्रति अग्रेसरः भवेत्, तस्मिन् देशे च लोकतन्त्रस्य च विस्तारः भवेत् अथवा तत्र लोकतन्त्रस्य आधारः दृढतां प्रति गच्छन् स्यात्।
- लोकतान्त्रिक-सङ्घर्षस्य समाधानं जनतायाः व्यापक-सङ्घटनेन भवति। इदम् अपि शक्येत यत् कदाचित् एतस्य सङ्घर्षस्य समाधानं वर्तमानाः याः संस्थाः सन्ति तासु न्यायपालिकायाः माध्यमेन भवेत्।

किं भवन्तः ज्ञापयितुम् इच्छन्ति यत् कार्यबहिष्कारः विरोधप्रदर्शनं जनसंप्रचलनं निषेधाज्ञा इत्येतादृश्यः घटनाः समीचीनाः सन्ति ? मया तु चिन्तितम् आसीत् यत् उपर्युक्ताः एतादृश्यः घटनाः अस्माकं देशे एव भवन्ति यतो हि अधुना अपि अस्माकं देशः लोकतन्त्रस्य दृष्ट्या परिपक्वः न जातः।

परन्तु,यदा विवादः अधिकः गभीरः भवति तदा एताः संस्थाः स्वयं तस्य विवादस्य भागरूपेण भवन्ति। एतस्याम् अवस्थायां समाधानम् एतासां संस्थानां माध्यमेन नैव अपितु ताभ्यः बर्हिभागे अर्थात् जनतायाः माध्यमेन भवति।

● एतादृशस्य संघर्षस्य समस्यानां युद्धानां च आधाररूपेण राजनैतिकानि सङ्घटनानि भवन्ति। इदं तथ्यं सत्यम् अस्ति यत् एतादृशीषु घटनासु स्वतःस्फुरणस्य भावः अपि क्वचित् अवश्यमेव विद्यमानः भवति परन्तु जनतायाः स्वतःस्फूर्ता सार्वजनिक-सहभागिता सङ्घटिताया: राजनीत्याः माध्यमेन प्रभावशालिनी भवति। सङ्घटित-राजनीतेः नैकमाध्यमानि भवितुं शक्नुवन्ति । एतादृशेषु माध्यमेषु राजनैतिक-दलानि संरक्षक-समूहाः आन्दोलनकारि-समूहाः च सम्मिलिताः सन्ति।

किम् एतस्य अभिप्रायः अयम् अभवत् यत् येन पक्षेण अधिकसङ्ख्यया जनाः एकत्रीकृताः सः वाञ्छितं सर्वं प्राप्तुं शक्ष्यति ? किम् औचित्यं गणयति को विशेषकायः इति अस्ति वा ?

1984 तमे वर्षे कर्णाटकसर्वकारः कर्णाटक-पल्पवुड-लिमिटेड इति नाम्ना कञ्चित् समवायम् अरचयत्। एतस्मै समवायाय प्रायः 30,000 हेक्टेरयरभूमिः 40 वर्षेभ्यः निःशुल्कः प्रायः दत्ता। एतस्याः भूमेः अधिकांश-भागस्य प्रयोगं कृषकाः निजपशूनां कृते गोचारण-भूमेः रूपेण कुर्वन्ति स्म। समवायेन एतस्यां भूमौ यूक्लिप्ट्स इत्यस्य पादपानां रोपणकार्यम् आरब्धम्। एतेषां वृक्षाणां प्रयोगः कर्गद-निर्माणाय प्रयुक्तस्य द्रवपदार्थस्य सज्जीकरणाय करणीयः आसीत्। 1987 तमे वर्षे कित्तिको-हक्चिको इति नामकम् आन्दोलनम् आरब्धम्। आन्दोलनम् अहिंसकरूपेण कृतम्। जनाः यूक्लिप्टस्य पादपान् भिन्नवन्तः तथा च तेषां स्थाने तान् वृक्षान् रोपितवन्तः ये जनतायै लाभदायकाः आसन्।

अधः केषाञ्चित् समूहानां नामानि दत्तानि सन्ति। यदि भवन्तः एतेषु कस्मिंश्चित् समूहे अभविष्यन् तर्हि निजपक्षस्य समर्थने कं तर्कम् उपास्थापयिष्यन् ?

स्थानीयकृषकाः, पर्यावरणवादिकार्यकर्तारः, उपर्युक्तसमवायस्य कार्यकर्तारः अधिकारिणः, अथवा कर्गदस्य उपभोक्तारः।

युद्धसज्जा सङ्घटनं च

आयान्तु, पुनः वयम् उपरि प्रदत्ते द्वे उदाहरणे प्रतिगच्छामः तथा च तेषां सङ्घटनानां विषये वार्तालापं कुर्यास्म, येषाम् आश्रयेण सङ्घर्षाः सफलाः जाताः । अस्माभिः दृष्टं यत् नेपाले अनियतकालिक-कार्यबहिष्काराणाम् आह्वानं सप्तदलानां घटबन्धनेन कृतम् आसीत्। एतस्मिन् घटबन्धने एवंविधानि महान्ति सप्तदलानि सम्मिलितानि येषां केचन सदस्याः संसदि आसन्। परन्तु एतस्य जनसङ्घर्षस्य मूले केवलं सप्तदलानि एव न आसन् । एतस्मिन् सङ्घर्षे नेपाल-साम्यवादि-दलेन अपि भागः गृहीतः आसीत् । यः संसदीय-लोकतन्त्रे न विश्वसिति स्म। इदं दलं नेपालसर्वकारं विरुध्य सशस्त्र-संघर्षं चालयति स्म तथा च इदं नेपालस्य दीर्घभागस्य नियन्त्रणम् अकरोत्।

नेपालस्य जनसङ्घर्षे राजनैतिक-दलानि अतिरिच्य नैकानि सङ्घटनानि सम्मिलितानि आसन् । सर्वाणि महान्ति श्रमिक-सङ्घटनानि तथा च तेषां परिसङ्घाः अपि एतस्मिन् आन्दोलने भागं गृहीतवन्तः । अन्यानि नैकानि सङ्घटनानि वस्तुतः मूलवासि-जनानां सङ्घटनानि तथा च शिक्षकाणाम् अधिवक्तृणां मावनाधिकार-कार्यकर्तृणां सङ्घाः एतस्मै आन्दोलनाय निजं समर्थनं दत्तवन्तः।

जलस्य निजीकरणं विरुध्य बोलिवियायां यत् आन्दोलनं प्राचलत् तस्य नेतृत्वं केनचित् राजनैतिक-दलेन न कृतम्। एतस्य आन्दोलनस्य नेतृत्वं फेडेकोर इति नामकेन सङ्घटनेन कृतम्।

महाम् 'लामबन्दी' इत्यस्य जुमला न रोचते। एवं ज्ञायते यत् जनाः न आलूकानां गोण्यः सन्ति।

एतस्मिन् सङ्घटने अभियान्त्रिकाः पर्यावरणवादि-सहिताः स्थानीयाः व्यवसायिनः अपि सम्मिलिताः आसन् । एतस्मै सङ्घटनाय सेचन-आश्रितानां कृषकसङ्घानां कोचूबम्बा-विश्वविद्यालयस्य छात्राणां नगरेषु ये अनाथबालाः आसन् तेषां च अपि समर्थनम् आसीत् । एतस्य आन्दोलनस्य सोशलिस्ट इति दलेन अपि समर्थनं कृतम्। 2006 तमे वर्षे बोलिवियायां सोशलिस्टदलं सत्तां प्राप्नोत्।

एतैः उदाहरणैः वयम् अवगन्तुं शक्नुमः यत् यदा कस्याञ्चित् लोकतान्त्रिक-व्यवस्थायां सङ्घर्षः भवति तदा तत्र नैकेषां सङ्घटनानां सहयोगः भवति । एतानि सङ्घटनानि द्विधा निजभूमिकां निर्वहन्ति। यदा किञ्चित् सङ्घटनं लोकतान्त्रिक-व्यवस्थया गृहीते निर्णये प्रभावं जनयितुम् इच्छति तदा तत् राजनीतौ प्रत्यक्षतः सहभागितां कृत्वा एतत् कर्तुं शक्नोति । एतदर्थं राजनैतिक-दलस्य रचना क्रियते, निर्वाचने भागः गृह्यते सर्वकारस्य च रचना क्रियते। परन्तु, प्रत्येकं नागरः एतावता प्रत्यक्ष-प्रकारेण सहभागितां न करोति । शक्यम् अस्ति,यत् नागरस्य इच्छा न भवेत्, अथवा प्रत्यक्ष-राजनैतिकीषु प्रक्रियासु सहभागितायाः सः आवश्यकतां न अनुभवेत् । एवमपि शक्यते यत्, तस्य पार्श्वे एतदर्थम् आवश्यक-कौशलस्य अभावः स्यात् एतस्याम् अवस्थायां सः केवलं निजमतस्य प्रयोगं कृत्वा प्रत्यक्ष-राजनीतौ सहभागितां कुर्यात्।

वस्तुतः, एवंविधाः नैके अप्रत्यक्षाः उपायाः सन्ति यैः जनाः सर्वकारस्य पुरतः निजं विचारं प्रार्थना-विषयं च उपस्थापयितुं शक्नुवन्ति। जनाः सङ्घीभूय निजहित-विषयान् विचारान् च याः प्रक्रियाः वर्धयन्ति ताः कर्तुं शक्नुवन्ति। अयम् एव हितसमूहः प्रभावसमूहः च करोति। कदाचित् जनाः असङ्घटित-रूपेण अपि स्वीयान् प्रार्थनाविषयान् (याचनाः) उपस्थापयितुं सङ्घीभवितुं निर्णयन्ति । एतादृशाः जनसमूहाः आन्दोलनम् इति उच्यते।

प्रभाव-समूहः आन्दोलनं च

सङ्घटित-रूपेण प्रभावकारिणः समूहाः सर्वकारस्य नीतीः प्रभावयितुं प्रयत्नं कुर्वन्ति।



केशव, द हिन्दु

वार्त्तापत्रस्य कर्तितखण्डेषु येषां प्रभावि-समूहानाम् उल्लेखः अस्ति, किं भवन्तः तान् परिचेतुं शक्नुवन्ति ? ते किम् अभ्यर्थयन्ति ?

परन्तु, राजनैतिक-दलानाम् इव प्रभावोत्पादकस्य समूहस्य लक्ष्यं सत्तां प्रत्यक्षतः नियन्त्रयितुं तत्र सहभागितां च कर्तुं न भवति । प्रभावि‌समूहस्य निर्माणं तदा भवति यदा समानाः व्यवसायिनः समान-हितधारकाः समाकाङ्क्षिणः अथवा सम्मतयः च जनाः समानस्य उद्देश्यस्य प्राप्तये सङ्घीभवन्ति ।

उपरि विद्यमानायां चर्चायाम् अस्माकम् आभिमुख्यम् एतादृशैः तथ्यैः अभवत् यत् वयं तेषां तथ्यानां सङ्घातरूपं सङ्घटनं न कथयितुं शक्नुमः । नेपाले लोकतन्त्राय यः जनसङ्घर्षः जातः, सः लोकतन्त्राय जातं द्वितीय-आन्दोलनम् इति कथितः । वयं प्रायः नैकविधानां सामूहिक-कार्याणां कृते जन-आन्दोलनम् इत्येतादृशस्य शब्दस्य व्यवहारः क्रियते इति वयं शृणुमः, यथा – नर्मदा-संरक्षण-आन्दोलनं, सूचनायाः अधिकार-आन्दोलनं, मद्यपानविरोध-आन्दोलनं, महिला-आन्दोलनं पर्यावरणान्दोलनम् इति । प्रभावि-समूहस्य इव जनान्दोलनानि अपि निर्वाचनेषु प्रत्यक्षतः सहभागिताम् अकृत्वा राजनैतिक-व्यवस्थां प्रभावयितुं प्रयत्नं कुर्वन्ति । परन्तु, प्रभावि-समूहानां विपरीतम् आन्दोलनेषु सङ्घटनं शिथिलं भवति । आन्दोलनेषु निर्णयाः अनौपचारिक-रूपेण स्वीक्रियन्ते तथा च एते निर्णयाः परिवर्तन-शीलाः अपि भवन्ति । आन्दोलनानि जनतायाः स्वतःस्फुरितायां सहभागितायाम् आश्रिताः भवन्ति न तु प्रभावि-समूहे आश्रिताः भवन्ति ।

वर्गविशेषस्य हितसमूहाः जनसामान्यस्य च हितसमूहाः

हित-धारकाः समूहाः सामान्यतः समाजस्य कस्यचित् वर्गविशेषस्य हितविषयान् वर्धयितुम् इच्छन्ति । श्रमिक-सङ्घटनं, व्यवसायिक-सङ्घः तथा च व्यवसायिक-निकायाः (अधिवक्तारः, चिकित्सकाः, शिक्षकाः च इत्यादयः) एतादृशानां प्रभावि-समूहानाम् उदाहरणरूपेण सन्ति ।

विकिपीडिया

भूमेः अधिकारः इति विषयम् अधिकृत्य विरोध-प्रदर्शनम् – पश्चिम-जावायाः (इण्डोनेशिया) कृषकाः 2004 तमे वर्षे एकस्मिन् दिने पश्चिम-जावायाः प्रायः 15,000 भूमिहीन-कृषकाः इण्डोनेशियायाः राजधानीं जकार्तां प्राप्तवन्तः। कृषकाः निजकुटुम्बेन सह आगतवन्तः आसन् तथा च भूमि-संशोधनस्य याचनां कुर्वन्ति स्म। कृषकाणां कथनम् आसीत् यत् अधिगृहीतानि तेषां क्षेत्राणि पुनः ते प्राप्तुम् इच्छन्ति। कृषकाः विश्ववाणिज्य-सङ्घटनस्य तस्य विध्वंसक-अधिनियमानां च विरोधं कुर्वन्ति स्म। प्रदर्शन-कारिणाम् उद्घोषः आसीत् यत् भूमिः नैव तर्हि मतप्रयोगम् अपि ते न करिष्यन्ति। तेषां घोषणा आसीत् यत् यदि कश्चित् अपि प्रत्याशी भूमि-परिष्कारस्य पक्षं न स्वीकरिष्यति तर्हि ते इण्डोनेशियायां जायमानस्य राष्ट्रपतिपदाय प्रत्यक्षनिर्वाचनस्य बहिष्कारं करिष्यन्ति।

एते प्रभावि-समूहाः वर्ग-विशेषात् सम्बद्धाः भवन्ति तद्यथा – श्रमिक-वर्गस्य कर्मचारि-वर्गस्य व्यवसायि-वर्गस्य उद्योगपति-वर्गस्य धर्मविशेषस्य अनुयायिनः अथवा जातिविशेषस्य च प्रतिनिधित्वं कुर्वन्ति। एतेषां प्रभावि-समूहानां सम्बन्धः सम्पूर्ण-समाजेन सह न भवति अपि तु तेषाम् उद्देश्यः निजसदस्यानां समृद्धिः कल्याणं च भवति।

कानिचन सङ्घटनानि समाजस्य कस्यचित् एकस्य समुदायस्य हितानाम् एव प्रतिनिधित्वं न कुर्वन्ति। एतानि सङ्घटनानि सर्वसामान्य-हितानां प्रतिनिधित्वं कुर्वन्ति येषां रक्षणम् आवश्यकं भवति। एवम् अपि शक्यते यत् एतादृशं सङ्घटनं यस्य उद्देशस्य प्राप्तिम् इच्छेत् तत्र एतस्य निज-सदस्यानां कश्चित् अपि लाभः न भवेत्। बोलिवियायाः फेडकोर इति नामकं सङ्घटनम् एतादृशस्य एव सङ्घटनस्य उदाहरण-रूपेण अस्ति। नेपालस्य विषये अस्माभिः दृष्टं यत् तत्र मावनाधिकार-सङ्घटनैः अपि सहभागिता कृता आसीत्। अस्माभिः एतादृशानां सङ्घटनानां विषये नवम-कक्षायाः पुस्तके पठितम् आसीत्। एतादृशानि

द्वितीय-प्रकारकाणि सङ्घटनानि जनसामान्यस्य हितसमूहाः अथवा लोक-कल्याणकारि-समूहाः इति उच्यन्ते। एतादृशानि सङ्घटनानि कञ्चित् विशिष्टं परित्यज्य सामूहिक-हितस्य प्रतिनिधित्वं कुर्वन्ति। एतेषां लक्ष्यं केवलं निज-सदस्यानां साहाय्यम् एव न अपि तु अन्येषाम् अपि साहाय्यं भवति। उदाहरणार्थं वयं दासीकृतां श्रमव्यवस्थां विरुध्य सङ्घर्ष-रतानां समूहानां नामानि ग्रहीतुं शक्नुवन्ति। एतादृशाः समूहाः निज-कल्याणाय हिताय वा नैव अपि तु क्रीतदासश्रमस्य भारत्वात् पीडित-जनानां मुक्तये सङ्घर्षं कुर्वन्ति। केषुचित् प्रकरणेषु शक्यते यत् जनसामान्य-हितानां प्रतिनिधित्वं ये समूहाः कुर्वन्ति ते एतादृशस्य उद्देश्यस्य पूर्तये अत्र अग्रेसराः भवन्तु यतः अन्यैः सह ते अपि लाभान्विताः भवेयुः। उदाहरणार्थं बामसेफ (बैकवर्ड एंड माइनॉरिटी कम्युनिटीज़ एम्पलाइज फेडरेशन -BAMCEF) इत्यस्य नाम ग्रहीतुं शक्यते। इदं मुख्यतया सर्वकारीय-कर्मचारिणां सङ्घटनम् अस्ति यत् जातिगत-भेदभावं विरुध्य अभियानं चालयति।

इदं सङ्घटनं जातिगत-भेद-भावेन ग्रस्तानां निजसदस्यानां समस्याः पश्यति परन्तु एतस्य मुख्यसम्बन्धः सामाजिक-न्यायाय सम्पूर्ण-समाजाय च सामाजिक-समानतायाः प्राप्तिः अस्ति।

आन्दोलनकारि-समूहः

प्रभाविनः समूहस्य इव कस्मिंश्चित् आन्दोलने अनेविधाः समूहाः सम्मिलिताः सन्ति । उपरि कानिचन उदाहरणानि सम्मिलितानि भवन्ति यैः एतस्य कस्याश्चित् साधारणविशेषतायाः सङ्केतः प्राप्यते । अधिकतर-आन्दोलनानि कस्मिंश्चित् विशिष्टविषये केन्द्रितानि भवन्ति । एतादृशानि आन्दोलनानि कस्याश्चित् सीमितायाः समयसीमायाः आभ्यन्तरे किञ्चित् लक्ष्यं प्राप्तुम् इच्छन्ति । कानिचन आन्दोलनानि अधिक-सार्वभौमिकानि भवन्ति तथा च किञ्चित् व्यापकं लक्ष्यं अतीव दीर्घसमयावधौ प्राप्तुम् इच्छन्ति।

नेपाले जातस्य लोकतन्त्रस्य आन्दोलनस्य विशिष्टः उद्देश्यः आसीत् राजा निजादेशान् प्रतिस्वीकर्तुं बाध्यः कृतः । एतैः आदेशैः राजा लोकतन्त्रं समापितवान् आसीत्। भारते, नर्मदा-संरक्षण-आन्दोलनस्य समीचीनम् उदाहरणम् अस्ति । नर्मदानद्याः निर्मीयमाणस्य सरदार-सरोवर-जलबन्धस्य कारणात् जनाः विस्थापिताः जाताः । इदम् आन्दोलनम् एतं विशिष्टं विषयम् अधिकृत्य आरब्धः आसीत् । एतस्य उद्देश्यः जलबन्धस्य निर्माणस्य स्थगनम् आसीत्। शनैः शनैः अनेन आन्दोलनेन महद् रूपं धृतम्। अनेन सर्वेषां विशाल-जलबन्धनानां विकासस्य आदर्श-प्रारूप-विषये प्रश्नाः समुपस्थापिताः यत्र विशालाः जलबन्धाः अनिवार्याः सन्ति इति प्रमाणीक्रियते स्म। एतादृशानाम् आन्दोलनानां नेतृत्वम् अत्यन्तं स्पष्टं भवति तथा च तेषां सङ्घटनम् अपि भवति परन्तु एतादृशानि आन्दोलनानि अल्पकाल-पर्यन्तम् एव सक्रियाणि तिष्ठन्ति।

कस्मिंश्चित् एकस्मिन् प्रकरणे आधारितानाम् एतादृशानाम् आन्दोलनानाम् अपेक्षया तानि आन्दोलनानि उपस्थापयितुं शक्यन्ते यानि चिरकालं यावत् प्रवर्तन्ते तथा च येषाम् एकाधिकाः विषयाः भवन्ति । पर्यावरण-आन्दोलनानि महिला-आन्दोलनानि च सर्वथा एतादृशानाम् एव आन्दोलनानाम् उदाहरणरूपेण सन्ति । एतादृशानाम् आन्दोलनानां नियन्त्रणम् अथवा दिशानिर्देशेभ्यः किञ्चित् सङ्घटनं न भवति । पर्यावरण-आन्दोलनस्य अन्तर्गतम् नैकानि सङ्घटनानि तथा च विशिष्ट-विषये आधारितानि आन्दोलनानि सम्मिलितानि सन्ति । एतेषां सर्वेषां सङ्घटनानि पृथक् पृथक् सन्ति।

सामाजिकानि आन्दोलनानि प्रभाविसमूहाः च नागराणां नियन्त्रणाय विविधान् प्रयासान् कुर्वन्ति। एतस्मिन् चित्रे केचन एतादृशाः उपायाः एव दर्शिताः सन्ति।



सुरेन्द्र, द हिन्दू

नैकेः लोकतान्त्रिक-सर्वकाराः निज-नागरेभ्यः सूचनायाः अधिकारं प्रददाति। सूचनायाः अधिकार-अधिनियमः 2005 अस्माकं संसदा पारितः ऐतिहासिकः अधिनियमः अस्ति। नागराः एतस्य अधिनियमस्य अन्तर्गतं सर्वकारीय-कार्यालयेभ्यः तेषां विभिन्न-गतिविधीनां सूचनाः प्राप्तुं शक्नुवन्ति।

किं भवन्तः इत्थं चिन्तयन्ति यत् इदं व्यङ्ग्यचित्रम् एतस्य अधिनियमस्य पालने प्राशासनिक-अधिकारिणाम् अवरोधि-भूमिकाम् व्यापकरूपेण दर्शयति ?

नेतृत्वम् अपि पृथक् अस्ति तथा च नीतिगत-प्रकरणेषु प्रायः एतेषां परामर्शः पृथक् पृथक् भवति। एतदतिरिच्य कस्यचित् व्यापक-उद्देश्यस्य एते सहभागिनः सन्ति तथा च एतेषां दृष्टिकोणः सदृशः अस्ति । एतस्मात् कारणात् एतस्मै कस्यचित् आन्दोलनस्य अर्थात् पर्यावरण-आन्दोलनस्य नाम प्रदत्तम् अस्ति । कदाचित् एतादृशानां व्यापक-आन्दोलनानां किञ्चित् शिथिलं सर्व-समावेशि-सङ्घटनं भवति।

उदाहरणार्थं नेशल-अलांयस-फॉर-पीपल्स-मूवमेंट (NAPM) एतादृशम् एव सङ्घटनानां सङ्घटनम् अस्ति । विभिन्न-प्रकरणेषु सङ्घर्षं कुर्वन्तः नैके आन्दोलनकारि-समूहाः एतस्य सङ्घटनस्य घटकाः सन्ति । इदं सङ्घटनं स्वदेशे नैक-जनान्दोलनानां गतिविधिषु सामञ्जस्य-स्थापनस्य कार्यं करोति।

प्रभावि-समूहाः आन्दोलन-राजनीतौ कथं प्रभावयन्ति ?

प्रभावि-समूहे आन्दोलन-राजनीतौ च नैकविधाः प्रभावान् निपातयन्ति।

- प्रभावि-समूहाः आन्दोलनानि च, निजलक्ष्यस्य तथा च गतिविधीनां कृते जनतायाः समर्थनस्य सहानुभूतेः च प्राप्तेः प्रयासं कुर्वन्ति । एतदर्थं सूचना-अभियानस्य सञ्चालनं, सम्मेलन-कार्यस्य आयोजनं, प्रार्थना-विषयस्य उपस्थापनं इत्येतादृशाः उपायाः आश्रीयन्ते । एतादृशाः अधिकार-समूहाः सञ्चार-तन्त्राणि प्रभावयितुं प्रयत्नं कुर्वन्ति यतः तेषां विषयेषु सञ्चार-तन्त्राणि आधिक्येन अवधानं न कुर्युः इति।
- एतादृशाः समूहाः प्रायः कार्यबहिष्कारः सर्वकारीय-कार्यस्य च बाधकाः इत्येतादृशानाम् उपायानाम् आश्रयं स्वीकुर्वन्ति।

वार्त्तापत्राणां एतेषु कर्तितखण्डेषु केषां सामाजिक-आन्दोलनानां वर्णनम् अस्ति ? एतेषाम् आन्दोलनानां कार्यकर्तारः किं प्रयतन्ते तथा च ते समाजस्य कं समुदायं नियन्त्रयितुं प्रयत्नं कुर्वन्ति ?

श्रमिक-सङ्घटनानि कर्मचारि-सङ्घाः अधिकतराः आन्दोलनकारि-समूहाः च प्रायः एतादृशीनां युक्तीनां प्रयोगं कुर्वन्ति यत् सर्वकारः तेषां याचनाः प्रति अवधानं कर्तुं बाध्यः भवेत्।

- व्यवसायि-समूहः प्रायः व्यवसायिक-लॉबिस्ट् इत्येतान् नियोजयन्ति अथवा महार्घाणि विज्ञापनानि प्रायोजयन्ति । प्रभावि-समूहस्य अथवा आन्दोलनकारि-समूहस्य केचन जनाः सर्वकारस्य परामर्शदातृ-समितिषु आधिकारिक-निकायेषु च भागं ग्रहीतुं शक्नुवन्ति।

यद्यपि प्रभावि-समूहाः आन्दोलनकारिणः च दलीय-राजनीतौ प्रत्यक्षतः भागं न गृह्णन्ति परन्तु ते राजनैतिकदलान् प्रभावयितुम् इच्छन्ति । अधिकतराणि जन-आन्दोलनानि केनापि राजनैतिक-दलेन सम्बद्धानि न भवन्ति परन्तु तेषां कश्चित् राजनैतिकपक्षः भवति । आन्दोलन-कारिणां काचित् विचारधारा भवति तथा च विशिष्टेषु विषयेषु तेषां राजनैतिकपक्षः भवति । राजनैतिक-दलस्य प्रभावि-समूहस्य च मध्यस्थ-सम्बन्धः नैकानि रूपाणि धर्तुं शक्नोति यत्र कानिचन् प्रत्यक्षाणि भवन्ति कानिचन च अप्रत्यक्षाणि।

- केषुचित् विषयेषु प्रभावि-समूहाः राजनैतिकदलैः एव निर्मीयन्ते अथवा तेषां नेतृत्वं राजनैतिकदलस्य नेतारः कुर्वन्ति। केचन प्रभावि-समूहाः राजनैतिक-दलस्य कस्याश्चित् शाखायाः रूपेण कार्यं कुर्वन्ति । उदाहरणार्थं भारतस्य अधिकतराणि श्रमिक-सङ्घटनानि तथा च छात्र-सङ्घटनानि राजनैतिक-दलैः सृज्यन्ते अथवा तेषां सम्बद्धता राजनैतिक-दलैः वर्तते। एतादृशानां प्रभावि-समूहानाम् अधिकतर-नेतारः प्रायः कस्यचित् राजनैतिक-दलस्य कार्यकर्तारः तथा च नेतारः भवन्ति।

- कदाचित् जनान्दोलनानि राजनैतिक-दलस्य रूपम् अपि गृह्णन्ति । उदाहरणार्थं विदेशिजनान् विरुध्य छात्राः असम-आन्दोलनं प्रवर्तितवन्तः तथा च यदा अस्य आन्दोलनस्य समाप्तिः जाता तदा अनेन आन्दोलनेन असम-गण-परिषदः रूपं गृहीतम्। 1930 तमे वर्षे 1940 तमे वर्षे च तमिलनाडुराज्ये समाज-परिवर्तन-आन्दोलनानि प्रवृत्तानि आसन् । डी.एम.के तथा च ए.आई. डी.एम.के प्रभृति-दलानाम् आधारः, एतेषु समाज-परिवर्तन-आन्दोलनेषु अन्वेष्टुं शक्यते।

- अधिकांशतया प्रभावि-समूहानां जन-आन्दोलनस्य च राजनैतिक-दलैः सह प्रत्यक्ष-सम्बन्धः न भवति, द्वौ अपि परस्परं विरोधिपक्षान् गृह्णन्ति। पुनरपि, एतन्मध्ये संवादः विद्यमानः भवति तथा च सन्धिविषये वार्त्तालापः जायते। आन्दोलनकारि-समूहैः नवीनाः विषयाः समुपस्थापिताः सन्ति तथा च राजनैतिकदलैः एते विषयाः अग्रेसारिताः सन्ति। राजनैतिक-दलानाम् अधिकतराः नवीनाः नेतारः प्रभावि-समूहेभ्यः आन्दोलनकारि-समूहेभ्यः च आयान्ति।

किं प्रभावि-समूहानां जन-आन्दोलनानां च प्रभावाः सकारात्मकाः भवन्ति ?

आरम्भे एवम् अनुभवितुं शक्यते यत् कस्यचित् एकस्य समुदायस्य हितानां प्रतिनिधित्वं ये प्रभावि‌समूहाः कुर्वन्ति ते लोकतन्त्रस्य कृते लाभदायकाः न सन्ति।

कस्यापि वार्त्ता-प्रणालिकायाः माध्यमेन आसप्ताहं वार्त्ताः नैरन्तर्येण अवलोकयन्तु। निम्नलिखित-क्षेत्रस्य अथवा समुदायस्य प्रतिनिधित्वं कुर्वद्भिः आन्दोलनैः प्रभावि‌समूहैः च सम्बद्धवार्त्तानां सङ्ग्रहं कुर्वन्तु – कृषक-वणिज्-श्रमिक-उद्योग-पर्यावरण-महिला इत्यादिसङ्घटनसम्बद्धाः वार्त्ताः तस्मिन् सङ्ग्रहे भवितुं शक्नुवन्ति। उपर्युक्तेषु सङ्घटनेषु कस्य चर्चा दूरदर्शनस्य वार्त्ता-प्रणालिकाभिः सर्वाधिका कृता ? कस्य वर्गस्य अथवा हित-समूहस्य चर्चा वार्त्ता-प्रणालिकाभिः अल्पीयसी कृता ? (दूरदर्शनस्य स्थाने भवन्तः वार्त्तापत्रस्य अपि प्रयोगं कर्तुं शक्नुवन्ति)

किम् अवगतम् ? किं ज्ञातम् ?

ग्रीनबेल्ट (हरित-पट्टिका) इत्यस्य आन्दोलनस्य अन्तर्गतं सम्पूर्णकेन्यायां त्रिकोटि-वृक्षाणां रोपणं जातम् । एतस्य आन्दोलनस्य नेत्री वाङ्गरी-मथायी सर्वकारीय-अधिकारिणां राजनेतॄणां च व्यवहारेण अप्रसन्ना आसीत् । तस्याः कथनम् आसीत् यत् "1970 तमे दशके तथा च 1980 तमे दशके यदा अहं कृषकान् वृक्षारोपणार्थं प्रेरयामि स्म तदा अहम् अवगतवती यत् सर्वकारस्य भ्रष्टाः कर्मचारिणः एव वनानाम् अधिकतर-विनाशाय उत्तरदायिनः सन्ति । अधिकारिणः स्व-प्रियेभ्यः निर्मातृभ्यः भूमिः वृक्षाः च अवैधरूपेण विक्रीतवन्तः आसन् । 1990 तमे दशके राष्ट्रपतिः डेनियल-अरेप-मोयिन-महोदयः सर्वकारस्य केचन अराजकाः जनाः जातीय-समुदायान् भूमिविषयके प्रश्ने परस्परं सङ्घर्षं कलहं च कारितवन्तः । एतस्मात् रिफ्टवैली इत्यस्य नैकेषां केन्यादेश-वासिनाम् आजीविकाः अधिकाराः च नष्टाः जाताः । केचन निजप्राणान् त्यक्तवन्तः । शासकदलस्य समर्थकाः भूमिं प्राप्तवन्तः तथा च लोकतन्त्र-समर्थकस्य आन्दोलनस्य ये पक्षधराः आसन् ते विस्थापिताः जाताः । इयं सर्वकारस्य काचित् गुप्तयोजना आसीत् यस्याः उद्देश्यः आसीत् यत् समुदायाः भूमिसम्बद्धे प्रकरणे परस्परं कलहं कुर्युः तथा च सत्तायां सर्वकारस्य नियन्त्रणं निरन्तरं भवेत् । यदि ते परस्परं सङ्घर्षशीलाः भविष्यन्ति तर्हि लोकतन्त्रस्य याचकानां पार्श्वे न्यूनाः अवसराः भविष्यन्ति"

ऊपरि प्रदत्ते अनुच्छेदे भवन्तः लोकतन्त्रे सामाजिके जनान्दोलने च कं पारस्परिकं सम्बन्धं पश्यन्ति ? अनेन आन्दोलनेन सर्वकारं प्रति कीदृशी दृष्टिः स्वीकरणीया ?

एलेन लाऊजन फाल्कन-केगल कार्टून्स् इति –

लोकतन्त्रे कस्यचित् एकस्य समुदायस्य वर्गस्य वा नैव अपितु सर्वेषां हित-धारकाणां रक्षा स्यात् । इदम् अपि अनुभवितुं शक्यते यत् एतादृशाः समूहाः सत्तायाः उपयोगं तु कर्तुम् इच्छन्ति परन्तु दायित्वस्य निर्वहणं न इच्छन्ति । राजनैतिक-दलैः निर्वाचन-काले जनता सम्मुखी-करणीया भवति परन्तु एते समूहाः जनतां प्रति उत्तरदायिनः न भवन्ति । एवं शक्यते यत् प्रभावि-समूहाः आन्दोलनकारिणः च जनतायाः धनम् अथवा समर्थनं न प्राप्नुयुः । कदाचित् इत्थम् अपि भवति यत् प्रभाविसमूहाः अत्यल्प-जनानाम् एव समर्थनं प्राप्नुयुः परन्तु तेषां पार्श्वे विपुलं धनं स्यात् तथा च धनबलेन ते निजसङ्कुचित-विषये सार्वजनिक-चर्चा-कार्यक्रमान् सञ्चालयितुं साफल्यं प्राप्नुयुः इति ।

परन्तु सन्तुलित-दृष्ट्या पश्यामः चेत् स्पष्टीभवति यत् प्रभावि-समूहानाम् आन्दोलनानां च कारणात् लोकतन्त्रस्य आधारः दृढः जातः अस्ति । शासकेषु प्रभावजननं लोकतन्त्रे कश्चित् अहितकरः गतिविधिः नैव अस्ति, कामं सर्वे एतस्य अवसरं प्राप्नुयुः इति । सर्वकाराः प्रायः न्यूनपरिमाणेन धनाढ्यजनानां शक्तिशालि-जनानां च अनुचित-प्रभावेण प्रभाविताः भवन्ति । जन-साधारणस्य हितसमूहाः तथा च जन-आन्दोलनानि एतस्य अनुचित-प्रभावस्य प्रतिकाराय उपयोगि-भूमिकां निर्वहन्ति तथा च सामान्य-नागराणाम् आवश्यकतायाः सम्बन्धानां च विषये सर्वकारं सूचयन्ति ।

वर्ग-विशेषाः हितधारकाः सङ्घाः अपि महत्त्वपूर्ण-भूमिकां निर्वहन्ति । यदा विभिन्नसमूहाः सक्रियाः स्युः तदा कश्चित् एकः समूहः समाजस्य अपि प्रभुत्वं न स्थापयितुं शक्नोति । यदि कश्चित् एकः समूहः सर्वकारं तस्य हित-विषये नीतिं रचयितुं प्रभावं जनयति तर्हि अपरः समूहः तस्य तस्य प्रतिकाराय प्रभावं जनयिष्यति यत् नीतिनिर्माणम् एतत्प्रकारेण न स्यात् । सर्वकारः अपि एतस्यां स्थितौ नैरन्तर्येण अवगतः भवति यत् समाजस्य विभिन्नवर्गाः किम् इच्छन्ति । एतस्मात् परस्पर-विरोधि-हितधारकाणां मध्ये सामञ्जस्य-स्थापनं शक्तिसन्तुलनं च शक्यते ।

अस्य व्यङ्ग्यचित्रस्य शीर्षकम् अस्ति "सूचना असूचना" प्रचारे प्रायेण कस्य चर्चाः चलन्ति ?वार्तापत्रेषु अधिकतया केषां विषये लिखितं भवति ?

1. प्रभाविसमूहाः जनान्दोलनानि च कथं प्रभावयन्ति ?
2. प्रभाविसमूहानां राजनैतिकदलानां च पारस्परिक-सम्बन्धानां स्वरूपं कीदृशं भवति, वर्णयन्तु।
3. प्रभावि-समूहानां गतिविधयः लोकतान्त्रिक-सर्वकारस्य कार्यप्रक्रियायां कथम् उपयोगिनः भवन्ति ?
4. प्रभावि-समूहाः इति कथं सन्ति ? कानिचन उदाहरणानि सूचयन्तु।
5. प्रभावि-समूहस्य राजनैतिकदलस्य च मध्ये किम् अन्तरम् अस्ति ?
6. यानि सङ्घटनानि विशिष्ट-वर्गाणां तद्यथा – श्रमिकाणां कर्मचारिणां शिक्षकाणाम् अधिवक्तृणां च हितानि वर्धयितुं कार्यक्रमान् सञ्चालयन्ति ते ---- इति उच्यन्ते।
7. निम्नलिखितेषु केन कथनेन स्पष्टीभवति यत् प्रभावि-समूहस्य राजनैतिक-दलस्य च मध्ये का भिन्नता भवति –
   (क) राजनैतिक-दलानि राजनैतिकं पक्षं स्वीकुर्वन्ति अपरञ्च प्रभाविसमूहाः राजनैतिक-विषयाणां चिन्तां न कुर्वन्ति।
   (ख) प्रभाविसमूहाः काञ्चन जनान् यावत् एव सीमिताः न भवन्ति अपरञ्च राजनैतिकदलस्य परिधिः अधिकजनान् यावत् प्रसृता भवति।
   (ग) प्रभावि-समूहाः सत्तायाः प्राप्तिं न इच्छन्ति अपरञ्च राजनैतिकदलानि सत्तां प्राप्तुम् इच्छन्ति।
   (घ) प्रभावि-समूहाः जनानां निग्रहणं न कुर्वन्ति परन्तु राजनैतिक-दलानि कुर्वन्ति।
8. प्रथमसूच्याः मेलनं द्वितीयसूच्या सह कुर्वन्तु तथा च सूचीनाम् अधः प्रदत्तसारणीतः समुचितनि उत्तराणि चिन्वन्तु ---

	सूची - i	**सूची - ii**
1	कस्यचित् विशिष्टवर्गस्य अथवा समूहस्य हितविषयाणां वर्धकानि सङ्घटनानि	(क) आन्दोलनम्
2.	जन-सामान्यस्य हितानां वर्धकानि सङ्घटनानि	(ख) राजनैतिकदलम्
3	कस्याश्चित् सामाजिक-समस्यायाः समाधानाय सञ्चालितः कश्चित् एतादृशः सङ्घर्षः यस्मिन् साङ्घटनिक-संरचना अपि भवितुं शक्नोति न चापि भवितुं शक्नोति।	(ग) वर्ग-विशेषस्य हितसमूहाः
4	एतादृशं सङ्घटनं यत् राजनैतिक-सत्तायाः प्राप्तये जनानां निग्रहणं करोति।	(घ) लोककल्याणकारि-हित-समूहाः

	1	2	3	4
(क)	ग	घ	ख	क
(ख)	ग	घ	क	ख
(ग)	घ	ग	ख	क
(घ)	ख	ग	घ	क

9. प्रथमसूच्याः द्वितीयसूच्या सह मेलनं कुर्वन्तु, सूचीनाम् अधः प्रदत्तसारण्यां समुचितोत्तराणि च चिन्वन्तु –

	सूची - I	**सूची II**
1	प्रभाविसमूहः	(क) नर्मदा-रक्षा-आन्दोलनम्
2	दीर्घावधेः आन्दोलनम्	(ख) असमगणपरिषद्
3	कञ्चित् विषयाधारितं जनान्दोलनम्	(ग) महिलान्दोलनम्
4	राजनैतिकदलानि	(घ) उर्वरक-विक्रेतृणां सङ्घः

	1	2	3	4
(अ)	घ	ग	क	ख
(ब)	ख	क	घ	ग
(स)	ग	घ	ख	क
(द)	ख	घ	ग	क

10. प्रभावि-समूहानां राजनैतिकदलानां च विषये निम्नलिखित-कथनेषु विचारयन्तु।

(क) प्रभावि-समूहाः समाजस्य कस्यचिद् वर्गविशेषस्य हितानां सङ्घटित-अभिव्यक्तिरूपेण भवन्ति।

(ख) प्रभाविसमूहाः राजनैतिक-विषयेषु कम् अपि पक्षं गृह्णन्ति।

(ग) सर्वे प्रभाविसमूहाः राजनैतिक-दलानि भवन्ति।

अधुना अधः प्रदत्तेषु विकल्पेषु समुचितविकल्पं चिन्वन्तु –

(अ) क, ख , ग (ब) क, ख (स) ख, ग (द) क, ग

प्रश्नावली

11. मेवातः हरियाणायाः सर्वाधिकं पश्चवर्तिक्षेत्रम् अस्ति । गुरुग्रामस्य फरीदाबाद-जनपदस्य च भागः आसीत् । मेवातस्य जनाः अनुभूतवन्तः यत् यदि क्षेत्रस्य स्थापनं पृथक् जनपद-रूपेण रचितः स्यात् तदा एतस्मिन् क्षेत्रे अधिकम् अवधानं भविष्यति। परन्तु, राजनैतिक-दलानि एतस्मिन् विषये रुचिं न दधति स्म। 1996 तमे वर्षे मेवात-एजुकेशन-एंड-सोशल-आर्गेनाइजेशन इत्यनेन तथा च मेवात-साक्षरता-समितिः पृथक् जनपद-निर्माणस्य याचानाम् अकुरुताम्। परवर्तिकाले 2000तमे ख्रिस्ताब्दे मेवात-विकास-सभायाः स्थापना जाता। समित्या नैकानि जन-आन्दोलनानि सञ्चालितानि । बाध्यता-वशात् काग्रेसदलेन नेशनल-लोकदलेन च एतस्मै विषयाय समर्थनं दत्तम्। 2005 तमे ख्रिस्ताब्दे यानि विधानसभायाः निर्वाचनानि भवितव्यानि आसन् ततः पूर्वम् एव राजनैतिक-दलस्य नेतारः उक्तवन्तः यत् नवीनजनपदस्य निर्माणं भविष्यति। नवीनं जनपदं 2005 तमवर्षस्य जुलैमासे रचितम्।

एतस्मिन् उदाहरणे भवन्तः आन्दोलनस्य राजनैतिक-दलस्य सर्वकारस्य च मध्यस्थं सम्बन्धं पश्यन्ति ? किं भवन्तः किञ्चन एतादृशम् उदाहरणं दातुं शक्नुवन्ति यत् एतस्मात् उदाहरणात् पृथक् सम्बन्धं दर्शयेत् ?

राजनैतिक-दलानि

परिचयः

लोकतन्त्रस्य इतिहास-विषयके वर्णने अस्माभिः अनेकधा राजनैतिक-दलानां विषये चर्चा कृता । नवम-कक्षायाम् अस्माभिः दृष्टम् आसीत् यत् लोकतान्त्रिक-शासन-व्यस्थायाः, संविधानस्य च रचनायै, निर्वाचन-राजनीतेः सर्वकारस्य च सङ्घटने सञ्चालने च राजनैतिक-दलानां भूमिका भवति । अस्मिन् पाठ्यपुस्तके अस्माभिः राजनैतिकदलानां सत्तायाः विभाजनस्य वाहकरूपेण तथा च लोकतान्त्रिक-राजनीतौ सामाजिक-समूहानां पक्षतः सन्ध्यादिविषये अपि च घटबन्धन-दलस्य रूपेण चर्चा कृता एते समूहाः एव घटबन्धने राजनैतिक-दलानां साहाय्यं कुर्वन्ति । लोकतान्त्रिक-चर्चाया समाप्तेः पूर्वम् आयान्तु, राजनैतिक-दलानां प्रकृतिं तथा च कार्यस्य विषये सूक्ष्मरूपेण अवगन्तुं प्रयत्नं कुर्मः – विशेषतया स्वदेशस्य राजनैतिक-दलानां विषये इति । राजनैतिक-दलानाम् आवश्यकता किमर्थम् अस्ति ? लोकतन्त्राय राजनैतिक-दलानां कियती सङ्ख्या समीचीना अस्ति ? एतस्मिन् सन्दर्भे वयं वर्तमान-कालिकस्य राष्ट्रियाणां क्षेत्रीय-राजनैतिक-दलानां च परिचयं दास्यामः तथा च सहैव इदम् अवगन्तुम् अपि प्रयत्नं करिष्यामः यत् राजनैतिक-दलैः सह काः न्यूनताः सम्बद्धाः सन्ति तथा च ताः न्यूनताः दूरीकर्तुं किं कर्तुं शक्यते ।

अध्यायः - ७

---- भवन्तः मत्तः एकमताः सन्ति यत् दलानि पक्षपातीनि भवन्ति, भेदभावनां विद्वेषं च प्रसारयन्ति। दलानि जनानां विभाजन-कार्यम् अतिरिच्य किमपि न कुर्वन्ति ! एतत् एव तेषां यथार्थं कार्यम् अस्ति।

राजनैतिकदलानाम् आवश्यकता किमर्थम् ?

कस्यापि लोकतान्त्रिक-व्यवस्थायाः संस्थासु राजनैतिक-दलानि विशिष्टतया दृश्यन्ते । अधिकतराणां सामान्यजनानां दृष्ट्या लोकतन्त्रस्य अभिप्रायः राजनैतिक-दलानि एव सन्ति । यदि भवन्तः देशस्य सुदूरेषु क्षेत्रेषु ग्रामीण-क्षेत्रेषु च गच्छेयुः तथा च अल्पं ये अधीतवन्तः जनाः तादृशैः सह वार्तालापं कुर्युः तदा शक्यते यत् भवन्तः एतादृशान् जनान् अपि प्राप्नुयुः ये संविधानस्य विषये सर्वकारस्य च स्वरूपस्य विषये न जानीयुः । वस्तुतः, राजनैतिक-दलानां विषये ते अवश्यमेव किमपि तु जानन्ति । परन्तु दलानां विषये प्रत्येकं जनः किमपि तु जानाति परन्तु एतस्य अभिप्रायः अयं नास्ति यत् राजनैतिक-दलानि अतीव लोकप्रियानि सन्ति । अधिकतराः जनाः सामान्यतः दलानां विषये विपरीताभिः धारणाभिः ग्रस्ताः भवन्ति । निजलोकतान्त्रिक-व्यवस्थायाः राजनैतिक-जीवनस्य च प्रत्येकं दुर्गुणाय ते राजनैतिक-दलानि एव दोषीणि इति कथयन्ति । सामाजिकानां राजनैतिक-विभाजनानां च कृते दलानि एव दोषीणि इति मन्यन्ते ।

एतस्याम् अवस्थायाम् अयं प्रश्नः स्वाभाविकरूपेण उदेति – किम् वास्तविकतायाम् अस्मभ्यं राजनैतिक-दलानाम् आवश्यकता अस्ति ? प्रायः शतं वर्षेभ्यः पूर्वं विश्वस्य केवलं केषुचित् एव देशेषु तत्रापि अङ्गुलिगण्यानि राजनैतिक-दलानि आसन् । अद्य अङ्गुलिगण्याः एव एतादृशाः देशाः सन्ति यत्र राजनैतिक-दलानि एव न सन्ति । आविश्वं लोकतान्त्रिक-देशेषु राजनैतिक-दलानि एतावन्ति सर्वव्यापीनि किमर्थं जातानि ? आयान्तु, सर्वादौ एतस्य प्रश्नस्य उत्तरं प्रयच्छन्तु यत् राजनैतिकदलं किम् अस्ति तथा च तस्य कार्यं किं भवति । तेषाम् आवश्यकतायाः विषये चर्चा अनन्तरकाले भविष्यति ।

(1) एम.गोवर्द्धनः (2) ए.मुरलीधरनः (3) एम.मूर्तिः (4) टी.सिंगरवेलुः, द हिन्दू।

निर्वाचन-आयोगः निर्वाचनकाले भित्तिलेखनस्य प्रतिबन्धं कृतवान् । अधिकतराणां दलानां कथनम् अस्ति यत् इदं निर्वाचनस्य प्रचारस्य सर्वाधिक-अनर्घः उपायः आसीत् । निर्वाचनस्य काले भित्तीनां दृश्यं दर्शनीयं भवति । अत्र तमिलनाडुतः भित्तिलेखनस्य कानिचन उदाहरणानि प्रदत्तानि सन्ति ।

राजनैतिकदलस्य अर्थः

राजनैतिक-दलम् एतादृशानां जनानां सङ्घटित-समूहः भवति यः निर्वाचने भागग्रहणाय सर्वकारे च राजनैतिक-सत्तायाः प्राप्तेः उद्देश्येन कार्यं करोति । समाजस्य सामूहिकं हितं मनसि निधाय अयं समूहः काश्चन नीतीः कार्यक्रमान् च निश्चयीकरोति । सामूहिक-हितम् इति कश्चित् विवादास्पदविचारः अस्ति । एतम् अधिकृत्य सर्वेषां विचारः पृथक् पृथक् भवति ।

आर.के.लक्ष्मणः, ब्रशिंग अप द इयर्स इति।

अनेन एव आधारेण दलस्य नेतारः जनान् एवं बाधयितुं प्रयत्नं कुर्वन्ति यत् तेषां नीतयः अन्येभ्यः श्रेष्ठाः सन्ति । ते जनसमर्थनं प्राप्य निर्वाचने च विजयीभूत्वा तासां नीतीनां प्रवर्तनाय प्रयत्नं कुर्वन्ति । अनेन एव प्रकारेण दलानि कस्यापि समाजस्य आधारभूतं राजनैतिकं विभाजनं दर्शयन्ति । दलं समाजस्य केनापि भागेन सम्बद्धं भवति अतः तस्य दृष्टिः समाजस्य तं विशिष्टवर्गं -विशिष्टसमुदायं च प्रति उपकारिणी भवति । कस्यापि दलस्य परिचयः तस्य नीतिभ्यः तस्य सामाजिकाधारेण च निश्चयीभवति । राजनैतिक-दलस्य त्रयः प्रमुखाः विभागाः सन्ति ----

- नेतारः
- सक्रिय-सदस्याः
- अनुयायिनः समर्थकाः च

राजनैतिक-दलस्य कार्याणि

राजनैतिक-दलानि किं कुर्वन्ति ? मूलतः राजनैतिक-दलानि राजनैतिक-पदानि पूरयन्ति, तथा च राजनैतिक-सत्तायाः प्रयोगं कुर्वन्ति । दलानि एतत् कार्यम् अनेकधा कुर्वन्ति –

1. दलानि निर्वाचने स्पर्धन्ते । राजनैतिक-दलैः ये प्रत्याशिनः चिताः भवन्ति, अधिकतरेषु लोकतान्त्रिक-देशेषु तेषां मध्ये निर्वाचनं भवति । राजनैतिक-दलानि प्रत्याशिनां चयनं नैकप्रकारेण कुर्वन्ति । अमेरिका-प्रभृतिदेशेषु प्रत्याशिनः निर्वाचनं दलस्य सदस्याः समर्थकाः च कुर्वन्ति । अधुना अनेन प्रकारेण ये प्रत्याशिनः चयनं कुर्वन्ति तेषां देशानां सङ्ख्या निरन्तरं वर्धते। अन्येषु देशेषु यथा – भारते, दलानां नेतारः एव प्रत्याशिनः चिन्वन्ति।
2. दलानि पृथक् पृथक् नीतीः कार्यक्रमान् च मतदातृणां पुरतः उपस्थापयन्ति तथा च मतदातारः स्वेच्छया नीतीः कार्यक्रमान् च चिन्वन्ति। देशाय काः नीतयः समुचिताः सन्ति – एतस्मिन् विषये अस्माकं सर्वेषाम् अपि पृथक् पृथक् विचारः भवितुं शक्नोति । परन्तु कश्चित् अपि सर्वकारः स्वीयान् पृथक् पृथक् विचारान् सहैव न आदाय न चलितुं शक्नोति। लोकतन्त्रे समानविचारैः युक्ताः जनाः सहैव आनेतव्याः भवन्ति येन सर्वकारस्य नीतयः निश्चित-दिशायां कार्यं कर्तुं शक्नुयुः इति। दलानि एतदेव कार्यं कुर्वन्ति। राजनैतिक-दलानि

विविधान् विचारान् आधारभूतं परामर्शं यावत् आवृण्वन्ति येषां तानि समर्थनं कुर्वन्ति। सर्वकारः प्रायः शासक-दलस्य परामर्शस्य अनुरूपं निज-नीतीनां निर्धारणं कुर्वन्ति।

3 राजनैतिक-दलानि देशस्य अधिनियम-निर्माणे निर्णायक-भूमिकां निर्वहन्ति। अधिनियम-विषये औपचारिक-चर्चा भवति तथा च विधायिका तान् पारितान् करोति परन्तु विधायिकायाः अधिकतराः सदस्याः कस्यचित् दलस्य सदस्याः भवन्ति। एतस्मात् कारणात् ते निजदलस्य नेतुः निर्देशेन निर्णयं कुर्वन्ति।

4 राजनैतिक-दलानि एव सर्वकारस्य निर्माणं कृत्वा तस्य सञ्चालनं कुर्वन्ति। अस्माभिः गतवर्षे पठितम् आसीत् यत् नीतीनां विशाल-निर्णयानां च विषये निर्णयं राजनेतारः एव कुर्वन्ति तथा च एते नेतारः विभिन्न-दलानां भवन्ति। दलानि नेतुः चयनं कुर्वन्ति तान् प्रशिक्षयन्ति तथा च पुनः दलस्य सिद्धान्तानां कार्यक्रमाणां च अनुसारं निर्णयान् स्वीकर्तुं मन्त्रिणां नियुक्तिं कुर्वन्ति यतः ते दलस्य इच्छानुसारं सर्वकारस्य सञ्चालनं कर्तुं शक्नुयुः इति।

समुचितम् अस्ति, मन्यामहे यत् वयं राजनैतिक-दलानां विना न स्थातुं शक्नुमः। परन्तु किञ्चित् सूचयन्तु यत् केन आधारेण जनता कस्यचित् राजनैतिक-दलस्य समर्थनं करोति ?

5 यानि राजनैतिक-दलानि निर्वाचने पराजितानि भवन्ति तानि शासकदलस्य विरोधिपक्षस्य भूमिकां निर्वहन्ति। सर्वकारस्य कुनीतीनां विफलतायाः च ते आलोचनया सह स्वीयं पृथक् विचारम् अपि उपस्थापयन्ति। विपक्षि-दलानि सर्वकारं विरुध्य सामान्य-जनताम् अपि विरोध-भावना-ग्रस्तां कुर्वन्ति।

6 जनमत-निर्माणे दलानि महत्त्वपूर्ण-भूमिकां निर्वहन्ति। ते विषयान् उपस्थापयन्ति तेषु च चर्चाम् अपि कुर्वन्ति। विभिन्न-दलानां लक्षाधिकाः कार्यकर्तारः देशे वर्तन्ते। समाजस्य विभिन्नेषु वर्गेषु तेषां मित्राणि सङ्घटनानि प्रभाविसमूहाः च अपि कार्यं कुर्वन्ति। दलानि नैकेषां दलितजनानां समस्याः उपस्थापयन्तः जन-आन्दोलनानि अपि कुर्वन्ति। प्रायः विभिन्नदलैः उपस्थाप्यमानान् विचारान् परितः एव समाजस्य जनानां विचारः दृढताम् उपयाति।

7 दलानि एव सर्वकारद्वारा सर्वकारीय-तन्त्रैः च सञ्चाल्यमानान् कल्याण-कार्यक्रमान् यावत् जनानां प्राप्तिं सुलभां कुर्वन्ति। कस्मैचित् सामान्यजनाय कस्यचित् सर्वकारिणः अधिकारिणः तुलनायां केनचित् राजनैतिककार्यकर्त्रा सह परिचयकरणम्, तेन सह सम्पर्कसाधनं च सरलं भवति। एतस्मात् कारणात् जनाः राजनैतिकदलेषु सम्पूर्णतया न विश्वसन्तः अपि तानि प्रायः घनिष्ठरूपेण मन्यन्ते। दलैः अपि प्रत्येकं स्थितौ जनानां याचनासु आवश्यकतासु च अवधानस्य आकर्षणं करणीयं भवति नो चेत् जनाः तान् अग्रिमेषु निर्वाचनेषु तेषां समर्थनम् अकृत्वा तान् पराजितान् कर्तुं शक्नुवन्ति।

राजनैतिकदलस्य आवश्यकता

दलानां कार्यसूचीतः तस्य प्रश्नस्य समाधानं भवति यः अस्य खण्डस्य आरम्भे पृष्टम् आसीत्। वस्तुतः अस्मभ्यं राजनैतिक-दलानाम् आवश्यकता एतादृशानां कार्याणां कृते एव अस्ति। परन्तु अधुना अपि अयं प्रश्नः समुदेति यत् आधुनिक-लोकतान्त्रिकी व्यवस्था राजनैतिकदलैः विना किमर्थं न चलितुं शक्नोति ? दलैः विना कीदृशी स्थितिः भविष्यति – एतस्य विषयस्य कल्पनां कृत्वा एव वयं तस्य आवश्यकताम् अवगन्तुं शक्नुमः। यदि राजनैतिक-दलानि न भविष्यन्ति तर्हि सर्वे प्रत्याशिनः स्वतन्त्राः निर्दलीयाः च भविष्यन्ति। तदा, एतेषु कश्चित् अपि नीतिगत-परिवर्तनस्य विषये जनानां समक्षे निर्वाचनकाले संकल्पं न स्वीकर्तुं शक्नोति। सर्वकारस्य घटनं भविष्यति परन्तु तस्य उपयोगित्वं सन्दिग्धं भविष्यति। निर्वाचिताः प्रतिनिधयः केवलं निजेषु निर्वाचनक्षेत्रेषु कृतकार्याणां कृते उत्तरदायिनः भविष्यन्ति। परन्तु, देशः कथं प्रवर्तेत एतदर्थं कश्चित् अपि उत्तरदायी न भविष्यति।

अदलीय-आधारेण यानि पंचायत्त-निर्वाचनानि भवन्ति तेषां उदाहरणं पुरतः संस्थाप्य वयं एतत् तथ्यम् अवगन्तुं शक्नुमः। यद्यपि एतेषु निर्वाचनेषु दलानि औपचारिकरूपेण स्वप्रत्याशिनः तत्र भागाय न उपस्थापयन्ति परन्तु निर्वाचनस्य अवसरे सम्पूर्णग्रामः विभागशः जायते तथा च प्रत्येकं वर्गः सर्वेषां पदानां कृते निज-प्रत्याशिनां गणं तत्र अवतारयति। राजनैतिक-दलानि अपि सर्वथा एतत् एव कार्यं कुर्वन्ति। इदम् एव कारणम् अस्ति यत् विश्वस्य प्रायः सर्वेषु देशेषु राजनैतिकदलानि अस्माकं दृष्टिपथम् आयान्ति --- कामं, सः देशः महान् स्यात् अथवा लघुः, नवीनः स्यात् अथवा पुरातनः, विकसितः स्यात् अथवा विकासशीलः।

कथनं रहस्योद्घाटनम्

शासकदलम् – यस्य दलस्य शासनं स्यात् अर्थात् यस्य सर्वकारः स्यात्।

राजनैतिक-दलानां प्रादुर्भावः प्रतिनिधित्वस्य आधारितस्य लोकतान्त्रिक-व्यवस्थायाः विकासेन सह सम्बद्धः अस्ति। वयं पठितवन्तः यत् विशाल-समाजेभ्यः प्रतिनिधित्व-आधारितस्य लोकतन्त्रस्य आवश्यकता भवति। यदा समाजाः महान्तः जटिलाः च भवन्ति, तदा तैः विभिन्नेषु विषयेषु पृथक् पृथक् विचारं सङ्ग्रहीतुं सर्वकारस्य दृष्टौ आनेतुं कस्यापि माध्यमस्य समितीनां च आवश्यकता भवति। विभिन्न-स्थानेभ्यः प्रतिनिधीनां समाञ्जस्यस्य आवश्यकता भवति यतः कश्चित् उत्तरदायि-सर्वकारस्य घटनं भवितुं शक्नुयात्। अत्र सर्वकारस्य समर्थनाय तस्य प्रतिबन्धाय नीतीनां संरचनायै नीतीनां च समर्थनाय अथवा विरोधाय च उपकरणानाम् आवश्यकता भवति। प्रत्येकं प्रतिनिधि-सर्वकारस्य एतादृश्यः याः अपि आवश्यकताः भवन्ति, राजनैतिकदलानि ताः पूरयन्ति। अनेन प्रकारेण वयं कथयितुं शक्नुमः यत् राजनैतिक-दलानि लोकतन्त्रस्य अनिवार्य-प्रतिभूतिरूपेण सन्ति।

राजनैतिक-दलानां गतिविधिदर्शक-चित्राणां वर्गीकरणं कुर्वन्तु। उपरि ज्ञापित-गतिविधेः सम्बद्धस्य निजक्षेत्रस्य कस्यचित् चित्रस्य अथवा कस्याश्चित् वार्तायाः कर्तितखण्डम् अन्वेषयन्तु।

(1) पी.वी. मुक्तहृण्यम् (2) के. गोपीनाथन (3) आर. आर. कोनवार (4) ए. चक्रवर्ती, द हिन्दू से साभार

1. *भाजपा-महिला-मोर्चा इत्यस्य कार्यकर्त्र्यः पलाण्डोः अनिलचुल्ल्याः च मूल्यवर्धनस्य विरोधे प्रदर्शनं कुर्वत्यः सन्ति।*
2. *विषाक्त-मद्यपानेन मृतजनानां कुटुम्बेभ्यः लक्षं रूप्यकाणां धनादेशं यच्छन् मन्त्री।*
3. *कोरियायाः समवाय-पोस्को इति ओडिसातः लौहायस्क-निर्याताय अनुमतिः सर्वकारेण दत्ता अतः तस्य विरोधे माकपा, भाकपा, आजीपी तथा च जद(एस) इत्येषां कार्यकर्तारः सम्प्रचलनस्य आयोजनं कुर्वाणाः सन्ति।*

कियन्ति राजनैतिक-दलानि ?

लोकतन्त्रे नागराणां कश्चित् अपि समूहः राजनैतिकदलस्य निर्माणं कर्तुं शक्नोति। एतस्मिन् औपचारिकार्थे सर्वेषु देशेषु नैकानि राजनैतिक-दलानि सन्ति। भारते एव निर्वाचन-आयोगे पञ्जीकृतानां दलानां सङ्ख्या 750 तः अधिका अस्ति। परन्तु, प्रत्येकं दलं गभीराह्वानस्य स्थितौ न भवति। निर्वाचन-जयस्य सर्वकार-निर्माणस्य च स्पर्धायां सामान्यतः कानिचन दलानि एव सक्रियाणि भवन्ति। एतस्याम् अवस्थायां प्रश्नः उदेति यत् लोकतन्त्रस्य समृद्धये कियन्ति दलानि स्युः ?

नैकेषु देशेषु केवलम् एकस्मै एव दलाय सर्वकारस्य सञ्चालनस्य अनुमतिः अस्ति।

राजनीतेः नैतिकशक्तिः !

कस्यचित् वैकल्पिक-राजनैतिक-संरचनायाः वार्त्तया किशनस्य कः अभिप्रायः आसीत् ? सुधायाः करुणायाः शाहीनायाः ग्रेस्याः च वार्त्तालापस्य क्रमे अयं प्रश्नः समुपस्थितः । एताः चतस्रः महिलाः देशस्य पृथक् पृथक् भागेषु जायमानैः दृढैः आन्दोलनैः सम्बद्धाः आसन् । एताः चतस्रः ओडिसायाः कस्मिंश्चित् ग्रामे उपविष्टाः आसन् तथा च जनान्दोलनानां भविष्ये नवीनप्रकारेण विचारयन्ति स्म । तत्र ताः आन्दोलनानां विषये दैनिक-कार्याणां स्वल्पा अपि समस्या न आसीत् ।

स्वाभाविक-रूपेण तथ्यानि किशन-वर्यं प्रति अभिमुखानि जातानि तं सम्पूर्णदेशस्य आन्दोलनकारिणः, निजमित्रं राजनैतिकं दार्शनिकं च नैतिक-मार्गदर्शकं च मन्यन्ते स्म । किशनस्य तर्कः आसीत् यत् जनान्दोलनस्य जनाः निर्वाचनीय-राजनीतौ साक्षात् सहभागितां कुर्युः । अयं कश्चित् सरलः परन्तु शक्तिशाली तर्कः आसीत् । एकस्मिन् विषये केन्द्रितेन आन्दोलनेन जीवनस्य कस्मिंश्चित् क्षेत्रे किञ्चित् परिवर्तनं तु आनेतुं शक्यते परन्तु यदि वयं सामाजिक-परिवर्तनम् अथवा जीवनस्य कस्मिंश्चित् अपि पक्षे आधारभूतं परिवर्तनम् इच्छामः तर्हि अस्मभ्यं राजनैतिक-सङ्घटनस्य आवश्यकता भविष्यति । जनान्दोलनैः राजनीतौ नैतिक-शक्तिरूपेण किञ्चित् नवीनं राजनैतिक-सङ्घटनं निर्मातव्यं स्यात् । सः अवदत् यत् इयं काचित् तात्कालिकी आवश्यकता अस्ति यतो हि सर्वाणि राजनैतिक-दलानि सामाजिक-परिवर्तनाय अप्रासङ्गिकानि जातानि सन्ति ।

ग्रेसी अवदत् , " परन्तु किशन-वर्यः न कदापि स्पष्टीकृतवान् यत् इदं सङ्घटनं कीदृशं भविष्यति । सः केवलं राजनैतिक-विकल्पस्य अथवा राजनीतौ तृतीयशक्तेः विषये चर्चाम् अकरोत् । परन्तु किं तस्य एतादृशस्य कथनस्य आशयः कस्यचित् राजनैतिक-दलस्य निर्माणेन आसीत्, ग्रेस्याः कथनम् आसीत् यत् पुरातन-प्रकारकस्य राजनैतिक-दलं परिवर्तनम् आनेतुं समर्थः न अस्ति ।

सुधा तस्याः कथनेन एकमता आसीत् – मया एतस्मिन् विषये अनेकधा विचारितम् अस्ति । अहं मन्ये यत् अस्माभिः अद्यपर्यन्तं विस्थापनस्य भूमण्डली-करणस्य जातिगतस्य लैङ्गिकस्य उत्पीडनस्य अथवा विकासस्य वैकल्पिक-प्रारूपाय यानि आन्दोलनानि समुपस्थितानि सन्ति, तानि राजनैतिकानि एव सन्ति, परन्तु यथा एव वयं कस्यचित् दलस्य निर्माणं करिष्यामः, अस्माकं एतावतां वर्षाणां प्रतिष्ठा नष्टा भविष्यति । तदा जनाः अस्मान् नेतृभ्यः पृथक् न मंस्यन्ति ।

करुणा चर्चामध्ये अवदत् , पुनः अस्माभिः अपि दृष्टम् अस्ति यत् वर्तमानदलेषु प्रभावं संस्थाप्य अपि बहुकिमपि प्राप्तुं शक्यते । अस्माभिः पञ्चायत-निर्वाचनेषु निजाः प्रत्याशिनः भागं गृहीतुं नियुक्ताः आसन् परन्तु परिणामः उत्साहजनकः नास्ति । जनाः अस्माकं कार्यस्य सम्माननं कुर्वन्ति, ते अस्मान् उत्तमाः अपि मन्यन्ते परन्तु यदा अस्माकं पक्षे मतदानस्य अवसरः आयाति तदा ते विस्थापित-दलानां पक्षे एव मतदानं कुर्वन्ति ।



शाहीना तैः सह एकमता न आसीत् – पश्यन्तु , विषयः अतिस्पष्टः अस्ति । किशन-वर्यः इच्छति स्म यत् सर्वेषां जनान्दोलनानां कार्यकर्तारः मिलित्वा कस्यचित् नवीनस्य राजनैतिकदलस्य निर्माणं कुर्युः, आम्, सः इच्छति स्म यत् एतत् राजनैतिकदलं अन्यदलेभ्यः सर्वथा पृथक् रूपेण स्यात् इति । सः राजनैतिक-विकल्पस्य निर्माणस्य वैकल्पिक-प्रकारकस्य राजनीतिम् इच्छति ।

किशन-वर्यः अधुना अस्मिन् जगति नास्ति । एतेषां चतुर्णां कार्यकर्तृणां विषये भवतां किं मतम् अस्ति ? किं तैः नवीनं राजनैतिकदलं निर्मातव्यं स्यात् ? किं किञ्चित् राजनैतिकदलं राजनीतौ नैतिकबल-रूपेण भवितुं शक्नोति ? इदं दलं कीदृशं स्यात् ?

एतस्मात् कारणात् सा एकदलीया शासन-व्यवस्था इति उच्यते । नवम-कक्षायाम् अस्माभिः दृष्टम् आसीत् यत् चीनदेशे केवलं कम्यूनिस्ट-दलाय एव शासनस्य अनुमतिः अस्ति । यद्यपि अधिनियमीय-रूपेण तत्रत्याः जनाः अपि राजनैतिक-दलस्य निर्माणाय स्वतन्त्राः सन्ति परन्तु तत्रत्या निर्वाचनीय-प्रणाली सत्तायै स्वतन्त्र-प्रतिद्वन्द्वितायाः अनुमतिं न ददाति अतः जनाः नवीनस्य राजनैतिकदल-निर्माणस्य लाभं न पश्यन्ति एतस्मात् कारणात् एव कश्चित् अपि जनः तत्र नवीनं राजनैतिक-दलं न निर्मातुं पारयति। वयम् एकदलीय-व्यवस्थां सुविकल्पस्य रूपेण न मन्तुं शक्नुमः यतो हि इयं लोकतान्त्रिक-विकल्पस्य रूपेण नास्ति । कस्याम् अपि लोकतान्त्रिक-व्यवस्थां न्यूनातिन्यूनं द्वाभ्यां दलाभ्यां राजनैतिक-सत्तायै निर्वाचने प्रतिद्वन्द्वितां कर्तुम् अनुमतिः तु अवश्यम् एव स्यात् । सहैव तेषां कृते सत्तां प्रति आगमनस्य पर्याप्तः अवसरः अपि स्यात् ।

केषुचित् देशेषु सत्ता सामान्यतः द्वयोः मुख्यदलयोः मध्ये एव परिवर्तते । तत्र नैकानि अन्यानि दलानि भवितुं शक्नुवन्ति, तानि अपि निर्वाचने भागं गृहीत्वा कानिचन पदानि जेतुं शक्नुवन्ति परन्तु केवलं द्वे एव दले बहुमत-प्राप्तये सर्वकार-निर्माणाय प्रबलाभ्यर्थिनः भवन्ति । अमरीकायां ब्रिटेने च एतादृशी एव द्विदलीया व्यवस्था अस्ति ।

यदा नैकानि दलानि सत्तायै स्पर्धालूनि स्युः तथा च द्वाभ्यां दलाभ्याम् अधिकदलेभ्यः स्वीयेन बलेन अथवा अन्यैः सह घटबन्धनं कृत्वा सत्तां प्रति आगमनस्य समीचीनाः अवसराः स्युः तर्हि एषा बहुदलीया व्यवस्था इति उच्यते। भारते अपि एतादृशी एव बहुदलीया व्यवस्था अस्ति। एतस्यां व्यवस्थायां नैकानि दलानि घटबन्धनं कृत्वा अपि सर्वकारस्य रचनं कर्तुं शक्नुवन्ति । यदा कस्याम् अपि बहुदलीय-व्यवस्थायां नैकदलानि निर्वाचने भाग-ग्रहणाय सत्तां च प्राप्तुं परस्परं संमिलन्ति तदा एतत् घटबन्धनम् अथवा मोर्चा इति उच्यते। यथा, 2004 तमस्य संसदीय-निर्वाचने भारते एतादृशानि त्रीणि प्रमुखानि घटबन्धनानि आसन्, राष्ट्रिय-जनतान्त्रिक-घटबन्धनं, संयुक्त-प्रगतिशील-घटबन्धनं वाम-मोर्चा इति । प्रायः बहुदलीया व्यवस्था अतीव समिश्रणयुक्ता इति दृश्यते तथा च देशं राजनैतिकीम् अस्थिरतां प्रति नयति परन्तु अनेन सह एव एतस्यां प्रणाल्यां विभिन्नाः हितविषयाः विचाराः राजनैतिकं प्रतिनिधित्वं प्राप्नुवन्ति ।

तर्हि, एतस्यां का प्रणाली श्रेष्ठा अस्ति ? प्रायः पृच्छ्यमानस्य एतस्य प्रश्नस्य संभवतः श्रेष्ठम् उत्तरम् इदम् एव भविष्यति यत् अयं कश्चित् श्रेष्ठः प्रश्नः न अस्ति । दलीयव्यवस्थायाः निर्वाचनं कस्यचित् मूकस्य हस्ते नास्ति । इयं दलीया व्यवस्था कस्याश्चित् चिरकालिकायाः कार्यप्रणाल्याः परं स्वयं विकासं प्राप्नोति तथा च अस्यां समाजस्य प्रकृतेः तस्याः राजनैतिक-विभाजनस्य राजनीतेः च इतिहासः तस्याः निर्वाचन-प्रणाल्याः इत्येतानि सर्वाणि तथ्यानि निजभूमिकां निर्वहन्ति । एषा शीघ्रं न परिवर्तयितुं शक्यते । प्रत्येकं देशः निजानां विशिष्ट-परिस्थितीनाम् अनुरूपं दलीय-व्यवस्थायाः विकासं करोति तत्र कारणम् इदम् अस्ति यत् द्वात्रीणि दलानि एतावतः दीर्घदेशस्य सर्वाः सामाजिकीः भौगोलिकीः च विविधताः आभ्यन्तरीकर्तुम् अक्षमः अस्ति । प्रत्येकस्मिन् देशे प्रत्येकं स्थितौ च काचित् एका एव आदर्शप्रणाली संचरेत् प्रवर्तेत वा इति न शक्यते ।

दलानाम् एतद् बाहुल्यं मह्यं न रोचते। तत्र बहु जनसम्मर्दः भवति। एते नेतारः घटबन्धनसदृशीं व्यवस्थां प्रकल्प्य तस्य प्रबन्धनं कथं कर्तुं पारयन्ति ? अहं तु सर्वेषां दलानां नामानि अपि स्मर्तुं न प्रभवामि।

आयान्तु, दलीय-व्यवस्थायाः विषये अस्माभिः यद् अवगतं तदनुसारं भारतस्य विभिन्नराज्येषु प्रवर्तन्ताम्। अत्र राज्यस्तरीयाः विद्यमानाः त्रिधा दलीयव्यवस्थाः प्रदत्ताः सन्ति। किं भवन्तः एतासां श्रेणीनां कृते न्यूनान्यूनं द्वयोः द्वयोः राज्ययोः नामानि सूचयितुं शक्नुवन्ति।

- द्विदलीया व्यवस्था
- द्विघटबन्धनयुक्ता बहुदलीय-व्यवस्था
- बहुदलीय-व्यवस्था

राजनैतिकदलेषु जनसहभागिता

प्रायः दृश्यते यत् राजनैतिक-दलानि सङ्कट-ग्रस्तानि सन्ति यतो हि जनता तानि सम्मानस्य दृष्ट्या न पश्यति। उपलब्धानि प्रमाणानि सूचयन्ति यत् तथ्यम् आंशिकरूपेण समुचितम् अस्ति। दीर्घप्रारूपे आधारितस्य नैकानि दशकानि यावत् सञ्चरितस्य सर्वेक्षणस्य तथ्यैः अवगम्यते यत् ---

दक्षिण-एशियायाः जनता राजनैतिक-दलेषु आधिक्येन न विश्वसिति। ये जनाः दलेषु 'सहसा विश्वासः न' 'अधिकः विश्वासः न' इत्यस्मिन् पक्षे उक्तवन्तः, तेषाम् अनुपातः 'किञ्चिन्मात्रं विश्वासः' अथवा 'पूर्णविश्वासः' इति उक्तवद्भ्यः अत्यधिकम् आसीत्।

इदम् एव तथ्यम् अधिकतरेषु लोकतन्त्रेषु प्रवर्तते। सम्पूर्णे विश्वे राजनैतिकदलम् एव एतादृशी संस्था अस्ति यस्यां जनाः अत्यल्पं विश्वसन्ति।

वस्तुतः, राजनैतिक-दलानां कार्यप्रणाल्यां जनानां सहभागितायाः स्तरः अतीव उन्नतः अस्ति। आत्मानं कस्यचित् राजनैतिक-दलस्य सदस्यरूपेण ये कथयन्ति इत्येतादृशानां भारतीयानाम् अनुपातः कनाडा, जापानं स्पेनं दक्षिण-कोरिया इत्येतादृशेभ्यः विकसित-देशेभ्यः अपि अधिकः अस्ति।

गत-त्रयाणां दशकानाम् अवधौ भारते राजनैतिक-दलानां सदस्यतायाः अनुपातः शनैः शनैः वर्धितः अस्ति।

आत्मानं ये कस्यचित् राजनैतिक-दलस्य घनिष्ठ-सम्बन्धिनः इति वदन्ति तादृशानां जनानाम् अनुपातः अपि एतस्मिन् अवधौ कालक्रमेण वर्धितः।

स्वल्पस्य आरोहावरोहस्य अनन्तरं भारते जनानां दलगत-सम्बन्धस्य वर्धनं जातम्।
ये आत्मानं केनचित् दलेन सह सम्बद्धाः वयम् इति वदन्ति तादृशानां जनानां सङ्ख्या



भारते दलीय-सदस्यता वर्धिता अस्ति।
आत्मानं ये कस्यचित् दलस्य सदस्यरूपेण वदन्ति तादृशानां जनानां सङ्ख्यायाः रेखाचित्रम्



विभिन्नदलनां सदस्य-सङ्ख्या दक्षिण-एशियायाम् अवशिष्टस्य विश्वस्य अपेक्षया बह्वधिका अस्ति।
ये आत्मानं कस्यचित् दलस्य सदस्यरूपेण वदन्ति तादृशानां जनानां सङ्ख्या





स्रोतः : एसडीएसए-समूहः, स्टेट ऑव डेमोक्रेसी इन दक्षिण-एशिया, देहली : आक्सफोर्ड-विश्वविद्यालयः मुद्रणम्, 2007



किम् एतानि व्यङ्ग्यचित्राणि प्रदत्ते गते पृष्ठे अङ्कानां रेखाचित्रेण सह साम्यं भजन्ते ?

राष्ट्रिय-राजनैतिक-दलानि

विश्वस्य सङ्घीय-व्यवस्थायाः युक्तेषु लोकतन्त्रेषु द्विविधानि राजनैतिक-दलानि सन्ति – सङ्घीय-घट्टेषु केवलम् एकस्मिन् घटके येषां दलानाम् अस्तित्वम् अस्ति तथा च नैकेषु सङ्घस्य घटकेषु येषां दलानाम् अस्तित्वम् अस्ति इति तादृशानि द्विविधानि दलानि सन्ति । भारते अपि इयम् एव स्थितिः अस्ति । नैकानि दलानि सम्पूर्णदेशे प्रसृतानि सन्ति तथा च तानि राष्ट्रियदलानि इति उच्यन्ते । एतेषां दलानां विभिन्नेषु राज्येषु घटकाः सन्ति । परन्तु आहत्य पश्यामः यत् राष्ट्रिय-स्तरेण यासां नीतीनां कार्यक्रमाणां रणनीतीनां च निर्धारणं भवति तदनुसारम् एव एते सर्वे घटकाः प्रवर्तन्ते ।

देशस्य प्रत्येकं दलेन निर्वाचन-आयोगे पञ्जीकरणं करणीयं भवति । आयोगः सर्वाणि दलानि समान-भावेन पश्यति परन्तु आयोगः महद्दलेभ्यः स्थापित-दलेभ्यः च कानिचन विशिष्टानि सौविध्यानि प्रयच्छति । तादृशेभ्यः जनेभ्यः पृथक् निर्वाचनीयं चिह्नं प्रददाति यस्य प्रयोगं दलस्य अधिकृत-प्रत्याशी एव कर्तुं शक्नोति । एतादृशं विशेषाधिकारं ये प्राप्नुवन्ति तथा च अन्यसौविध्यानि च यानि दलानि प्राप्नुवन्ति तानि मान्यता-प्राप्तदलानि इति उच्यन्ते । निर्वाचन-आयोगेन स्पष्टरूपेण नियमाः प्रकल्पिताः सन्ति यत् किञ्चित् अपि राजनैतिक-दलं कियत् प्रतिशतं मतानि प्राप्य अथवा स्थानानि जित्वा मान्यता-प्राप्तदलम् इति भवितुं शक्नोति । यदा किञ्चित् दलं राज्य-विधान-सभायाः निर्वाचनेषु प्राप्तमतानां षट् प्रतिशतम् अथवा ततोऽधिकं मतानि ये प्राप्नुवन्ति तथा च न्यूनातिन्यूनं द्वयोः स्थानयोः जयं प्राप्नोति तदा तत् दलं राज्यस्य राजनैतिक-दलानां रूपेण मान्यतां प्राप्नोति यदि किञ्चित् दलं लोकसभा-निर्वाचनेषु जातमतेषु अथवा चतुर्णां राज्यानां विधानसभानिर्वाचनेषु जातमतानां षड् प्रतिशतं प्राप्नोति तथा च लोकसभायाः निर्वाचनेषु न्यूनातिन्यूनं चतुर्षु स्थानेषु जयं प्राप्नोति तदा तत् दलं राष्ट्रियदलस्य मान्यतां प्राप्नोति ।

एतस्य वर्गीकरणस्य आधारेण 2006 तमे वर्षे देशे षड् दलानि राष्ट्रिय-स्तरेण मान्यता-प्राप्तानि आसन् । आयान्तु, एतेषु प्रत्येकस्मिन् विषये कानिचन महत्त्वपूर्णानि तथ्यानि अवगच्छेम ।

भारतीय-राष्ट्रिय-काङ्ग्रेसः –

सामान्यतः एतत् काङ्ग्रेसदलम् इति उच्यते तथा च एतत् काङ्ग्रेसदलं विश्वस्य प्राचीनतमेषु दलेषु वर्तते । 1885 तमवर्षे सङ्घटिते अस्मिन् दले नैकधा

विभाजनानि जातानि सन्ति । स्वतन्त्रतायाः परं राष्ट्रियस्तरेण प्रान्तीय-स्तरेण च नैकदशकान् यावत् इदं दलं प्रामुख्येन भूमिकाम् ऊढवत् । जवाहरलालनेहरोः नेतृत्वे अनेन दलेन भारते कस्यचित् आधुनिक-धर्मनिरपेक्ष-लोकतान्त्रिक-गणराज्य-निर्माणस्य प्रयासः कृतः। 1971 तमवर्षं यावत् नैरन्तर्येण पुनश्च 1980 तमवर्षतः 1989 तमवर्षं यावत् अनेन देशस्य शासनं कृतम्। 1989 तमवर्षात् परम् एतस्य दलस्य जनसमर्थने न्यूनता जाता परन्तु अधुना अपि इदं सम्पूर्णे देशे समाजस्य सर्वेषु वर्गेषु जनाधारम् अकल्पयत् । निजवैचारिक-प्रवृत्त्यनुसारम् अनेन मध्यमार्गीयेण दलेन धर्मनिरपेक्षताम् आधारीकृत्य दुर्बल-वर्गाणाम् अल्पसङ्ख्यक-समुदायानां च हितानि मुख्यविषयरूपेण चितानि सन्ति। इदं दलं नवीनानाम् आर्थिक-नीतीनां समर्थकम् अस्ति परन्तु एतत् तथ्यं प्रति अपि सावधानम् अस्ति यत् एतासां नीतीनां निर्धन-दुर्बल-वर्गीयेषु जनेषु च कुप्रभावः न भवेत्। 2004 तमे वर्षे लोकसभा-निर्वाचने भारतीय-राष्ट्रिय-काङ्ग्रेसदलेन 145 स्थानानि जित्वा इदं दलं महत्तम-दलस्य रूपेण जातम् । अधुना केन्द्रस्य शासकेन संयुक्त-प्रगतिशील-घटबन्धनस्य नेतृत्वम् इदम् एव दलं करोति।

भारतीय-जनता-दलम् – पुरातनस्य भारतीय-जनसङ्घं पुनर्जीवितं कृत्वा 1980 तमे वर्षे एतस्य दलस्य सङ्घटनं कृत्वाभारतीयजनता-पार्टीइति जातम्। भारतस्य प्राचीन-संस्कृत्या मूल्यैः च प्रेरितं भूत्वा दृढस्य आधुनिकस्य च भारत-निर्माणस्य लक्ष्यं मनसि निधाय भारतीयराष्ट्रवादस्य राजनीतेः च एतस्य दलस्य अवधारणायां सांस्कृतिक-राष्ट्रवादः प्रमुखतत्त्वरूपेण अस्ति। जम्मूकाश्मीर-राज्याय विशिष्ट-राज्यस्थानं न भवेत् इति दलस्य चिन्तनम् अस्ति । देशे ये जनाः निवसन्ति तेषां सर्वेषां जनानां कृते समान-नागरिक-संहिता भवेत् तथा च धर्मान्तरणस्य प्रतिबन्धः स्यात् इति पक्षे अस्ति। 1990 तमे दशके एतस्य दलस्य समर्थनस्य आधारः अतिव्यापकतां प्राप्नोत् । आदौ देशस्य उत्तर-पश्चिमक्षेत्राणि तथा च नगरक्षेत्राणि यावत् एव इदं दलं सीमितम् आसीत् परन्तु अस्मिन् दशके दक्षिण-पूर्व-पूर्वोत्तरस्य देशस्य च ग्रामीण-क्षेत्रेषु स्वीयः जनाधारः वर्धितः । राष्ट्रिय-जनतान्त्रिक-घटबन्धनस्य नेतुः रूपेण इदं दलं 1998 तमे वर्षे सत्तां प्राप्नोत्। घटबन्धने नैकानि प्रान्तीयानि क्षेत्राणि च दलानि सम्मिलितानि आसन्। 2004 तमे लोकसभा-निर्वाचने इदं दलं पराजितम् अभवत् तथा च भारतीय-लोकसभायां मुख्यविपक्षि दलम् अस्ति।

बहुजन-समाज-पार्टी (दलम्) – स्व. कांशीरामस्य नेतृत्वे 1984 तमे वर्षे एतस्य दलस्य रचनं जातम् । बहुजनसमाजः यत्र दलिताः आदिवासिनः पश्चवर्तिनः धार्मिक-अल्पसङ्ख्यकाः च सम्मिलिताः आसन्, एतेषां सर्वेषां कृते राजनैतिक-सत्ताप्राप्तेः प्रयासः तेषां च प्रतिनिधित्वं स्यात् इति दृढप्रतिज्ञा अस्ति । बहुजनसमाजदलं साहूमहाराजः, महात्माफुले, पेरियार-रामास्वामि-नायकः बाबासाहबाम्बेडकरः इत्येतेषां विचारेभ्यः शिक्षाभ्यः च प्रेरणां प्राप्नोति । दलितानां निर्बल-वर्गाणां च जनानां कल्याणाय तेषां हितानां च रक्षायै ये विषयाः सन्ति तेषु सर्वाधिकस्य सक्रियस्य एतस्य दलस्य मुख्यः आधारः उत्तरप्रदेशे अस्ति, परन्तु मध्यप्रदेशे, छत्तीसगढे उत्तराखण्डे देहल्यां पञ्जाबप्रान्ते च अपि एतत् दलम् पर्याप्तशक्तिसम्पन्नम् अस्ति । पृथक् पृथक् दलेभ्यः विभिन्नेषु अवसरेषु अनेन दलेन उत्तरप्रदेशे वारत्रयं सर्वकारस्य सञ्चालनं रचनं च कृतम्। अनेन दलेन 2004 तमवर्षे जाते लोकसभा-निर्वाचने प्रायः पञ्चप्रतिशतं मतानि तथा च नवदश-स्थानानि प्राप्तानि।

भारतीय-कम्युनिस्ट-दलम् – मार्क्सवादि (सीपीआई-एम) – 1964 तमे वर्षे स्थापितम् एतत् दलम् अस्ति, एतस्य दलस्य आस्था मार्क्सवादे (लेनिनवादे) च अस्ति। समाजवादस्य धर्मनिरपेक्षतायाः लोकतन्त्रस्य च समर्थकं तथा च साम्राज्य-वादस्य साम्प्रदायिकतायाः च विरोधि

दलम् अस्ति। इदं दलं भारते सामाजिक-आर्थिक-न्यायस्य लक्ष्यसाधने लोकतान्त्रिक-निर्वाचनानि सहायकानि उपयोगीनि च सन्ति इति मन्यते। पश्चिमबङ्गाले केरले त्रिपुरायां च एतस्य दलस्य कश्चित् दृढाधारः अस्ति। निर्धनानां शिल्पशील-श्रमिकाणां कृषक-श्रमिकाणां बुद्धिजीविनां च मध्ये एतस्य दलस्य नितरां लोकप्रियता अस्ति। इदं दलं देशे पुञ्ज्याः वस्तूनां च मुक्ततया गमनागमनं भवेत् इति अनुमतिं ददाति तथा च नवीनानाम् आर्थिक-नीतीनाम् आलोचनं करोति। पश्चिमबङ्गाले नैरन्तर्येण त्रिंशत् वर्षेभ्यः एतस्य दलस्य शासनम् अस्ति। 2004 तमवर्षे जायमाने निर्वाचने अनेन दलेन प्रायः षट् प्रतिशतं मतानि तथा च लोकसभायाः 43 स्थानानि प्राप्तानि। इदं दलम् अधुना केन्द्रस्य संप्रग-सर्वकारस्य बहिर्भागात् समर्थनं करोति तथा च अस्मिन् सर्वकारे सम्मिलितं नास्ति।

भारतीय-कम्युनिस्ट-दलम् (सीपीआई) – 1925 तमे वर्षे प्रतिष्ठापितम्। मार्क्सवादः – लेनिनवादः, धर्मनिरपेक्षतायां लोकतन्त्रे च आस्था। अलगाव-वादिनां साम्प्रदायिक-दलानां च विरोधि। इदं दलं संसदीय-लोकतन्त्रं श्रमिकवर्गस्य कृषकाणां निर्धनानां च हितानि अग्रे भवेयुः इत्येतदर्थं लोकतन्त्रम् उपकरणरूपम् अस्ति इति मन्यते। 1964 तमे वर्षे माकपादलम् एतस्मात् दलात् पार्थक्यम् अकरोत् ततः परम् एतस्य दलस्य जनाधारः नैरन्तर्येण सङ्कुचितः जातः परन्तु केरले पश्चिमबङ्गाले पञ्जाबे आन्ध्रप्रदेशे तमिलनाडुराज्ये च अधुना अपि समीचीना स्थितिः अस्ति। वस्तुतः, एतस्य समर्थनं शनैः शनैः न्यूनं जातम्। 2004 तमे निर्वाचने अनेन दलेन 1.4 प्रतिशतं मतानि लोकसभायाः च 10 स्थानानि प्राप्तानि। दृढस्य वाममोर्चा इत्यस्य निर्माणाय सर्वाणि वामदलानि सङ्घीभवन्तु इत्यस्य विषयस्य पक्षे इदं दलम् आसीत्। एतद् दलम् अधुना केन्द्रस्य संप्रग-सर्वकारस्य बाह्यतः समर्थनं करोति।

राष्ट्रवादि-काङ्ग्रेस-दलम् – काङ्ग्रेसदले विभाजनात् परं 1999 तमे वर्षे इदं दलं जातम्। एतस्य दलस्य लोकतन्त्रे गान्धिवादि-धर्मनिरपेक्षतायां समतायां सामाजिकन्याये संङ्घवादे च आस्था अस्ति। इदं दलं सर्वकारस्य प्रमुखपदानि केवलं भारतीय-नागराणां कृते एव आरक्षितानि स्युः इति इच्छति महाराष्ट्रेषु प्रमुखशक्तिरूपेण वर्तते तेन सह एव मेघालये मणिपुरे असमे च अपि शक्तिसम्पन्नम् अस्ति। एतस्य दलस्य काङ्ग्रेसेन सह महाराष्ट्रसर्वकारे सहभागिता अस्ति। 2004 तमवर्षारभ्य संयुक्तप्रगतिशीलघटबन्धने सहभागिदलम् अस्ति।

प्रान्तीयदलानि

एतानि षड् दलानि अतिरिच्य अन्यानि अवशिष्टदलानि निर्वाचन-आयोगेन प्रान्तीयदलानि इति मतानि सन्ति। सामान्यतः एतानि क्षेत्रीयदलानि इति उच्यन्ते परन्तु इदम् आवश्यकं नास्ति यत् निजविचारधारायां दृष्टौ च एतानि दलानि क्षेत्रीयदलानि एव स्युः इति। एतेषु कानिचन दलानि अखिलभारतीय-दलानि अपि सन्ति परन्तु केषुचित् प्रान्तेषु एव एतानि दलानि साफल्यम् अवाप्नवन्ति सन्ति। समाजवादि-दलस्य समतादलस्य राष्ट्रियजनता-दलस्य च राष्ट्रियस्तरीय-सङ्घटनम् अस्ति तथा च नैकेषु राज्येषु एतेषां दलानां घटकाः सन्ति। बीजूजनतादल-सिक्किमलोकतान्त्रिकमोर्चा-मिजोनेशनलफ्रेण्टप्रभृतिदलानि निजक्षेत्रीयम् अभिज्ञानम् अधिकृत्य सावधानानि सन्ति। गतेषु त्रिषु दशकेषु प्रान्तीयदलानां सङ्ख्यायाः शक्तेः च पर्याप्तरूपेण वर्धनं जातम् अस्ति। एतस्मात् भारतीयसंसद् विविधताभिः इतोऽपि सम्पन्नतां प्राप्नोत्। कस्यचित् एकस्य राष्ट्रियदलस्य लोकसभायां बहुमतं नास्ति। परिणामतः राष्ट्रियदलं प्रान्तीयदलैः सह घटबन्धनाय बाध्यं जातम्। 1996 तमवर्षात् परं प्रायः प्रत्येकं प्रान्तीयदलं एकस्य अन्यराष्ट्रिय-स्तरीय-घटबन्धन-सर्वकारस्य भागरूपेण भवितुम् अवसरं प्राप्नोत्। एतस्मात् अस्माकं देशे संघवादः लोकतन्त्रं च दृढं जातम्, (एतेषां दलानां विवरणाय अग्रिमपृष्ठे स्थितं मानचित्रं पश्यन्तु)।


भारते क्षेत्रीयदलानि
(06 जनवरी 2007 तमवर्षस्य स्थितिः)
जम्मूकाश्मीरः नेशनल् काम्फ्रेन्स (1939)
जम्मूकाश्मीरः नेशनल-पैन्थर्सदलम्
जम्मूकाश्मीरः जनलोकदलम् (1999)
राष्ट्रियलोकदलम् (1998)
समाजवादिदलम् (1992)
(मध्यप्रदेशे उत्तराखण्डे अपि)
जनतादलम् (यू) (1999)
(झारखण्डः, नगालैण्डे अपि)
लोकजनशक्तिदलम् (2000)
राष्ट्रियजनतादलम् (1998)
झारखण्डे अपि
असमः यूनायटेडः
लोकतान्त्रिकफ्रण्टः (2006)
असमः गणः परिषद् (1985)
अरुणाचलकाङ्ग्रेसः
(1996)
नगालैण्ड-
जनलोकफ्रण्टः
(2002)
सिक्किम-
लोकतान्त्रिकफ्रण्टः
(1993)
उत्तराखण्ड-क्रान्ति-दलम् (1979)
शिरोमणि-अकालि-
दलम् (1920)
भारतीयराष्ट्रियलोकदलम्
(1977)
जम्मूकाश्मीरः
पञ्जाबः
उत्तराखण्डः
हरियाणा
उत्तरप्रदेशः
सिक्किमः
अरुणाचलप्रदेशः
असमः
मेघालयः
नगालैण्डः
मणिपुरम्
त्रिपुरा
मिजोरमः
बिहारः
झारखण्ड-मुक्ति-मोर्चा
(1973)
(उडीसायाम् अपि)
झारखण्डः
पश्चिमबङ्गालः
मणिपुर-
लोकतान्त्रिकदलम्
(1968)
बीजूजनतादलम् (1977)
उडीसा
शिवसेना (1966)
महाराष्ट्रम्
मिजोरम-लोकतान्त्रिक-
काम्फ्रेन्सः (1972)
मिजोरम-राष्ट्रियदलम्
(1979)
मिजोरमराष्ट्रिय-फ्रण्ट्
(1961)
यूनायटड-गोअंस-
लोकतान्त्रिक-दलम् (1963)
महाराष्ट्रवादि-गोमान्तक-
दलम् (1961)
गोवा
आन्ध्रप्रदेशः
फारवर्ड-ब्लाक् (1940)
रिवोल्यूशनरी-सामाजिक-
दलम् (1940)
तृणमूलकाङ्ग्रेसः :
(मेघालये अपि) (1997)
इण्डीजिनस-राष्ट्रियदलम्
ऑव त्रिपुरा (2001)
जनतादलम् (सेक्यूलर्)
(केरले अपि)(1999)
कर्णाटकः
तमिलनाडुः
पाण्डिचेरी
केरलः
मेघालय-लोकतान्त्रिकदलम्
यूनायटड-लोकतान्त्रिकदलम्
पाण्डिचेरी
मुनेत्रः
काङ्ग्रेसः
(1990)
तेलुगुदेशमदलम् (1982)
तेलङ्गानाराष्ट्रसमितिः
(2001)
भारतीय-फेडरल-लोकतान्त्रिक-दलम्
केरल-काङ्ग्रेसः (मणि.) (1964)
मुस्लिमलीगः (1948)
ऑल-इण्डिया-अन्ना-डीएमके (1972)
द्रविडमुनेत्रकडगमः (पाण्डिचेर्याम् अपि)
(1949)
पट्टालिः मक्कलः कच्ची
(पाण्डिचेर्याम् अपि) (1990)
मारुमालारची द्रविडमुनेत्र-कडगमः
(1993)

राजनैतिक-दलानां पुरतः आह्वानानि

अस्माभिः दृष्टं यत् लोकतन्त्रस्य कार्याय राजनैतिक-दलानि कियन्ति महत्त्वपूर्णानि सन्ति। यतो हि दलानि एव लोकतन्त्रस्य सर्वाधिकं प्रकटरूपाणि सन्ति, अतः इदं स्वाभाविकम् अस्ति यत् लोकतन्त्रस्य कार्यप्रक्रियायाः न्यूनतानां कृते राजनैतिक-दलानि एव दोषीणि इति जनाः वदन्ति । आविश्वं जनाः एतस्मात् तथ्यात् रुष्टाः भवन्ति यत् राजनैतिक-दलानि निजकार्यं समीचीनतया न कुर्वन्ति । अस्माकं लोकतन्त्रस्य विषये अपि जनानां धारणा एवमेव अस्ति । सामान्य-जनतायाः रोषः तथा च आलोचनं राजनैतिक-दलानां कार्याय पक्षचतुष्टये एव केन्द्रितम् अस्ति । लोकतन्त्रस्य प्रभावि-उपकरणरूपेण राजनैतिकदलानि स्युः इत्येतदर्थं दलैः आह्वानानां सम्मुखीकरणम् अपि करणीयम् अपि च एतेषां जयः अपि प्राप्तव्यः ।

प्रथमम् आह्वानम् अस्ति दलाभ्यन्तरे आन्तरिकलोकतन्त्रस्य अभावः । सम्पूर्णविश्वे जनानाम् इयं प्रवृत्तिः जाता यत् सम्पूर्णशक्तिः एकस्य अथवा केषाञ्चित् जनानां पार्श्वे एव सङ्कुचिता अस्ति । दलस्य पार्श्वे न तु सदस्यानां मुक्तसूची अस्ति न नियमित-साङ्घटनिक-उपवेशनानि भवन्ति । आन्तरिकनिर्वाचनम् अपि दलेषु न भवन्ति । कार्यकर्तृभिः सह सूचनानाम् आदानं प्रदानम् अपि दलानि न कुर्वन्ति । सामान्य-कार्यकर्ता तु अनभिज्ञः एवतिष्ठति यत् दलस्य प्रमुखनेतृषु किं प्रचलति। कार्यकर्तृणां पार्श्वे न तु नेतृभिः सह सम्बद्धैः भूत्वा निर्णयान् निरस्तीकर्तुं प्रभावयितुं च सामर्थ्यं न भवति न च एव काचित् शक्तिः भवति न च किञ्चित् माध्यमम् एव। परिणामतः दलनाम्ना सम्पूर्ण-निर्णय-स्वीकरणस्य अधिकारः तस्य दलस्य प्रमुखनेतृणां भवति यतो हि केषाञ्चित् नेतृणां पार्श्वे एव वास्तविकं सामर्थ्यं भवति अतः ये तैः सह एकमताः न भवन्ति तेषां दले स्थिरत्वं कठिनं भवति ।

बर्लुस्कोन्याः काष्ठपुत्तलिकाः

रिबर-हैसन-स्वेंस्का डेक्वलैड, केगल कार्टून्स,

बर्लुस्कोनी इटल्याः प्रधानमन्त्री आसीत्। सः इटल्याः महत्सु व्यवसायिषु कश्चन आसीत् । सः 1993तमे वर्षे सङ्घटितस्य फोर्जा-इतालियायाः नेता अस्ति । तस्य समवायः नैकदूरदर्शनप्राणालिकानां अतिमहत्त्वपूर्णानां प्रकाशनालयानां कस्यचित् पादकन्दुक-क्लबस्य वित्तकोशस्य च स्वामी अस्ति । इदं व्यङ्ग्यचित्रं विगत-निर्वाचन-कालिकम् अस्ति ।

राजनैतिक-दलस्य प्रमुखाः नेतारः महिलाभ्यः किमर्थं पर्याप्तं प्रत्याशित्वं न यच्छन्ति ? किम् एतस्य कारणम् आन्तरिकस्य लोकतन्त्रस्य न्यूनता अस्ति ?

दलीय-सिद्धान्तेषु नीतिषु च निष्ठायाः स्थाने नेतारः एव निष्ठापात्र-रूपेण जायन्ते।

द्वितीयम् आह्वानं प्रथमाह्वानेन सम्बद्धम् अस्ति – इदं वंशवाद इति अस्ति। यतो हि अधिकतराणि दलानि निजकार्यं पारदर्शिभावेन न कुर्वन्ति अतः सामान्यः कार्यकर्ता अपि नेतृरूपेण भवेत् इति विषयस्य सम्भावना अतीव न्यूना जायते। ये जनाः नेतारः भवन्ति ते अनुचितं लाभं प्राप्नुवन्निजान्घनिष्ठजनान्सम्बन्धिनःचउच्चपदे नियोजयन्ति। नैकदलेषु शीर्षपदे सदैव एकस्य एव कुटुम्बस्य जनाः भवन्ति। एवं दलस्य अन्यसदस्यैः सह अन्यायः अस्ति। इयं प्रवृत्तिः लोकतन्त्राय अपि उचिता नास्ति यतो हि एतस्मात् अनुभवहीनाः जनाधारेण रहिताः जनाः शक्तिशालिषु पदेषु नियुक्ताः जायन्ते। इयं प्रवृत्तिः केषुचित् प्राचीन-लोकतान्त्रिकदेशेषु प्रायः सम्पूर्णे विश्वे च एव दृश्यते।

तृतीयम् आह्वानं दलेषु, (विशेषतया निर्वाचनकाले) धनबलेन बाहुबलेन च आपराधिक-जनाः प्रविशन्ति इतिरूपेण अस्ति। यतो हि दलानां सर्वथा चिन्ताविषयः भवति यत् कथञ्चित् निर्वाचने विजयस्य प्राप्तिः स्यात् इति अतः एतदर्थं कश्चित् अपि वैधानिकम् अवैधानिकं वा उपायम् अपि दलानि कुर्वन्ति। दलानि एतादृशम् एव जनं प्रत्याशिरूपेण चिन्वन्ति यस्य पार्श्वे विपुलं धनं स्यात् यः प्रत्याशी अधिकं धनं व्ययीकर्तुं शक्नुयात्। ये समवायाः धनाढ्याः जनाः च राजनैतिक-दलाय धनं यच्छन्ति तादृशाः जनाः अथवा समवायाः अपि दलस्य निर्णयान् प्रभावयन्ति। यः अपराधिप्रत्याशी जयं प्राप्तुं शक्नोति बहुधा दलानि तस्य अपि निर्वाचनीय-प्रत्याशिनः रूपेण चयनं कुर्वन्ति अथवा तस्मात् साहाय्यं स्वीकुर्वन्ति। आविश्वं लोकतन्त्रस्य समर्थकाः जनाः, लोकतान्त्रिक-राजनीतौ धनाढ्यानां महा-समवायानां च वर्धमानायाः भूमिकायाः विषये चिन्तिताः सन्ति।

चतुर्थम् आह्वानम् अस्ति यत् दलानाम् आभ्यन्तरे विकल्प-हीनतायाः स्थितिः अस्ति। सार्थक-विकल्पस्य अभिप्रायः अस्ति यत् विभिन्नदलानां नीतिषु कार्यक्रमेषु च महत्त्वपूर्णम् अन्तरं स्यात्। सद्यः गतेषु वर्षेषु दलानाम् आभ्यन्तरे वैचारिकम् अन्तरं न्यूनं भवति तथा च इयं प्रवृत्तिः आविश्वं दृश्यते। यथा, ब्रिटेनस्य लेबरपार्टी तथा च कञ्जरवेटिवपार्टि इत्यनयोः मध्ये अधुना न्यूनम् अन्तरं जातम्। ये जनाः एतस्मात् पृथक् नीतीः इच्छन्ति तेषां कृते कश्चित् अपि विकल्पः उपलब्धः नास्ति। अनेकधा जनानां पार्श्वे सर्वथा नवीननेतुः चयनस्य विकल्पः अपि न भवति यतो हि तत्रैव अल्पनेतारः प्रत्येकस्मिन् दले आवागमनं कुर्वन्ति।



मंजुल - डीएनए

भवन्तः तु पूर्वतः एव धनाढ्याः सन्ति पुनः किमर्थं निर्वाचने भागं ग्रहीतुम् इच्छन्ति ?

किम् एतस्य अभिप्रायः अयम् एव अस्ति यत् लोकतन्त्रे जनाः केवलं धनार्जनाय निर्वाचने भागं गृह्णन्ति ? परन्तु किम् एतत् समुचितं नास्ति यत् नैके राजनेतारः जनतायाः कल्याणाय प्रतिबद्धाः सन्ति ?

किं भवन्तः एतस्मिन् भागे प्रदत्तव्यङ्ग्यचित्रेषु दर्शितानि आह्वानानि अभिज्ञातुं शक्नुवन्ति ? राजनीतौ धनस्य तथा बलस्य दुरुपयोगं रोद्धुं के उपायाः सन्ति ?

दलानां संशोधनं कथं कर्तुं शक्यते ?

एतेषाम् आह्वानानां सम्मुखीकरणाय आवश्यकम् अस्ति यत् राजनैतिक-दलानां संशोधनं स्यात् । एतस्याम् अवस्थायां प्रश्नः अयम् उदेति यत् किं राजनैतिकदलानि परिष्काराय सज्जितानि सन्ति ? यदि तानि सज्जितानि न सन्ति तर्हि तानि संशोधनार्थं बाध्यानि कर्तुं शक्यन्ते ? आविश्वं नागराः एतान् प्रश्नान् अभिलक्ष्य दुःखिनः सन्ति । एते एतादृशाः प्रश्नाः सन्ति येषाम् उत्तरं सरलं नास्ति । लोकतान्त्रिक-व्यवस्थायाम् अन्तिमनिर्णयं राजनेतारः एव कुर्वन्ति ये विभिन्नानां राजनैतिक-दलानां प्रतिनिधित्वं कुर्वन्ति । जनाः तेषां परिवर्तनं कर्तुं शक्नुवन्ति तेषां स्थाने पुनः नवीनानां नेतॄणां चयनं कुर्वन्ति । यदि ते सर्वे आत्मनः संशोधनं न कर्तुम् इच्छन्ति तर्हि कश्चित् अपि तान् संशोधयितुं कथं बाध्यान् कर्तुं शक्नोति ?

आयान्तु, भारतदेशे राजनैतिकदलानां तेषां च नेतॄणां संशोधनाय सद्यः प्रयासाः कृताः सन्ति अथवा ये परामर्शाः दत्ताः सन्ति तेषां विषये अवधानं कुर्याम ।

- विधायकाः सांसदाः च दलस्य परिवर्तनं कुर्वन्ति एकस्मात् दलात् अन्यदलं प्रति गच्छन्ति तेषाम् एतां प्रवृत्तिं रोद्धुं संविधाने संशोधनं कृतम् अस्ति । निर्वाचिताः प्रतिनिधयः मन्त्रिपदप्राप्तेः धनलोभेन च नैके राजनेतारः दलानि व्यापकतया परिवर्तितवन्तः इत्येतं विषयं मनसि निधाय संविधानस्य संशोधनं कृतम् । नवीनस्य अधिनियमस्य अनुसारं यदि कश्चित् सांसदः अथवा विधायकः दलस्य परिवर्तनं करोति तर्हि सः निजस्थानतः अपि च्युतः भविष्यति । अनेन नवीनेन अधिनियमेन दलपरिवर्तन-विषये न्यूनता जाता परन्तु अस्मात् कश्चित् अपि नेता दले विरोध-भावनस्य प्रकटनं न कर्तुं शक्नोति । एतादृशं कार्यं कठिनं जातम् ।

कथनं रहस्योद्घाटनम्

दलपरिवर्तनम् – विधायिकायाः कृते कस्माच्चित् दलविशेषात् निर्वाचित-प्रतिनिधेः तत् दलं परित्यज्य किञ्चित् अन्यत् दलं प्रति गमनम् ।

चित्रम् ३ – निर्वाचनीय-अनुशासनस्य विषयः अस्माकं मनसि न आयास्यति।
किं भवन्तः एवं राजनैतिकदलानि परिष्कर्तुं सम्मतिं यच्छन्ति ?

निर्वाचनीयस्य अनुशासनस्य विषयः अस्माकं बुद्धौ न प्रवेष्टुं शक्नोति ?

किं भवन्तः एवंप्रकारेण राजनैतिकदलानां संशोधनस्य समर्थनं कुर्वन्ति ?

दलस्य शीर्षस्थनेतृत्वेन यः निर्णयः क्रियते, सांसदेन विधायकेन च सः मन्तव्यः भवति।

- उच्चतम-न्यायालयेन धनस्य अपराधिनां च प्रभावं न्यूनीकर्तुं कश्चित् आदेशः प्रदत्तः अस्ति। एतस्य आदेशस्य अनुसारं यः प्रत्याशी निर्वाचने भागं ग्रहीतुम् इच्छति तेन निजसम्पत्तेः आपराधिक-विषयाणां च विवरणं कस्यचित् शपथपत्रस्य माध्यमेन दातव्यम् इति अनिवार्यम् अस्ति। एतया नवीन-व्यवस्थया जनाः निजप्रत्याशिनां विषये नैकाः सूचनाः प्राप्नुवन्ति, परन्तु प्रदत्तसूचनाः यथार्थाः सन्ति अथवा अयथार्थाः इति निरीक्षितुं कापि व्यवस्था अधुना यावत् नास्ति। अधुना यावत् वयम् एतत् तथ्यं सविश्वासं न प्रतिपादयितुं शक्नुमः यत् एतस्याः व्यवस्थायाः जातायां सत्यां राजनीति-सन्दर्भे धनाढ्यानाम् अपराधिनां च प्रभावः न्यूनः जातः अथवा न जातः इति।
- निर्वाचनायोगः कस्यचित् एकस्य आदेशस्य माध्यमेन सर्वेषां दलानां कृते साङ्घटनिक-निर्वाचनं तथा च आयकरस्य रिटर्न इति पूरणम् आवश्यकं कृतम् अस्ति। दलैः एतस्याः प्रक्रियायाः आरम्भः अपि कृतः अस्ति, परन्तु अनेकधा केवलम् औपचारिकतायै एवं भवति। अधुना एतत् न वक्तुं शक्यते यत् एतस्मात् राजनैतिकदलेषु आन्तरिकं लोकतन्त्रं दृढतां प्राप्नोत् इति। एतत् अतिरिच्य राजनैतिक-दलानां संशोधनाय प्रायः एतादृशाः नैके उपायाः परामृश्यन्ते।
- राजनैतिक-दलानाम् आन्तरिक-कार्यप्रणालीं सुव्यवस्थितां कर्तुम् अधिनियमः प्रकल्पनीयः। सर्वाणि दलानि निज-सदस्यानां सूचीं कृत्वा तेषां समीपे स्थापयेयुः, निज-संविधानस्य पालनं कुर्युः, दले विवादस्य स्थितौ कस्यचित् स्वतन्त्रस्य प्राधिकारिणः नियुक्तिं पञ्चरूपेण कुर्युः तथा च विशालतमपदेभ्यः मुक्तं निर्वाचनं कारयेयुः – इयं व्यवस्था अनिवार्या करणीया।
- राजनैतिक-दलानि महिलाभ्यः कस्मिंश्चित् विशिष्टे अनुपाते प्रायः तृतीयांशत्वेन प्रत्याशिरूपेण घोषयेयुः। अनेन एव प्रकारेण दलस्य प्रमुखपदेषु अपि महिलाभ्यः आरक्षणं स्यात्।
- निर्वाचनस्य व्ययं सर्वकारः वहेत्। सर्वकारः दलेभ्यः निर्वाचने स्पर्धितुं धनं यच्छेत्। इदं साहाय्यं इन्धनस्य तद्यथा शिलातैलस्य कार्यालयीय-कार्यार्थं कर्गदस्य चलभाष-व्ययादिकस्य च रूपेण अपि भवितुं शक्नोति अथवा पुनः विगते निर्वाचने प्राप्तमतानां अनुपाते प्रत्यक्षं धनं दातुं शक्यते।

राजनैतिक-दलैः अधुना यावत् एतादृशाः उपर्युक्ताः परामर्शाः न समर्थिताः। यदि एते परामर्शाः स्वीकृताः स्युः तर्हि संशोधनं किञ्चित् शक्यते। परन्तु प्रत्येकं राजनैतिक-समस्यायै केवलम् अधिनियमानुसारं समाधानं स्यात् इति विषये अस्माभिः सावधानं भवितव्यम्। व्यर्थम् एव अधिनियमैः राजनैतिक-दलानां निग्रहणं हानिप्रदम् अपि भवितुं शक्नोति। अनेन सर्वाणि दलानि अधिनियमस्य व्यवस्थाम् अपाकर्तुम् उपायानाम् अन्वेषणं करिष्यन्ति। एतत् अतिरिच्य राजनैतिक-दलानि स्वयम् अपि एतादृशस्य विधेः अभ्युपगमने एकमतानि न भविष्यन्ति यं तानि न इच्छन्ति।

द्वौ अन्यौ अपि उपायौ स्तः ययोः माध्यमेन राजनैतिक-दलानां संशोधनं कर्तुं शक्यते। प्रथमः उपायः अस्ति - जनाः राजनैतिक-दलानि बाध्यानि कुर्युः। इदं कार्यं पत्रलेखनस्य

कथनं रहस्योद्घाटनम्

शपथपत्रम् - कस्मैचित् अधिकारिणे समर्पितः अभिलेखः। एतस्मिन् कश्चित् जनः आत्मविषये वैयक्तिकसूचनाः ददाति तथा च ताः सूचिताः प्रमाणिताः इति शपथं स्वीकरोति। एतस्मिन् सूचनादातुः हस्ताक्षराणि भवन्ति।

प्रचारस्य जन-आन्दोलनानां च माध्यमेन कर्तुं शक्यते । सामान्य-नागराणां जन-आन्दोलनानां सञ्चार-तन्त्राणां च माध्यमेन इदं कार्यं कर्तुं शक्यते । यदि दलानि अनुभवेयुः यत् संशोधने अकृते सति तेषां जनाधारः पतिष्यति अथवा तेषां छविः विकृतिं गमिष्यति तदा ते गभीरतया आत्मनः परिष्कारं करिष्यन्ति । परिष्कारस्य संशोधनस्य च अन्यः उपायः अस्ति ये जनाः संशोधनम् इच्छन्ति ते स्वयं राजनैतिकदलानि प्रति प्रविशेयुः इति । लोकतन्त्रस्य गुणवत्ता लोकतन्त्रे जनानां सहभागितया निश्चिता भवति । यदि सामान्य-नागराः स्वयं राजनीतौ भागं न गृह्णीयुः अपि च बाह्यभागे स्थित्वा एव चर्चामात्रं कुर्युः तर्हि तेन संशोधनं न भविष्यति । विकृत-राजनीतेः समाधानम् अस्ति आधिकाधिका राजनीतिः श्रेष्ठा राजनीतिः च । वयम् एतस्मिन् सन्दर्भे पुनः चर्चाम् अन्तिमाध्याये करिष्यामः ।

1. लोकतन्त्रे राजनैतिक-दलानां विभिन्नभूमिकानां विषये चर्चां कुर्वन्तु ।
2. राजनैतिकदलानां समक्षे कानि आह्वानानि सन्ति ?
3. राजनैतिक-दलानि निजदायित्वस्य निर्वहणं समीचीनप्रकारेण कुर्युः , एतदर्थं तानि सुदृढीकर्तुं काञ्चन परामर्शान् यच्छन्तु ।
4. राजनैतिकदलस्य कोऽर्थः भवति ?
5. कस्यचिद् अपि राजनैतिकदलस्य के गुणाः भवन्ति ?
6. निर्वाचन-प्रक्रियायां स्पर्धितुं सर्वकारस्य च घटनाय अथवा सत्तायाः प्राप्तये सङ्घीभूतजनसमूहः ---------- उच्यते ।
7. प्रथमसूच्याः (सङ्घटनं दलं) नामभिः द्वितीयसूच्याः (घटबन्धनं/मोर्चा) नामानि मेलयन्तु तथा च अधः प्रदत्तानां कूटनाम्नाम् आधारेण समुचितम् उत्तरं चिन्वन्तु -

	सूची I	**सूची II**
1.	काङ्ग्रेसदलम्	(क) राष्ट्रिय-जनतान्त्रिक-घटबन्धनम्
2.	भारतीयजनतादलम्	(ख) प्रान्तीयदलम्
3.	भारतीय-कम्युनिस्ट-पार्टी (मार्क्सवादी)	(ग) संयुक्त-प्रगतिशील-घटबन्धनम्
4.	तेलुगुदेशमपार्टी(दलम्)	(घ) वाममोर्चा

	1	2	3	4
(क)	ग	क	ख	घ
(ख)	ग	घ	क	ख
(ग)	ग	क	घ	ख
(घ)	घ	ग	क	ख

8. एतेषु कः बहुजनसमाजपार्टी इत्यस्य संस्थापकः अस्ति ?
   (क) कांशीरामः
   (ख) साहूमहाराजः

(ग) बी.आर.आम्बेडकरः

(घ) ज्योतिबा-फूले

9. भारतीय-जनता-पार्टी इत्यस्य मुख्य-प्रेरक-सिद्धान्तः कः अस्ति ?

(अ) बहुजनसमाजः

(आ) क्रान्तिकारि-लोकतन्त्रम्

(स) सांस्कृतिक-राष्ट्रवादः

(द) आधुनिकता

10. दलानां विषये निम्नलिखितेषु कथनेषु अवधानं कुर्वन्तु –

(अ) राजनैतिक-दलेषु जनानाम् आधिक्येन विश्वासः नास्ति।

(ब) दलेषु प्रायः वरिष्ठ-नेतॄणां भ्रष्टाचारस्य ध्वनिः श्रूयते।

(स) सर्वकारस्य सञ्चालनाय दलानां विद्यमानता आवश्यकी अस्ति नास्ति।

एतेषु कथनेषु किं समुचितं कथनम् अस्ति ?

(क) अ, ब, स (ख) अ, ब (ग) ब, स (घ) अ, स

11 . निम्नलिखितानि उद्धरणानि पठन्तु तथा च अधः प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु –

मोहम्मदयूनुसः बाङ्ग्लादेशस्य प्रसिद्धः अर्थशास्त्री अस्ति। सः निर्धनानाम् आर्थिकस्य सामाजिकस्य च विकासस्य बहून् प्रयासान् कृतवान् एतदर्थं सः नैकान् अन्ताराष्ट्रियपुरस्कारान् प्राप्नोत्। तेन स्थापिताय ग्रामीणवित्तकोशाय तस्मै च संयुक्तरूपेण 2006 तमे वर्षे नोबेल-शान्ति-पुरस्कारः प्रदत्तः। 2007 फरवरीमासे सः कस्यचित् राजनैतिकदलस्य रचनां कर्तुं, संसदीयनिर्वाचने च भागं ग्रहीतुं निर्णयम् अकरोत्। तस्य उद्देश्यः समुचितस्य नेतृत्वस्य विकासस्य, सुशासनस्य नवीन-बाङ्ग्लादेशस्य च निर्माणस्य अस्ति। मोहम्मदयूनुसः अनुभवति यत् पारम्परिक-दलेभ्यः पृथक् कस्यचित् नवीनस्य राजनैतिक-दलस्य माध्यमेन एव नवीना राजनैतिक-संस्कृतिः प्रभवितुं शक्नोति। तस्य दलं निम्नस्तरात् आरभ्य उच्चस्तरं यावत् लोकतान्त्रिकं भविष्यति।

नागर-शक्ति-नामकस्य एतस्य दलस्य घटनेन बाङ्ग्लादेशे राजनैतिक-विक्षोभः जातः। तस्य निर्णयः नैकेभ्यः जनेभ्यः अरोचत नैके च सन्तुष्टाः न आसन्। कश्चित् सर्वकारी अधिकारी शाहेदुल-इस्लामः अवदत्, अहम् अनुभवामि यत् अधुना बाङ्ग्लादेशे उचितस्य अनुचितस्य च मध्ये निर्वाचनं शक्तं जातम्। अधुना कस्यचित् सुसर्वकारस्य आशा कर्तुं शक्यते। अयं सर्वकारः न केवलं भ्रष्टाचारात् दूरं स्यात् अपि तु भ्रष्टाचारस्य कृष्णधनस्य समाप्तिं करिष्यति इत्यपि प्राथमिकता भविष्यति।

परन्तु दशकेभ्यः ये तत्र वरिष्ठाः राजनेतारः तेषां च दलानि सन्ति तादृशानि दलानि तेषां च नेतारः अधुना अपि संशययुक्ताः सन्ति। बाङ्ग्लादेशनेशनलिस्ट-दलस्य कस्यचित् वरिष्ठनेतुः कथनम् अस्ति – नोबेल-पुरस्कारे जिते सति का चर्चा भवितुं शक्यते परन्तु राजनीतिः सर्वथा पृथक् विषयः अस्ति। सर्वथा आह्वानपूर्णः प्रायः विवादास्पदं च इति। केषाञ्चित् अन्यजनानां स्वरः इतोऽपि कर्कशः आसीत्। सः किमर्थं राजनीतिं प्रविष्टवान् ? इत्येवंविधान् प्रश्नान् कर्तुम् आरब्धवन्तः। केनचित् राजनैतिक-प्रेक्षकेण कथितं देशात् बहिर्भागे याः शक्तयः सन्ति ताः तं बाध्यतावशात् राजनीतिं कर्तुं प्रेरयन्ति।

किं भवन्तः अनुभवन्ति यत् यूनुसः नवीनं राजनैतिकदलं विरच्य उचितकार्यम् अकरोत् ?

किं भवन्तः विभिन्नजनानां प्रस्तुतभाषणैः ऊहाभिः सह एकमताः सन्ति ? अनेन दलेन अन्यदलानाम् अपेक्षया पृथक् कार्यं कर्तुम् आत्मनः सङ्घटनं कथं करणीयम् ? यदि भवान् एतस्य राजनैतिक-दलस्य संस्थापकेषु कश्चित् स्यात् तर्हि एतस्मिन् पक्षे किं तर्कम् अदास्यत् ?

लोकतन्त्रस्य परिणामः

परिचयः

अधुना यदा वयं लोकतन्त्रस्य निजयात्रायाः अन्तिमसोपाने स्मः तदा विशिष्टानां विषयाणां चर्चां परित्यज्य केषाञ्चित् सामान्य-प्रश्नानां पृच्छायाः कालः समायातः अस्ति, यथा – लोकतन्त्रस्य किं कार्यम् अस्ति अथवा लोकतन्त्रेण वयं सामान्यतः केषां परिणामानां विषये आशां कुर्मः ? सहैव, अयं प्रश्नः अपि प्रष्टुं शक्यते यत् किं वास्तविकं जीवने लोकतन्त्रम् एताः आशाः पूरयति ? लोकतन्त्रस्य परिणामानां मूल्याङ्कनं कथं कुर्याम ? वयम् एतादृशैः तथ्यैः अध्यायस्य आरम्भं करिष्यामः । एतस्मिन् विषये विचारविषये केषां तथ्यानां स्पष्टीकरणात् परं वयम् एतस्मिन् तथ्ये अवधानं करिष्यामः यत् विभिन्नप्रकरणेषु लोकतन्त्रात् कीदृशाः परिणामाः वाञ्छिताः सन्ति तथा च वास्तविक-धरातले के परिणामाः जायन्ते । एतदर्थं वयं लोकतन्त्रस्य विभिन्नानां पक्षाणां प्रायः शासनस्य स्वरूपस्य, आर्थिक-कल्याणस्य समानतायाः सामाजिक-अन्तरस्य सङ्घर्षस्य अन्ते च स्वतन्त्रता-स्वाभिमान-प्रभृतिः विषयेषु अवधानं करिष्यामः । अनेन अन्वेषणेन वयं सकारात्मकान् परिणामान् प्राप्स्यामः परन्तु एतैः परिणामैः सह नैके प्रश्नाः शङ्काः च अपि संलग्नाः सन्ति । एते प्रश्नाः आशङ्काः च अस्मान् लोकतन्त्रस्य पुरतः उपस्थितानाम् आह्वानानां विषये विचारयितुं बलात् प्रेरयन्ति यासां विषये वयम् अग्रिमे अन्तिमे च अध्याये विचारयिष्यामः ।

लोकतन्त्रस्य परिणामानां मूल्याङ्कनं कथं कुर्याम ?

शिक्षिके ! किं वयं लिङ्गदोहस्य कक्ष्यायाम् अपि निष्कर्षं प्राप्तवन्तः वा ? मह्यं सा कक्ष्या तदर्थम् अरोचत यतः बालाः पूर्वमेव निष्कर्षविषये सूचिताः न आसन् ।

किं भवन्तः स्मरन्ति यत् मैडमलिंगदोह-वर्यायाः कक्षायां छात्राः लोकतन्त्रस्य विषये कीदृशीं चर्चां कृतवन्तः आसन् ? भवद्भिः एतादृशाः विषयाः नवमकक्षायाः पाठ्यपुस्तकस्य द्वितीये अध्याये पठितवन्तः आसन् । चर्चायाः निष्कर्षः अयम् आसीत् यत् लोकतन्त्रं शासनस्य अन्य-व्यवस्थाभ्यः श्रेष्ठम् अस्ति । राजतन्त्रम् अन्य-व्यवस्थाः च अधिक-दोषपूर्णाः सन्ति । लोकतन्त्रं श्रेष्ठम् अस्ति इति कथितम् आसीत् यतो हि इदम्

- नागरेषु समानतां वर्धयति –
- जनस्य गरिमाणं वर्धयति ,
- सङ्घर्षस्थितौ अपि व्यवस्थायाः उपायं निर्दिशति तथा च
- लोकतन्त्रे दोषाणां संशोधनस्य अपि अवसरः भवति ।

किम् एताः आशाः लोकतान्त्रिक-शासनस्य व्यवस्थाभिः पूर्तिं गच्छन्ति ? यदा भवन्तः स्वीयं परितः विद्यमानैः जनैः सह वार्तां करिष्यन्ति तदा अवगमिष्यन्ति यत् अधिकतराः जनाः अन्यस्याः कस्याः अपि वैकल्पिकशासनस्य व्यवस्थायाः तुलनायां लोकतन्त्रम् एव इच्छन्ति । परन्तु लोकतान्त्रिक-शासनस्य कार्यप्रणाल्या ये जनाः सन्तुष्टाः सन्ति तेषां सङ्ख्या एतावती अधिका न भवति । अतः, वयम् आशङ्किताः भवामः – सैद्धान्तिक-रूपेण तु लोकतन्त्रं समीचीनम् इति मन्यते परन्तु व्यवहारकाले एतत् तथा श्रेष्ठं न मन्यते । एतस्यां शङ्कायां लोकतन्त्रस्य परिणाम-विषये अधिक-गहनतया विचारः आवश्यकः भवति । किं वयं नैतिककारणैः एव लोकतन्त्रम् इच्छामः ? अथवा पुनः, लोकतन्त्रस्य समर्थने काश्चन युक्तयः अपि सन्ति ?

अद्य विश्वस्य शताधिकाः देशाः कथञ्चित् अपि लोकतान्त्रिक-व्यवस्था तत्र अस्ति इति प्रतिज्ञा-पूर्वकं प्रतिपादयन्ति । एतेषाम् औपचारिकं संविधानम् अस्ति, तत्र निर्वाचनानि भवन्ति तथा च राजनैतिक-दलानि अपि तत्र वर्तन्ते । सहैव, तादृशाः देशाः निज-नागरेभ्यः आधारभूतान् अधिकारान् दातुम् अपि प्रतिज्ञापूर्वकं कथयन्ति । लोकतन्त्रस्य इमानि तत्त्वानि तु प्रायः अधिकांश-देशेषु समानाः एव सन्ति परन्तु सामाजिक्याः सांस्कृतिक्याः आर्थिक्याः स्थितेः उपलब्धेः च कारणात् इमे देशाः परस्परं पर्याप्तभिन्नाः सन्ति । स्पष्टम् अस्ति यत् एतेषां सर्वेषां लोकतान्त्रिक-शासनव्यवस्थायाः परिणामेषु अपि प्रभावः जायते । तथा च एकस्मिन् स्थाने या उपलब्धिः वर्तते सा अपरस्मिन् स्थाने अपि तथैव स्यात् इदम् आवश्यकं नास्ति । परन्तु किं कश्चित् एतादृशः आधारभूतः वस्तुविशेषः अस्ति यस्य आशां वयं प्रत्येकं लोकतान्त्रिक-शासनस्य व्यवस्थायां करिष्यामः एव ?

अनेकधा वयं लोकतन्त्रम् एव प्रत्येकम् अपि समस्यायाः समाधानरूपेण अस्ति इति मन्यामहे तथा च तस्मात् प्रत्येकम् अपि वस्तुनः समाधानस्य च आशां कर्तुम् आरभामहे । लोकतन्त्रे अस्मदीया रुचिः स्नेहः च अस्ति इति कारणात् प्रायः वयं इदं कथयामः यत् लोकतन्त्रं सर्वासां सामाजिकीनां आर्थिकीनां राजनैतिकीनां च समास्यानां समाधानं कर्तुं शक्नोति तथा च यदा अस्माकम् आशानुरूपं न भवति तदा वयं लोकतन्त्रस्य अवधारणां दोषपूर्णां मन्तुम् आरभामहे । तदा वयं संदेहान्विताः भवामः यत् किं वयं वास्तविकतायां लोकतान्त्रिक-व्यवस्थायाम् एव जीवामः तिष्ठामः वा । लोकतन्त्रस्य परिणामानां विषये सावधानतया विचारयितुं प्रथमसोपानम् इदम् एव अस्ति यत् आदौ मन्यामहै यत् लोकतन्त्रं शासनस्य किञ्चित् स्वरूपम् एव अस्ति ।



आर. के लक्ष्मण-ड्रॉइंग अप द ईयर्स

लोकतन्त्रं केषाञ्चित् उद्देश्यानां प्राप्त्यर्थं स्थितीः तु कल्पयितुं शक्नोति परन्तु नागरैः एव तासां स्थितीनां लाभं स्वीकृत्य निजलक्ष्यानि प्राप्तव्यानि भवन्ति। एतावत् एव न, लोकतन्त्रस्य तैः नैकतथ्यैः सह सम्बन्धः नास्ति यानि वयं मूल्यवन्ति इति मन्यामहे । लोकतन्त्रम् अस्माकं सर्वासां सामाजिक-कुरीतीनां संशोधनाय इन्द्रजालरूपः दण्डः अपि नास्ति । तर्हि आयान्तु, वयं तेषाम् उपायानां निरीक्षणं कुर्याम येषाम् आशा प्रत्येकं लोकतान्त्रिक-व्यवस्थायाः कर्तुं शक्यते तथा च सहैव लोकतन्त्रस्य इतिहास-विषये अथवा कीर्तिमानस्थितेः विषये अपि दृष्टिपातं कुर्याम।

उत्तरदायि दायित्वयुक्तं वैधशासनं च

केचन एतादृशाः विषयाः सन्ति येषां पूर्तिः लोकतन्त्रेण अवश्यमेव करणीया । लोकतन्त्रे कश्चित् महान् चिन्ताविषयः अयं भवति यत् जनानां निजशासकं चेतुम् अधिकारः तथा च शासकानां नियन्त्रणं स्यात् इत्यपि भवेत् । कालः तादृशः स्यात् येन आवश्यकतानुसारं यथाशक्यं च जनाः निर्णय-प्रक्रियायां सहभागिनः स्युः इति सामर्थ्यम् अपि स्यात् यतः एतादृशः सर्वकारः सत्तायां स्यात् यः जनान् प्रति निजम् उत्तरदायित्वं समीचीनतया निर्वहेत् तथा च जनानां याः आवश्यकताः आशाः च स्युः तदनुसारम् आचरेत्।

एतस्य प्रश्नस्य सन्दर्भे गभीरचिन्तनात् प्राक् अस्माकं पुरतः कश्चित् लघुः प्रश्नः अयम् एव अस्ति – किं लोकतान्त्रिक-सर्वकारः कार्यकुशलः भवति ? किम् अयं प्रभावी भवति ? केषाञ्चित् जनानां मतम् अस्ति यत् लोकतन्त्रे न्यून-प्रभाविणः सर्वकाराः जायन्ते । निश्चितरूपेण इदं समुचितम् अस्ति यत् अलोकतान्त्रिक-सर्वकारैः विधायिकायाः सम्मुखीकरणं न करणीयं भवति। तैः बहुसङ्ख्यकस्य अल्पसङ्ख्यकस्य च दृष्टिकोणस्य अवधानं न करणीयं भवति। लोकतन्त्रे वार्त्तालापस्य मूल्यादिकस्य च आधारेण कार्यं सम्पाद्यते । किम् एतस्मात् लोकतान्त्रिकाः सर्वकाराः न्यून-प्रभावशालिनः भवन्ति ?

आयान्तु, अधुना निर्णयान् मूल्यस्य दृष्ट्या परिमापनस्य प्रयासं कुर्याम । एतादृशस्य सर्वकारस्य कल्पनां कुर्वन्तु यः तीव्रतया निर्णयान् स्वीकरोति । परन्तु अयं सर्वकारः एतादृशान् निर्णयान् अपि कर्तुं शक्नोति यान् जनाः न स्वीकुर्युः तथा च तदा एतादृशानां निर्णयानां कारणात् दुःखी अपि भवितुं शक्नोति । एतस्य अपेक्षया लोकतान्त्रिक-सर्वकारः सर्वाः प्रक्रियाः पूरयितुं अधिकं कालं नेतुं शक्नोति । परन्तु सर्वकारेण सम्पूर्णप्रक्रिया मता अस्ति अतः एतस्य विषयस्य

सर्वकारस्य दृष्टिः



माइक कीफे - केगल कार्टून्स

अधिका सम्भावना अस्ति यत् जनाः लोकतान्त्रिकप्रक्रियायाः अनुरूपान् निर्णयान् मंस्यन्ते तथा च ते निर्णयाः अधिक-प्रभाविनः भविष्यन्ति । अनेन प्रकारेण लोकतन्त्रे निर्णय-स्वीकरणे यः कालः अपेक्ष्यते सः व्यर्थः न भवति।

अधुना द्वितीये पक्षे दृष्टिपातं कुर्मः – लोकतन्त्रे एतस्य विषयस्य सुदृढा व्यवस्था भवति यत् निर्णयाः वैधानिकव्यवस्थायाः अनुसारं भविष्यन्ति तथा च कश्चित् नागरः इदम् अवगन्तुम् इच्छेत् यत् निर्णये नियमानां पालनम् अभवत् अथवा न अभवत् एतस्य अवगमनं कर्तुं शक्यते। तस्य अवगमनस्य एव अधिकारः नास्ति अपि तु तस्य पार्श्वे एतस्य साधनानि अपि उपलब्धानि सन्ति। इयं पारदर्शिता इति कथ्यते। इदं तथ्यं प्रायः अलोकतान्त्रिक-सर्वकारेषु न भवति अतः यदा वयं लोकतन्त्रस्य परिणामानां विषये अवधानं कुर्मः तदा इयम् आशा उचितः अस्ति यत् लोकतान्त्रिक-व्यवस्थायाम् एतादृशस्य सर्वकारस्य घटनं स्यात् यः अधिनियमं मंस्यते।

किं भवन्तः एतस्य तथ्यस्य कल्पनां कर्तुं शक्नुवन्ति यत् सर्वकारः भवतः विषये, भवतः कुटुम्बस्य च विषये किं किं जानन्ति, तथा च कथं जानाति (यथा अन्नप्राप्तिपत्रम् अथवा) ? , सर्वकारस्य विषये सूचनार्थं भवतां पार्श्वे कानि स्रोतांसि सन्ति ?

------ एतस्य अभिप्रायः अयम् अस्ति यत् लोकतान्त्रिकव्यवस्थायाः सर्वोच्चोपलब्धिः लोकतान्त्रिकव्यवस्था एव अस्ति, एतस्मात् मानसिक-व्यायामात् परं अस्माभिः अयम् एव परिणामः अनुभूतः अस्ति अथवा नैव ?

तथा च जनान् प्रति उत्तरदायी स्यात्। वयम् आशाम् अपि कर्तुं शक्नुमः यत् लोकतान्त्रिक-सर्वकारः नागरान् निर्णयप्रक्रियायां सहभागिनः कर्तुम् आत्मानं च तान् प्रति उत्तरदायिनं कर्तुं कार्यविधेः अपि विकासं करोति।

यदि भवन्तः एतेषां परिणामानाम् आधारेण लोकतान्त्रिक-व्यस्थायाः परिमापनम् इच्छन्ति तर्हि भवद्भिः एतासां संस्थानां व्यवहाराणां च विषये अवधानं करणीयं स्यात् – नियमितं निष्पक्षं च निर्वाचनं, प्रमुख-नीतिषु नवीनेषु अधिनियमेषु च मुक्तां सार्वजनिकीं चर्चां तथा च सर्वकारस्य तस्य च कार्यप्रणाल्याः विषये नागराः अपि सूचनाः प्राप्नुयुः इति अधिकारं प्रददाति। एतेषां परिणामानां विषये लोकतान्त्रिक-शासकानां कार्यविवरणं सम्मिश्रितम् अस्ति । नियमितानां निष्पक्ष-निर्वाचनानां च सञ्चालनाय मुक्त-सार्वजनिक-चर्चायाः च कृते उपयुक्त-स्थितीनां निर्माणस्य सन्दर्भे प्रकरणे च लोकतान्त्रिक-व्यवस्थाः आधिक्येन साफल्यं प्राप्नुवन् परन्तु एतादृशस्य निर्वाचनस्य सम्पादने यत्र सर्वे समानरूपेण अवसरं प्राप्नुयुः अथवा प्रत्येकं निर्णये सार्वजनिक-चर्चायाः सम्पादन-प्रकरणे लोकतान्त्रिक-सर्वकाराणां विहितकार्यविवरणं श्रेष्ठं नास्ति । नागरैः सह सूचनानां सहकरण-प्रकरणे अपि तेषां पूर्वव्यवहारः अनुचितः अस्ति। परन्तु एतेषां तुलनां वयं यदा अलोकतान्त्रिक-शासनैः सह कुर्मः तदा एतेषां क्षेत्राणाम् अपि प्रदर्शनं समीचीनम् एव आसीत्।

कस्मिंश्चित् व्यापक-धरातले लोकतान्त्रिक-सर्वकारेभ्यः एतादृशी आशा उचिता एव अस्ति यत् लोकतान्त्रिक-सर्वकाराः जनानाम् आवश्यकतानां याचनानां च विषये सावधानाः स्युः तथा च सम्पूर्णतया भ्रष्टाचारमुक्ताः भवेयुः इति । एतयोः चर्चित-विषययोः सन्दर्भे अपि लोकतान्त्रिकसर्वकारद्वारा कृतम् आचरणं प्रभावशालि न अस्ति। लोकतान्त्रिक-व्यवस्थया प्रायः जनाः निजाः आवश्यकताः सौविध्येन न पूरयितुं शक्नुवन्ति तथा च जनसङ्ख्यायाः कस्यचित् व्यापक-भागस्य याचनानाम् उपेक्षा भवति । सामान्यरूपेण भ्रष्टाचारस्य प्रकरणानि श्रूयन्ते तेन स्पष्टीभवति यत् लोकतान्त्रिकी व्यवस्था एतस्मात् दोषात् मुक्ता नास्ति। परन्तु अनेन सह एतस्मिन् विषये अपि अवधानं कुर्वन्तु यत् अलोकतान्त्रिक-सर्वकाराः न्यूनप्रमाणेन भ्रष्टाः सन्ति अथवा जनानाम् आवश्यकताः प्रति संवेदनशीलाः सन्ति – एतादृशस्य कथनस्य कश्चन अपि आधारः नास्ति।

वस्तुतः, तत्र एतस्मिन् प्रकरणे लोकतान्त्रिक-शासन-व्यवस्था निश्चितरूपेण अन्य-शासन-व्यवस्थाभ्यः श्रेष्ठा अस्ति - इयं वैधशासन-व्यवस्था अस्ति।

पाकिस्तानं परित्यज्य प्रत्येकं स्थाने राजतन्त्रात् उपरि लोकतन्त्रस्य वरीयता

एतेषु कस्मिंश्चित् एकस्मिन् सम्मतिः

	बाङ्ग्लादेशः	भारतम्	नेपालः	पाकिस्तानः	श्रीलङ्का
व्यवस्थितं लोकतन्त्रम्	69	70	62	37	71
यदाकदाचित् व्यवस्थितम् ऐकाधिपत्यम्	6	9	10	14	11
कश्चन अपि प्रभावः न भवति	25	21	28	49	18

निजदेशाय लोकतन्त्रस्य उपयुक्तायाः विषये अल्पतराः एव जनाः संदेहान्विताः सन्ति।

भवतः देशस्य कृते लोकतन्त्रं कियत् उपयुक्तम् अस्ति ?



लोकतन्त्रस्य कृते सम्पूर्णं समर्थनम्

जनताभिः चितानां शासकानां शासनेन सम्मतजनानां संख्या



स्रोतः – एसडीएसए-दलम् – स्टेट-आफ-डेमोक्रेसी इन साऊथ एशिया, दिल्ली, - आक्सफोर्ड यूनि.प्रेस,2007

इयं शिथिला शासन-व्यवस्था अस्ति , न्यूनकार्यकुशला भवितुं शक्नोति अत्र भ्रष्टाचरणं भवितुं शक्नोति, अनया व्यवस्थया जनानाम् आवश्यकतानां स्वल्पतया अवहेलनं भवितुं शक्नोति परन्तु लोकतान्त्रिकी शासनव्यवस्था जनानां स्वीया शासनव्यवस्था अस्ति । अतः एव सम्पूर्णविश्वे लोकतन्त्रस्य विचारं प्रति प्रचण्डसमर्थनस्य भावः अस्ति । सहैव प्रदत्तैः दक्षिण-एशियायाः प्रमाणैः स्पष्टीभवति यत् इदं समर्थनं लोकतान्त्रिक-शासनयुक्तेषु देशेषु तु अस्ति एव तेषु देशेषु अपि अस्ति यत्र लोकतान्त्रिक-सर्वकाराः न सन्ति, जनाः आत्मभिः चितानां प्रतिनिधीनां शासनम् इच्छन्ति । ते इदम् अपि मन्यन्ते यत् लोकतन्त्र-व्यवस्था तेषां देशाय उपयुक्ता अस्ति । आत्मनः कृते जन-समर्थनस्य प्राप्तये लोकतन्त्रस्य क्षमता अपि लोकतन्त्रस्य एकः एव परिणामः अस्ति तथा च एतस्य अवहेलनं न कर्तुं शक्यते ।

आर्थिक-संवृद्धिः विकासः च

यदि लोकतान्त्रिक-शासने श्रेष्ठसर्वकारस्य आशा क्रियते तर्हि तस्मात् विकासस्य आशाकरणं किम् उचितं नास्ति ?

यदि वयं 1950 तमवर्षात् 2000 तमवर्षाभ्यन्तरे सर्वेषां लोकतान्त्रिक-शासनानां राजतन्त्राणां कार्यस्य तुलनां कुर्मः तर्हि प्राप्स्यामः यत् आर्थिकवृद्धेः प्रकरणे राजतन्त्र-व्यवस्थानां गतकार्याचरणं किञ्चित् श्रेष्ठम् अस्ति ।

उच्चतर-आर्थिक-वृद्धेः प्राप्तये लोकतान्त्रिक-शासनस्य इयम् अक्षमता अस्माकं कृते चिन्तायाः कारणभूता अस्ति । परन्तु केवलम् एतस्मात् कारणात् लोकतन्त्रस्य निरस्तीकरणं न कर्तुं शक्यते । यथा भवद्भिः अर्थशास्त्रे पठितम् अस्ति – आर्थिकविकासः उदाहरणार्थं नैककारकाणां देशस्य जनसङ्ख्यायाः आकारस्य वैश्विकस्थितेः अन्यदेशेभ्यः सहयोगेन देशद्वारा निश्चित-आर्थिकीनां प्राथमिकतानां च आश्रितः भवति । राजतन्त्रं येषु देशेषु अस्ति तत्र देशाः न्यूनप्रमाणेन विकसिताः तादृशानां देशानां लोकतान्त्रिक-व्यवस्था-युक्तानां न्यूनविकसितदेशानां च मध्ये अन्तरं स्वल्पप्रमाणेन अस्ति । परन्तु वयम् आशां कर्तुं शक्नुमः यत् एतस्मिन् विषये लोकतान्त्रिक-व्यवस्था राजतन्त्र-व्यवस्था-कारणात् न पश्चवर्ति-स्थितिं गच्छेत् ।

राजतन्त्र-व्यवस्था-युक्तानां लोकतान्त्रिक-शासन-व्यवस्था-युक्तानां च देशानाम् आर्थिक-विकासस्य मात्रायाः अन्तरं कामम् अधिकं स्यात् परन्तु एतत् अतिरिच्य लोकतान्त्रिक-व्यवस्थायाः चयनम् एव श्रेष्ठम् अस्ति, यतो हि एतस्याः नैके सकारात्मकाः लाभाः सन्ति ।

एतस्मिन् तथा च एतस्मात् अग्रेषु त्रिषु पृष्ठेषु प्रदत्तव्यङ्ग्यचित्राणि धनाढ्यानां निर्धनानां च मध्ये अन्तरं दर्शयन्ति । किम् आर्थिकवृद्धेः लाभः सर्वेषां कृते समानरूपेण जातः अस्ति ? राष्ट्रस्य धने स्वीयां सहभागितां वर्धयितुं निर्धनाः कथं विरोधस्य ध्वनिं मुखरां कर्तुं शक्नुवन्ति ? विश्वस्य धने निजां सहभागितां वर्धनाय निर्धन-देशाः किं कुर्युः ?

आर्थिक-संवृद्धेः तथा च आयस्य विभाजनम्
2000 – 2006



आर.जे. मैटसन-केगल-कार्टून्स् ।

धनिकानां पार्श्वे सर्वाधिकं धनम्,

लोकतन्त्रस्य आर्थिकोपलब्धय:

लोकतन्त्रस्य पक्षे उपस्थाप्यमाना: तर्का: अतीव भावपूर्णा: भवन्ति। इत्थं स्यात् अपि यतो हि लोकतन्त्रस्य सम्बन्ध: अस्माकं गहनमूल्यै: सह अस्ति। एतेषां तर्काणां सन्दर्भे या: चर्चा: भवन्ति ता: साधारणरूपेण न समाधातुं शक्यन्ते । तथापि तथ्यानाम् अङ्कानाम् आधारेण लोकतन्त्रस्य विषये स्वल्पचर्चाया: सञ्चालने दोष: नास्ति । लोकतन्त्रस्य आर्थिकोपलब्धीनां विषये एतादृशी चर्चा कर्तुं शक्यते। नैकवर्षेभ्य: लोकतन्त्रस्य नैके अध्येतार: सावधानम् एतादृशानि प्रमाणानि एकत्रीकृतवन्त: यै: सूच्यते यत् लोकतन्त्रस्य आर्थिकविकासेन आर्थिकविषमताभि: सह कीदृश: सम्बन्ध: अस्ति । अत्र प्रदत्ततालिकासु मानचित्रेषु च एतादृशानि कानिचन प्रमाणानि अत्र प्रदत्तानि सन्ति –

जिम्मी-फर्गुलिए - कङ्गल-व्यङ्ग्यचित्रम्

- प्रथमतालिकया सूच्यते यत् आर्थिकविकासस्य सन्दर्भे राजतन्त्रशासनै: कृतम् आचरणं किञ्चित् श्रेष्ठम् अस्ति। परन्तु यदा वयं केवलं निर्धन-देशानां विवरणस्य एव तुलनां कुर्म: तदा भिन्नता प्राय: समाप्ता भवति।
- द्वितीयया तालिकया सूच्यते यत् लोकतान्त्रिक-शासनस्य आभ्यन्तरे अपि अत्यधिका आर्थिकी असमानता भवितुं शक्नोति। दक्षिण-अफ्रीका-ब्राजील-प्रभृतिषु देशेषु उच्चस्थानां विंशतिप्रतिशतं जनानाम् एव सम्पूर्णराष्ट्रियस्य आयस्य 60 प्रतिशतं भागे अधिकार: अस्ति अपरञ्च अधस्तनं विंशतिप्रतिशतं जनानां राष्ट्रियस्य आयस्य मात्रं प्रतिशतत्रयं भागे जीवनं यापयन्ति। डेनमार्क-हङ्गरीप्रभृति: देशा: एतस्मिन् विषये क्वचित् आधिक्येन श्रेष्ठा: सन्ति इति वक्ष्यन्ते।
- भवन्त: व्यङ्ग्यचित्रेण द्रष्टुं शक्नुवन्ति यत् निर्धन-वर्गीयाणां समक्षे सदैव अवसराणाम् असमानता विद्यमाना भवति।

यदि आयस्य समान-वितरणम् आर्थिकप्रगतिं चैव आधारं मत्वा एव लोकतान्त्रिक-व्यवस्थानाम् आर्थिककार्यप्रणाल्या: मूल्याङ्कनं करणीयं स्यात् चेत् भवतां निर्णय: किं भविष्यति ?

तालिका – 1

विभिन्नदेशेषु आर्थिकविकासस्य मूल्यपत्रम् (1950 - 2000)

शासनस्य प्रकार: देशा: च	विकास-मूल्यपत्रम्
सर्वाणि लोकतान्त्रिक-शासनानि	3.95
सर्वाणि राजतन्त्र-शासनानि	4.42
राजतन्त्र-शासनयुक्ता: निर्धनदेशा:	4.32
लोकतन्त्र-युक्ता: निर्धनदेशा:	4.28

स्रोत: – एडम-प्रेजवर्स्की, माइकेल ई अल्वरेज, जोस एंटोनियो केईबब तथा च फर्नांडो लिमोंगी, डेमोक्रेसी एंड डेवलपमेंट – पॉलिटिकल इंस्टीट्यूशन ऐंड वेल –बीइंग इन द वर्ल्ड, 1960-1990, कैंब्रिज, कैंब्रिज यूनि.प्रेस,2000 ।

तालिका – 11

चितेषु देशेषु आयस्य असमानता

देशानां नामानि	राष्ट्रिय-आये प्रतिशतं भाग:	
	उपरितनं 20 %	अधस्तनं 20 %
दक्षिण-अफ्रीका	64.8	2.9
ब्राजीलदेश:	63.0	2.6
रूस:	53.7	4.4
अमरीका	50.0	4.0
ब्रिटेन:	45.0	6.0
डेनमार्क:	34.5	9.6

असमानतायां निर्धनतायां च न्यूनता जाता

आर्थिकवृद्धेः विषयः तु निश्चयेन अस्ति एव परन्तु लोकतान्त्रिक-व्यवस्थाभ्यः इयम् अपेक्षा क्वचित् अधिका तर्कसङ्गता अस्ति यत् ताः आर्थिकीम् असमानतां दूरीकरिष्यन्ति इति। यदा देशे तीव्रः आर्थिकविकासः स्यात् तदा अपि किम् आयस्य वितरणम् इत्थं भवितुं शक्नोति यत् सर्वे समानलाभं प्राप्नुयुः इति तथा च सर्वे जनाः श्रेष्ठं जीवन-यापनं कर्तुं शक्नुयुः ? किं लोकतान्त्रिक-व्यवस्थायाम् आर्थिकवृद्धेः जनानां च मध्ये आर्थिक-असमानतायाः वर्धनं सह एव भवति ? किं लोकतन्त्र-शासने जाते सति अवसराणां वस्तूनां च न्यायपूर्णं वितरणं भवितुं शक्नोति ?

निर्धनस्य व्यथा



एरेस-बेस्ट लैटिन अमरीका, केगल कार्टून्स

लोकतान्त्रिक-व्यवस्था राजनैतिक-समानतायाम् आश्रिता भवति । प्रतिनिधीनां निर्वाचने प्रत्येकं जनस्य अधिकारः समानः भवति । जनाः राजनैतिक-क्षेत्रे परस्परं समानम् अधिकारं तु प्राप्नुवन्ति परन्तु अनेन सह वयम् आर्थिकीम् असमानताम् अपि वर्धमानां पश्यामः । अङ्गुलिगण्याः धनाढ्याः जनाः आये सम्पत्तौ च निज-अनुपातात् आधिक्येन भागं प्राप्नुवन्ति । एतावत् एव नैव, देशस्य सम्पूर्णे आये तेषां भागः अपि क्रमशः वर्धितः अस्ति । समाजस्य अधस्तनभागस्य जनेभ्यः जीवनं यापयितुम् अत्यल्पानि साधनानि लभ्यन्ते। तेषाम् आयः पतितः अस्ति। अनेकधा ते भोजनं वस्त्रं गृहं शिक्षा तथा च चिकित्सा इत्येतादृशाः आधारभूताः आवश्यकताः पूरयितुं काठिन्यानि अनुभवन्ति।

लोकतन्त्रस्य अर्थः अस्ति बहुमतस्य शासनम् इति। निर्धनानां बाहुल्यम् अस्ति अतः लोकतन्त्रस्य अर्थः जातः निर्धनानां साम्राज्यम् इति।

परन्तु इत्थं किमर्थं न भवति ?

वास्तविक-जीवने लोकतान्त्रिक-व्यवस्थाः आर्थिकीः असमानताः न्यूनीकर्तुं आधिक्येन साफल्यं न प्राप्तवत्यः । नवमकक्षायाः अर्थशास्त्रस्य पाठ्यपुस्तके निजस्य भारतस्य निर्धनतायाः विषये पठितवन्तः । अस्माकं मतदातृषु निर्धनानां सङ्ख्या पर्याप्ता अस्ति अतः किञ्चित् अपि दलं तेषां मतैः वञ्चितं न भवितुम् इच्छति। पुनरपि लोकतान्त्रिक-प्रकारेण निर्वाचिताः सर्वकाराः निर्धनता-विषयके प्रश्ने तावत् अवधानं कर्तुं सन्नद्धाः न दृश्यन्ते यावत् भवन्तः तेभ्यः अपेक्षन्ते । केषुचित् अन्येषु देशेषु स्थितिः एतस्मात् अपि अधिक-विकृता अस्ति । बाङ्ग्लादेशे अर्धाधिक-जनसङ्ख्या निर्धनतायां जीवनं यापयति। नैकेषां निर्धन-देशानां जनाः स्व-खाद्यापूर्तये अधुना अपि सम्पन्नदेशेषु आश्रिताः सन्ति।

विश्वस्य धनं केषाञ्चित् जनानां हस्तेषु अस्ति ।



मैन्नी फ्रान्सिस्को - द फिलीपीन्स, केगल कार्टून्स

सामाजिक-विविधतासु सामञ्जस्यम्

किं लोकतान्त्रिक-शासनस्य व्यवस्थाः शान्तेः सद्भावस्य च जीवनं जीवितुं साहाय्य-सिद्धाः भवन्ति ? लोकतान्त्रिक-व्यवस्थातः इयम् अपेक्षा समुचिता अस्ति यत् सा सद्भावपूर्णं सामाजिक-जीवनम् उपलब्धं कारयिष्यति । अस्माभिः एतस्मात् अध्यायात् प्राक्तनेषु अध्यायेषु अधिगतम् अस्ति यत् लोकतान्त्रिक्यः व्यवस्थाः नैक-प्रकारकाणां सामाजिक-विभाजनानि अधिकरोति। अस्माभिः प्रथमे अध्याये दृष्टम् अस्ति यत् कथं बेल्जियमः निजानां विभिन्नानां जातीय-समूहानाम् आकाङ्क्षाणां मध्ये साफल्यपूर्वकं सामञ्जस्यं स्थापितवान्। लोकतान्त्रिक-व्यवस्थाः सामान्यतः निजाभ्यन्तरे स्थिताः प्रतिद्वन्द्विताः वोढुं या प्रक्रिया अस्ति तस्याः प्रक्रियायाः विकासं कुर्वन्ति। एतस्मात् एतेषां सङ्घर्षाणां विस्फोटकस्य हिंसकरूपस्य च ग्रहणस्य आशङ्का न्यूना भवति।

भवतां कथनस्य अभिप्रायः केवलम् एतावत् अस्ति यत् लोकतन्त्रे एतस्य विषयस्य सुदृढं प्रावधानं भवति यत् जनाः परस्परं सङ्घर्षं न कुर्युः। इयं तु सद्भावस्य स्थितिः न अस्ति। किम् एतावता अल्पेन एव सन्तोषं कुर्याम ?

कश्चित् अपि समाजः निजानां विभिन्नानां समूहानां मध्ये सङ्घर्षान् सम्पूर्णतया स्थायिरूपेण न समापयितुं शक्नोति, परन्तु वयम् एतेषाम् अन्तराणां विभेदानां च सम्मानं कर्तुं शिक्षयितुं शक्नुमः तथा च एतेषां मध्ये संवादमाध्यमेन सामञ्जस्यस्थापनस्य उपायं विकसयितुं शक्नुमः। एतस्मै कार्याय लोकतन्त्रं सुष्ठु उपायरूपेण अस्ति। अलोकतान्त्रिक-व्यवस्थाः सामान्यतः निजानाम् आभ्यन्तराणां सामाजिकानां मतभेदानां च अवहेलनं कुर्वन्ति अथवा भेदान् दमयितुं प्रयासं कुर्वन्ति । अनेन प्रकारेण सामाजिकानाम् अन्तराणां, विभाजनानां, सङ्घर्षाणां च दूरीकरणं, निश्चितरूपेण लोकतान्त्रिकीनां व्यवस्थानां कश्चन विशिष्टगुणः अस्ति, परन्तु श्रीलङ्कायाः उदाहरणेन वयम् एतस्य तथ्यस्य विषये अपि स्मरामः यत् एतादृशस्य परिणामस्य प्राप्तये लोकतान्त्रिक-व्यवस्थाभिः स्वयमपि द्वे अपेक्षे पूरणीये भवतः।

- एतस्मिन् विषये अवधानम् आवश्यकम् अस्ति यत् लोकतन्त्रस्य साक्षात् अर्थः बहुमतस्य परामर्शेन शासनं नास्ति। बहुमतयुक्तेन दलेन सदैव अल्पमते सः न आगच्छेत् इति विषये अवधानं करणीयं भवति। तेन सह कार्यकरणस्य आवश्यकता भवति । तदा, सर्वकारः जनसामान्यस्य इच्छायाः प्रतिनिधित्वं करोति । बहुमतस्य अल्पमतस्य च विचारः किञ्चित् अपि स्थायि-वस्तुजातं न भवति।
- एतस्य विषयस्य अवगमनम् अपि आवश्यकम् अस्ति यत् बहुमतस्य शासनस्य अर्थः धर्मस्य, जातेः अथवा भाषायाः आधारेण च बहुमत-सङ्ख्यकस्य समूहस्य शासनं न भवति।

बहुमतस्य शासनस्य अभिप्रायः भवति यत् प्रत्येकं निर्णये निर्वाचने च पृथक् पृथक् जनाः समूहाः च बहुमतस्य निर्माणं कर्तुं शक्नुवन्ति अथवा बहुमते च भवितुं शक्नुन्ति । लोकतन्त्रं तावत्पर्यन्तं लोकतन्त्ररूपेण भवति यावत्पर्यन्तं प्रत्येकं नागरः कस्मिंश्चित् अवसरे बहुमतस्य भागरूपेण भवितुम् अवसरं प्राप्नोति। यदि कश्चित् जन्मनः आधारेण बहुसङ्ख्यकस्य समुदायस्य भागभूतं भवितुं रुध्यते तर्हि लोकतान्त्रिक-शासनं तस्य जनस्य समूहाय च समावेशी न भवितुं शक्नोति।

सङ्घर्ष

मेलनम्,

ऐम्-बेस्ट लैटिन अमरीका, केगल कार्टून्स

सामाजिकविभाजनस्य विषये लोकतान्त्रिक-राजनीतेः द्विप्रकारकाः प्रभावाः एतयोः द्वयोः चित्रयोः माध्यमेन दर्शिताः। प्रत्येकं चित्रस्य उदाहरणं यच्छन् लोकतान्त्रिक-राजनीतौ द्वयोः स्थित्योः परिणामानां विषये एकैकम् अनुच्छेदं लिखन्तु।

नागराणां गरिमा स्वातन्त्र्यं च

जनस्यगरिम्णःस्वातन्त्र्यस्यचसन्दर्भेलोकतान्त्रिक-व्यवस्था कस्याश्चित् अन्यशासनप्रणाल्याः अतीव अग्रे अस्ति । प्रत्येकं जनः निजस्य समुदायस्य जनैः सम्मानं प्राप्तुम् इच्छति। प्रायः, सङ्घर्षः तदा एव जायन्ते यदा केचन जनाः अनुभवन्ति यत् तैः सह सम्मानपूर्वकः व्यवहारः न कृतः । गरिम्णः स्वातन्त्र्यस्य च इच्छा एव लोकतन्त्रस्य आधारः अस्ति । आविश्वं लोकतान्त्रिक-व्यवस्थाः एतत् वस्तुजातं मन्यन्ते – न्यूनातिन्यूनं सिद्धान्तस्य रूपेण तु आवश्यमेव मन्यन्ते। पृथक् पृथक् लोकतान्त्रिक-व्यवस्थासु एतेषु विषयेषु पृथक् पृथक् स्तरीयम् आचरणं भवति । लोकतान्त्रिक-सर्वकाराः सदैव नागराणाम् अधिकाराणां सम्मानं न कुर्वन्ति । पुनरपि, यः समाजः चिरकालं यावत् दासतायाम् आसन्। तेषां कृते इयम् अनुभूतिः सरला न अस्ति यत् सर्वे जनाः समानाः सन्ति।

अत्र स्त्रीणां गरिम्णः विषयस्य एव उदाहरणं स्वीकुर्मः । विश्वस्य अधिकांशसमाजाः पुरुषप्रधानाः एव आसन् । महिलाभिः चिरकालं यावत् यः सङ्घर्षः विहितः ततः परम् अधुना मन्यते यत् महिलाभिः सह गौरवपूर्णः समानतायाः च व्यवहारः लोकतन्त्रस्य कृते आवश्यकम् अस्ति।

अहं केवलं मम बोर्ड-परीक्षायाः विषये चिन्तितः अस्मि परन्तु लोकतन्त्रस्य तु नैकाः परीक्षाः भवन्ति तथा च परीक्षकाः अपि कोट्यधिकाः जनाः भवन्ति।

अद्य यदि क्वचित् एतादृशी स्थितिः अस्ति तर्हि तस्याः अयम् अभिप्रायः नास्ति यत् महिलाभिः सह सदैव सम्मानस्य व्यवहारः जातः अस्ति। वस्तुतः, एकदा सिद्धान्तरूपेण तथ्यम् इदं स्वीकृतं तर्हि अधुना महिलानां कृते वैधानिकस्य नैतिकस्य च रूपेण आत्मानं प्रति दोषपूर्णानां मान्यतानां व्यवहाराणां च विरोधे संघर्षः सरलः जातः अस्ति। अलोकतान्त्रिक-व्यवस्थायाम् एतत् शक्यं न आसीत् यतो हि तत्र वैयक्तिक-स्वातन्त्र्यं तथा च गरिम्णः स्थितिः तु वैधानिकरूपेण मान्या अस्ति न चैव नैतिकरूपेण। अयम् एव नियमः जातिगतायाः असमानतायाः विषये अपि प्रवर्तते। भारते लोकतान्त्रिक-व्यवस्थया दुर्बलानां भेदभाव-ग्रस्तानां च जनानां तज्जातीयानां च जनानां कृते समानतायाः समानस्य अवसरदानस्य च विषये बलं प्रदत्तम् अस्ति। अद्य अपि जातिगतस्य भेदभावस्य दमनस्य च उदाहरणानि दृग्गोचरीभवन्ति परन्तु एतेषां पक्षे वैधानिकम् अथवा नैतिकं बलं न भवति। संभवतः एतादृशस्य एव अनुभवस्य कारणात् सामान्यजनाः निजान् लोकतान्त्रिकान् अधिकारान् प्रति अतीव सावधानाः जाताः।

लोकतन्त्रात् याः अपेक्षाः क्रियन्ते तस्मात् कस्यचित् लोकतान्त्रिक-देशस्य मूल्याङ्कनस्य आधारः अपि निर्मातुं शक्यते। लोकतन्त्रस्य किञ्चित् वैशिष्ट्यम् अस्ति यत् एतस्य निरीक्षणं परीक्षणं च न कदापि समाप्तिं याति। लोकतन्त्रं कस्यचित् एकस्य परीक्षणस्य अनुगुणं समीचीनं स्यात् चेत् अग्रिमस्य निरीक्षणस्य आरम्भः भवति तदा जनाः इतोऽपि लाभानां विषये याचनानाम् आरम्भं कुर्वन्ति। जनाः लोकतन्त्रेण इतोऽपि शोभनं कार्यम् इच्छन्ति। इदम् एव कारणम् अस्ति यत् यदा वयं तान् लोकतन्त्रस्य कार्यप्रणाल्याः विषये पृच्छामः तर्हि ते सदैव लोकतन्त्रेण सम्बद्धानां स्वीयानाम् अपेक्षाणां समूहम् उद्घाटयन्ति तथा च पर्याप्ताः आरोपाः दूषणानि वा तेषां पार्श्वे भवन्ति। दूषणानां विद्यमानतया अपि सूच्यते यत् लोकतन्त्रस्य साफल्यम् अस्ति। एतस्मात् ज्ञायते यत् जनाः सावधानाः जाताः सन्ति तथा च ते सत्तायां विद्यमानानां जनानां कार्यस्य आलोचनात्मकं मूल्याङ्कनं कर्तुम् आरब्धवन्तः। लोकतन्त्रस्य कार्यप्रणालीं प्रति जनानाम् असन्तोष-प्रकटनं लोकतन्त्रस्य साफल्यं तु ज्ञापयति एव अनेन सहैव इदं जनानां प्रजातः नागरं भवितुम् अपि सूचयति। अद्य अधिकतराः जनाः मन्यन्ते यत् सर्वकारस्य आचरणे जनानां मतैः प्रभावः जायते तथा च तेषां हितानि अपि प्रभावयति।

रोजा – प्रेरणायाः कश्चन स्तम्भः

उपरि प्रदत्तं व्यवङ्ग्य-चित्रं रेखाचित्रं च पश्यन्तु। द्वयोः एतस्मिन् भागे उपस्थापिताः विषयाः (नागराणां गरिमा स्वतन्त्रता च) दर्शिताः सन्ति। व्यङ्ग्यचित्रेण रेखाचित्रेण च याः पङ्क्तयः युक्ताः भवन्ति ताः रेखाङ्किताः कुर्वन्तु। किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् रोजापार्क्स का आसीत् तथा च अत्र कस्याः घटनायाः वर्णनं कृतम् अस्ति ?

ये जनाः मन्यन्ते – 'अस्माकं मतस्य प्रभावः भवति'



स्रोतः – एसडीएसए-दलं,स्टेट आफ डेमोक्रेसी इन साउथ एशिया,दिल्ली, आक्सफोर्ड यूनिवर्सिटी प्रेस,2007 इति।

1. लोकतन्त्रं केन प्रकारेण उत्तरदायिनः दायित्वयुक्तस्य वैधसर्वकारस्य च रचनां करोति ?
2. लोकतन्त्रं कासु स्थितिषु सामाजिकीं विविधतां वहति तथा च परस्परं सामञ्जस्यं स्थापयति ?
3. निम्नलिखितानां कथनानां पक्षे विपक्षे च तर्कम् उपस्थापयन्तु –
   - औद्योगिकदेशाः एव लोकतान्त्रिक-व्यवस्थायाः भारं वोढुं शक्नुवन्ति परन्तु निर्धन-देशानां कृते विकासाय राजतन्त्रम् आवश्यकम् ।
   - लोकतन्त्रं स्वीयानां नागराणां मध्ये विद्यमानाः असमानताः न्यूनीकर्तुं न शक्नोति ।
   - निर्धन-देशानां सर्वकारेभ्यः आवश्यकम् अस्ति यत् ते स्वीयानि अधिकानि संसाधनानि, निर्धनतां न्यूनीकर्तुं तथा च आहारस्य वस्त्राणां स्वास्थ्यस्य शिक्षायाः च कृते व्ययं न कुर्युः, अपितु उद्योगानाम् आधारभूतायै आर्थिकसंरचनायै व्ययीकुर्युः ।
   - नागराणां मध्ये आर्थिकी समानता, सम्पन्नेषु विपन्नेषु च द्विविधेषु लोकतान्त्रिक-देशेषु अस्ति ।
   - लोकतन्त्रे सर्वेषां कृते एकस्य एव मतस्य अधिकारः अस्ति । एतस्य अभिप्रायः अस्ति लोकतन्त्रे कस्यचित् अपि प्रकारकस्य प्रभुत्वं सङ्घर्षः च न भवतः ।
4. अधः प्रदत्तेषु विवरणेषु लोकतन्त्रस्य आह्वानानाम् अभिज्ञानं कुर्वन्तु । एताः स्थितयः कथं नागराणां गरिम्णः पूर्णस्य सुरक्षितस्य शान्तिपूर्णस्य च जीवनाय आह्वानं प्रस्तुवन्ति । लोकतन्त्रस्य दृढीकरणाय नीतिगत-संस्थागतान् उपायान् परामृशन्तु –
   - उच्चन्यायालयस्य निर्देशात् परम् ओडिशायां दलितानाम् अदलितानां च प्रवेशाय पृथक् पृथक् द्वाराणि केनचित् मन्दिरप्रशासनेन स्थापितानि आसन् परन्तु न्यायालयस्य आदेशात् समानद्वारेण एव सर्वे प्रविशेयुः इति अनुमतिः प्रदत्ता ।
   - भारतस्य विभिन्न-राज्येषु व्यापकसङ्ख्यायां कृषकाः आत्महत्यां कुर्वन्ति ।
   - जम्मूकाश्मीराणां विभिन्न-राज्येषु व्यापकसङ्ख्यायां कृषकाः आत्महत्यां कुर्वन्ति ।
   - जम्मूकाश्मीराणां गंडवारायाम् आरक्षिसङ्घर्षः अस्ति इति उक्त्वा आरक्षैः त्रयाणां नागराणां हत्यायाः आरोपं दृष्ट्वा एतस्याः घटनायाः निरीक्षणस्य आदेशः प्रदत्तः ।
5. लोकतान्त्रिक-व्यवस्थानां सन्दर्भे एतेषु कः विचारः समुचितः अस्ति – लोकतान्त्रिक-व्यवस्थाभिः साफल्यपूर्वकम् –
   - जनानां मध्ये जातः सङ्घर्षः समाप्तः ।
   - जनानाम् आर्थिक्यः असमानताः समापिताः ।
   - पश्चवर्तिसमूहैः कीदृशः व्यवहारः स्यात्, एतस्मिन् विषये मतभेदाः समाप्ताः ।
   - राजनैतिक्याः असमानतायाः विचारः समाप्तः ।
6. लोकतन्त्रस्य मूल्याङ्कनस्य दृष्ट्या एतेषु कः विषयः लोकतान्त्रिक-व्यवस्थानाम् अनुरूपं नास्ति । तं चिन्वन्तु –
   (क) स्वतन्त्रं निष्पक्षं च निर्वाचनम्
   (ख) जनस्य गरिमा
   (ग) बहुसङ्ख्यकानां शासनम्
   (घ) अधिनियमेन समक्षा समानता
7. लोकतान्त्रिक-व्यवस्थायाः राजनैतिकीनां सामाजिकीनां च असमानतानां विषये कृतानि अध्ययनानि सूचयन्ति यत् –
   - लोकतन्त्रं विकासः च सहैव चलतः ।
   - लोकतान्त्रिक-व्यवस्थासु असमानताः विद्यन्ते ।
   - राजतन्त्रे असमानताः न भवन्ति ।
   - राजतन्त्र-व्यवस्था लोकतन्त्र-व्यवस्थायाः अपेक्षया समुचिता अस्ति इति प्रत्यक्षम् अभवत् ।

8. अधः प्रदत्तम् अनुच्छेदं पठन्तु –

नन्नूः कश्चित् दैनिक-श्रमिकः अस्ति । सः पूर्वदेहल्याः निर्धनवस्तिषु कस्मिंश्चित् वेलकम इति श्रमिकोपनगरे निवसति । तस्य सर्वकारीयम् अन्नप्राप्तेः प्रमाणपत्रं लुप्तं जातं तथा च 2006 तमवर्षे जनवरीमासे सः कृत्रिमस्य अन्नप्रमाणपत्रस्य प्राप्तये प्रार्थनापत्रं दत्तवान्। अग्रिमान् त्रीन् मासान् यावत् सः खाद्य-आपूर्तिविभागस्य कार्यालयं नैकधा अगच्छत् परन्तु तत्र नियुक्तः खाद्याधिकारी तस्य प्रार्थनापत्रस्य स्थितेः विषये किमपि कर्तुं सज्जः न आसीत्। अन्ततः नन्नूः सूचनायाः अधिकारस्य प्रयोगं कुर्वन् दैनिकप्रगतेः विवरणं प्राप्तुम् आवेदनम् अकरोत् । अनेन सहैव तेन एतस्मिन् विषये अपि विवरणं याचितं यत् ये सम्बद्धाः अधिकारिणः तस्य कार्यं न कृतवन्तः तेषां नामानि तथा च अकर्तव्ये सति दण्डव्यवस्थायाः विषये अपि सः विवरणं सूचनां च प्राप्तुम् इष्टवान्। सूचनायाः अधिकारसम्बद्धे आवेदने दत्ते सति सप्ताह-आभ्यन्तरे एव कश्चित् खाद्यविभागस्य निरीक्षकाधिकारी तस्य गृहम् आगतवान् तथा च सः नन्नूम् असूचयत् यत् तस्य खाद्य-प्रमाणपत्रं सज्जीकृतं तथा च भवान् कार्यालयम् आगत्य तत् प्राप्तुं शक्नोति अग्रिमे प्रातःकाले यदा नन्नूः खाद्यप्रमाणपत्रं स्वीकर्तुं गतवान् तदा क्षेत्रीयः खाद्यापूर्तिविभागस्य वरिष्ठतमः अधिकारी तस्य प्रकृष्टं स्वागतम् अकरोत्। असौ अधिकारी चायपानस्य निमन्त्रणम् अपि तस्मै दत्तवान् तथा च अवदत् यत् अधुना भवतः कार्यं सम्पन्नम् अतः सूचनायाः अधिकारयुक्तम् आवेदनं भवान् प्रतिस्वीकुर्यात्।

नन्नू-वर्यस्य उदाहरणेन किं सूच्यते ? नन्नूमहोदयस्य एतस्य आवेदनस्य अधिकारिषु कः प्रभावः जातः ? स्वीयान् पितरौ पृच्छन्तु यत् निजसमस्यानां समाधानाय सर्वकारीयाणां कर्मचारिणां पार्श्वे गते सति तेषाम् अनुभवः कथम् आसीत्।

प्रश्नावली

लोकतन्त्रस्य आह्वानानि

अध्यायः - 8

परिचयः

विगतयोः द्वयोः वर्षयोः भवन्तः यत्किमपि अवगतवन्तः तत् आधाररूपेण मत्वा अस्य अन्तिमाध्यायस्य माध्यमेन लोकतान्त्रिक-राजनीतेः आधारभूतानां प्रश्नानाम् उत्तराणि दातुं प्रयत्नः कृतः अस्ति, यथा – अस्माकं देशे अन्यस्थानेषु च लोकतन्त्रस्य पुरतः कानि कानि आह्वानानि सन्ति ? लोकतान्त्रिक्याः राजनीतेः संशोधनाय किं कर्तुं शक्यते ? अस्माकं लोकतान्त्रिकी व्यवस्था स्वीये व्यवहारे परिणामे च केन प्रकारेण अधिकरूपेण लोकतान्त्रिकी भवितुं शक्नोति ? अस्मिन् अध्याये एतेषां प्रश्नानाम् उत्तराणि न सन्ति । अस्मिन् अध्याये तेषाम् उपायानां विषये केवलं केचन सङ्केताः प्रदत्ताः सन्ति यतः वयं तेषाम् आह्वानानां संशोधनस्य दिशि अग्रेसर्तुं शक्नुमः । अस्य अध्यायस्य माध्यमेन निर्दिष्टम् अस्ति यत् भवन्तः कथं समस्यानां समाधानानि अन्वेष्टुं शक्नुवन्ति तथा च आह्वानानि सम्मुखीकर्तुम् अपि मार्गाणाम् आविष्करणाय स्वदृष्ट्या च लोकतन्त्रम् अपि परिभाषयितुं शक्नुवन्ति ।

आह्वानानां विषये चिन्तनम्

किंभवन्तःनवमकक्षायाःनिजस्यराजनीति-विज्ञानस्यपाठ्यपुस्तकस्य प्रथमम् अध्यायं स्मरन्ति ? तस्मिन् अध्याये अस्माभिः दृष्टम् आसीत् यत् गतेषु शतं वर्षेषु आविश्वं लोकतन्त्रस्य विस्तारः कथम् अभवत् ? ततः परं यः अध्ययनविषयः आसीत् तेन अस्माकम् आरम्भिकः परामर्शः पुष्टः एव कृतः अस्ति यत् समकालिके विश्वे लोकतन्त्रम् इति शासनस्य किञ्चित् प्रमुखरूपम् अस्ति। लोकतन्त्राय किमपि गभीराह्वानं नास्ति तथा नैव काचित् अन्या शासनप्रणाली एतस्य प्रतिद्वन्द्विरूपेण अस्ति। परन्तु लोकतान्त्रिक्याः राजनीतेः विभिन्नानां पक्षाणां यदा अस्माभिः विस्तरेण चर्चा कृता तदा अन्यानि कानिचन तथ्यानि अपि परिलक्षितानि। लोकतन्त्र-व्यवस्थायां यावत्यः सम्भावनाः सन्ति विश्वे अधुना यावत् ताभ्यः सर्वाभ्यः अवस्थाभ्यः कश्चित् अपि सम्पूर्ण-लाभं न प्राप्तुं शक्तवान्। लोकतन्त्रस्य कश्चित् अपि प्रतिद्वन्द्वी नास्ति – एतस्य कथनस्य अभिप्रायः एवं नास्ति यत् तस्य कृते किञ्चित् अपि आह्वानम् एव नास्ति।

लोकतन्त्रस्य स्वीयायाः एतस्याः यात्रायाः विभिन्नपक्षेषु अस्माभिः दृष्टम् अस्ति यत् आविश्वं लोकतान्त्रिकीनां व्यवस्थानां पुरतः गभीराणि आह्वानानि सन्ति। एतानि आह्वानानि कस्याश्चित् सामान्यायाः समस्यायाः इव नास्ति। वयं सामान्यरूपेण ताः समस्याः एव आह्वानम् इति रूपेण कथयामः याः महत्त्वपूर्णाः तु सन्ति, परन्तु यासु विजयः अपि प्राप्तुं शक्यते। यदि कस्याश्चित् समस्यायाः आभ्यन्तरे एतादृशी सम्भावना अस्ति यत् तस्याः समाधानं निदानं वा भवितुं शक्नुयात् तर्हि तां वयम् आह्वानम् इति कथयामः। एकदा यदा वयम् आह्वानस्य पारं गच्छामः तदा पूर्वापेक्षया वयं किञ्चित् अग्रे गच्छामः।

पृथक् पृथक् देशानां समक्षे विविधानि आह्वानानि भवन्ति। भवतां पाठ्यपुस्तके किञ्चित् मानचित्रं दत्तम् आसीत्। अत्र 2000 तमवर्षं यावत् ये लोकतान्त्रिकाः सर्वकाराः आसन् ताः दर्शिताः आसन्। किं भवन्तः एतत् मानचित्रं स्मरन्ति ? तदानीन्तनम् एतत् मानचित्रं सूचयति यत् विश्वस्य चतुर्थांशात्मके भागे अधुना अपि लोकतान्त्रिकी शासन-व्यवस्था नास्ति। एतेषु क्षेत्रेषु लोकतन्त्रार्थम् नैकानि कठिनानि आह्वानानि सन्ति। एतादृशेषु देशेषु लोकतान्त्रिक-व्यवस्थां प्रति गन्तुं लोकतान्त्रिकस्य सर्वकारस्य च रचनायैः आवश्यक्याः आधारभूत-संरचनायाः च आह्वानम् अस्ति। तत्र वर्तमानकाले अलोकतान्त्रिकी शासनव्यवस्था अस्ति अतः आदौ तस्य नाशाय सेनायाः नियन्त्रणं च समापयितुं कस्याश्चित् संप्रभुता-युक्तायाः प्रकृष्ट-शासन-व्यवस्थायाः च स्थापनस्य आह्वानम् अस्ति।

अधिकतराणां स्थापितानां लोकतान्त्रिक-व्यवस्थानां समक्षे निजस्य विस्तारस्य आह्वानम् अस्ति। यत्र लोकतान्त्रिकस्य शासनस्य आधारभूतानां सिद्धान्तानां प्रवर्तनं सर्वेषु क्षेत्रेषु सर्वेषु सामाजिकेषु समूहेषु विभिन्नसंस्थासु च भवेत् इति आवश्यकम् अस्ति। स्थानीयाः सर्वकाराः आधिक्येन अधिकारसम्पन्नाः संघस्य च सर्वासां घट्टानां कृते संघस्य सिद्धान्ताः व्यवहारिक-स्तरेण प्रवर्तेरन्, महिलानाम् अल्पसङ्ख्यक-समूहानां च समुचिता सहभागिता सुनिश्चिता स्यात् इत्येतादृशानि एव आह्वानानि सन्ति। एतस्य सन्दर्भस्य अयम् अपि अभिप्रायः अस्ति यत् न्यूनातिन्यूनं विषयाः एव लोकतान्त्रिकात् नियन्त्रणात् रहिताः भवेयुः। भारतस्य विश्वस्य च पुरातनेषु लोकतन्त्रेषु कस्यचित् अमेरिका इति देशस्य समक्षे अपि इदम् एव आह्वानम् अस्ति।

तृतीयम् आह्वानं लोकतन्त्रस्य दृढीकरणस्य अस्ति। प्रत्येकं लोकतान्त्रिक-व्यवस्थायाः समक्षे केनचित् रूपेण इदम् आह्वानम् अस्ति एव। व्यवस्थया लोकतान्त्रिक-संस्थानां व्यवहाराणां च दृढीकरणम् अपि सम्मिलितम् अस्ति। इदं कार्यम् अनेन प्रकारेण स्यात् यत् जनाः लोकतन्त्र-सम्बद्धाः स्वीयाः आशाः पूरयितुं शक्नुयुः इति। परन्तु, पृथक् पृथक् समाजेषु सामान्य-जनस्य लोकतन्त्रम् उद्दिश्य पृथक् पृथक् अपेक्षाः भवन्ति अतः इदम् आह्वानं विश्वस्य पृथक् पृथक् भागेषु पृथक् अर्थं पृथक् स्वरूपं च प्राप्नोति। संक्षेपेण कथयामः चेत् एतस्य अभिप्रायः संस्थानां कार्यपद्धतेः संशोधनं तथा च दृढीकरणं भवति येन जनानां सहभागितायाः नियन्त्रणस्य च वर्धनं स्यात्। एतदर्थं निर्णय-स्वीकरणस्य प्रक्रियायां सम्पन्नानां प्रभावशालिनां च जनानां नियन्त्रणस्य प्रभावस्य च न्यूनीकरणस्य आवश्यकता भवति।

नवमकक्षायाः तथा च एतस्य पाठ्यपुस्तकस्य विभिन्नेषु अध्यायेषु अस्माभिः नैकेषाम् उदाहरणानां कथानां च माध्यमेन एतेषाम् आह्वानानां विषये अवधानं कृतम् अस्ति। आयान्तु, लोकतन्त्रस्य निज-यात्रायाः सर्वेषु महत्त्वपूर्णेषु अवस्थिति-विशेषेषु प्रत्यागच्छामः, अनुभूतानां विषयाणां पुनःस्मरणं कुर्याम तथा च पश्येम यत् एतासु विशिष्ट-स्थितिषु लोकतन्त्रस्य समक्षे कानि कानि आह्वानानि सन्ति।

अस्तु ! तर्हि अधुना भवद्भ्यः
अनुमतिस्वीकरणस्य कालः समायातः .....
आगामिन्याः परीक्षायाः कृते शुभकामनाः !

भवद्भिः सह पुनः मेलिष्यामः
एकादशकक्ष्यायाम् ! भवन्तः
राजनैतिकविज्ञानं चिन्वन्ति किल् ?

पृथक् पृथक् सन्दर्भाः पृथक् पृथक् आह्वानानि च

एतेषु प्रत्येकं व्यङ्ग्यचित्रं लोकतन्त्रस्य किमपि आह्वानं दर्शयति। सूचयन्तु यत् तत् आह्वानं किम् अस्ति ? इदम् अपि सूचयन्तु यत् एतस्मिन् अध्याये आह्वानानां याः तिस्रः श्रेणयः सूचिताः सन्ति इयं तासु कस्याः श्रेण्याः आह्वानम् अस्ति ?

मुबारकः पुनः चितः

पैट्रिक – केपेट-केगल कार्टून्स

लोकतन्त्रस्य दृष्टिः

ऐस्-केगल कार्टून्स

उदारवादि-लैङ्गिकी समानता

टैब्-द कैलगरी सन्, केगल कार्टून्स

निर्वाचन-अभियानस्य धनम्

ऐस्-बेस्ट लैटिन अमरीका-केगल कार्टून्स

उदाहरणानि सन्दर्भाः च	एतस्मिन् विषये लोकतन्त्रस्य आह्वानस्य भवतां विवरणम्
चिले – जनरल-पिनोशे इत्यस्य सर्वकारः निर्वाचने पराजयं प्राप्नोत् परन्तु नैकासु संस्थासु अधुना अपि सेनायाः अधिग्रहणम् ।	**[उदाहरणम्] सर्वासु सर्वकारीयसंस्थासु जन-नियन्त्रणं प्रथमं बहुदलीयनिर्वाचनस्य सम्पादनं, निर्वासित-नेतॄणां स्वदेशं प्रति आह्वानम् इति ।**
पोलैण्ड – सोलिडरिटी इत्यस्य प्रथमस्य साफल्यात् परं सर्वकारः सैनिकशासनं प्रवर्तितवान् तथा च सोलिडरिटी इत्यस्मिन् प्रतिबन्धः स्थापितः ।	
घाना – स्वतन्त्रता प्राप्ता तथा च एनक्रूमाः राष्ट्रपतिः चितः ।	
म्यांमारः – 15 वर्षेभ्यः अधिककालात् सू इत्यस्य निग्रहणं, सैनिक-शासनाय वैश्विकस्तरे मान्यता च । अन्ताराष्ट्रिय-सङ्घटनम् – शिष्टाः एकमात्रं महाशक्तिरूपेण अमरीका राष्ट्रस्य चिन्तां न करोति तथा च एकपक्षीयान् निर्णयान् करोति ।	
अन्ताराष्ट्रिय-सङ्घटनम् – शिष्टाः एकमात्रं महाशक्तिरूपेण अमरीका राष्ट्रस्य चिन्तां न करोति तथा च एकपक्षीयान् निर्णयान् करोति ।	
मैक्सिको – पी.आर आई इत्यस्य पराजयात् परं 2000 तमे वर्षे द्वितीयं स्वतन्त्रनिर्वाचनम्, पराजिताः प्रत्याशिनः भ्रष्टाचारसम्बद्धं दूषणम् उपस्थापितवन्तः ।	
चीनः – कम्युनिस्ट-दलम् आर्थिक-संशोधनम् अङ्गीकरोति परन्तु राजनैतिक-सत्तायाम् एकाधिकारं यथावत् स्थापयति ।	
पाकिस्तानम् – जनरल-मुशर्रफः जनमत-सङ्ग्रहं कारयति, मतदातृसूच्यां भ्रष्टाचारस्य आरोपाः जायन्ते ।	
इराकः – नवीनः सर्वकारः स्वीयां सत्तां न स्थापयितुं पारयति, महता प्रमाणेन साम्प्रदायिकी हिंसा ।	
दक्षिणाफ्रीका – मण्डेलावर्यस्य सक्रियराजनीतेः सन्यासः, तस्य यः उत्तराधिकारी मबेकी इति आसीत् तस्मिन् श्वेत-अल्पसङ्ख्यकेभ्यः प्रदत्तानि राज्यानि पुनः प्रतिस्वीकर्तुं बलं नियोज्यते स्म ।	

उदाहरणानि सन्दर्भाः च	एतस्मिन् विषये लोकतन्त्रस्य आह्वानस्य भवतां विवरणम्
अमरीका, गुआंतानामो बे – संयुक्त-राष्ट्र-संघस्य महासचिवः एतत् अन्ताराष्ट्रियस्य अधिनियमस्य उल्लङ्घनम् इति सूचयति, अमरीकादेशः तस्य कथनं न स्वीकरोति।	
सऊदी अरबः - महिलाभ्यः सार्वजनिक-गतिविधिषु भागं ग्रहीतुम् आज्ञा नास्ति, धार्मिकेभ्यः अल्पसङ्ख्यकेभ्यः स्वातन्त्र्यं नैव।	
युगोस्लाविया - कासोवीप्रान्ते सर्व इत्येषां अल्बानियायी इत्येषां च जनानां मध्ये जातीयः अवसादः, यूगोस्लाविया विकीर्णं जातम्।	
बेल्जियम – संवैधानिक-संशोधनानां प्रक्रिया प्राचलत परन्तु डचभाषिणः जनाः असन्तुष्टाः, ते अधिकां स्वायत्तताम् अभ्यर्थयन्ति।	
श्रीलङ्का – सर्वकारस्य लिट्टे-महोदयस्य च मध्ये शान्तिवार्ता भङ्गा जाता, हिंसा पुनः प्रवृत्ता।	
अमरीका, नागराधिकाराः – अश्वेतजनाः समानाधिकारान् प्राप्तवन्तः परन्तु ते अधुना अपि निर्धनाः अल्पशिक्षिताः दुर्बलस्थितौ च सन्ति।	
उत्तर-आयरलैण्डः – गृहयुद्धं समाप्तं परन्तु कैथोलिकेषु प्रोटेस्टैंटजनेषु पारस्परिकस्य विश्वासस्य अभावः।	
नेपालः – संविधानसभायाः भाविनिर्वाचनम् अस्ति, तरायीमध्ये असन्तोषः, माओवादिनः अस्त्राणि न प्रत्यर्पितवन्तः।	
बोलिविया – जल-सङ्घर्षस्य समर्थकः मोरालेजः प्रधानमन्त्री जातः। बहुराष्ट्रिय-समवायाः सकोपं पूर्वसूचनां दत्तवन्तः यत् वयं देशं परित्यज्य गमिष्यामः।	

पृथक् पृथक् प्रकारस्य आह्वानानि

अधुना, यद्यपि भवद्भिः एतानि सर्वाणि आह्वानानि लिखितानि सन्ति तर्हि आयान्तु एतानि कासुचित् व्यापकश्रेणिषु स्थापयामः। अधः लोकतान्त्रिक-राजनीतेः काश्चन मर्यादाः कोष्ठकेषु स्थापिताः सन्ति। गतखण्डे एकस्मिन् अथवा एकाधिकेषु देशेषु भवन्तः कानिचन आह्वानानि लक्ष्यीकृतवन्तः आसन्। केषुचित् व्यङ्ग्य-चित्रेषु भवन्तः एतानि दृष्टवन्तः। भवन्तः इच्छेयुः चेत् अधः प्रदत्तानां कोष्ठकानां पुरतः मेलनस्य विषये अवधानं कुर्वन्तः एतानि आह्वानानि लेखितुं शक्नुवन्ति। एतदतिरिच्य भारतात् अपि एतेषु कोष्ठकेषु प्रदीयमानम् एकैकम् उदाहरणम् अङ्कयन्तु। यदि भवन्तः पश्यन्ति यत् किंचित् आह्वानं कोष्ठकेषु समुचितं न भाति तर्हि भवन्तः नवीनश्रेणीः विरच्य तासु एतान् विषयान् स्थापयितुं शक्नुवन्ति।

संवैधानिकरचना	
लोकतान्त्रिकाधिकारः	
संस्थानां कार्याणि	
निर्वाचनम्	
संघवादः विकेन्द्रीकरणम्	
विविधतायाः समावेशनम्	
राजनैतिकसङ्घटनम्	
काचित् अन्या श्रेणी	
काचित् अन्या श्रेणी	

आयान्तु, एतासां श्रेणीनां नवीनं वर्गीकरणं कुर्याम। अधुना एतदर्थं वयं तान् मानकान् आधाररूपेण मंस्यामः, येषां चर्चा अध्यायस्य प्रथमे भागे कृता अस्ति। एतासां सर्वासां श्रेणीनां कृते न्यूनातिन्यूनम् एकम् उदाहरणं भारतात् अपि अन्वेषयन्तु।

आधारसज्जीकरणस्य आह्वानानि	
विस्तारस्य आह्वानम्	
लोकतन्त्रस्य व्यवस्थितरीत्या दृढीकरणस्य आह्वानम्	

आयान्तु, अधुना केवलं भारतस्य विषये विचारयन्तु। समकालिकस्य भारतस्य लोकतन्त्रस्य समक्षे विद्यमानानाम् आह्वानानां विषये अवधानं कुर्वन्तु। एतेषु तेषां पञ्चानां सूचीं रचयन्तु येषु पूर्वम् अवधानं करणीयम् आसीत्। इयं सूची प्राथमिकताम् अपि सूचयेत् अर्थात् भवन्तः यत् आह्वानं महत्त्वपूर्णं गुरु च मन्यन्ते तत् सर्वेभ्यः उपरि स्थापयन्तु। शिष्टानि तेन एव क्रमेण अनन्तरकाले इति। एतादृशस्य आह्वानस्य एकम् उदाहरणं यच्छन्तु तथा च सूचयन्तु यत् भवतां दृष्ट्या तत्र तस्मै किमपि विशिष्टं स्थानं किमर्थं प्रदत्तम्।

प्राथमिकता	लोकतन्त्रस्य आह्वानम्	उदाहरणम्	प्राथमिकतायाः कारणम्
1.			
2.			
3.			
4.			
5.			

राजनैतिक-संशोधनेषु विचारः

एतेषु प्रत्येकम् आह्वानेन सह संशोधनस्य सम्भावनाः अपि सम्बद्धाः सन्ति । यथा पूर्वम् उक्तम् अस्ति, वयम् आह्वानानां विषये चर्चां केवलम् एतस्मात् कारणात् कुर्मः यतो हि वयं 'तेषां समाधानं शक्यम्' इति चिन्तयामः । लोकतन्त्रस्य विभिन्नानाम् आह्वानानां विषये सर्वे परामर्शाः अथवा प्रस्तावाः "लोकतान्त्रिकाः परिष्काराः, इति उच्यन्ते । अत्र वयं वाञ्छितानां राजनैतिक-संशोधनानां सूचीं न दद्मः यतो हि एतादृशी काचित् अपि सूची अन्तिमरूपेण न निर्मातुं शक्यते। यदि सर्वेषां देशानाम् आह्वानानि सदृशानि न सन्ति तर्हि एतस्य अयम् अभिप्रायः अस्ति यत् राजनैतिक-संशोधनानां कृते प्रत्येकं जनः समानस्य उपायस्य प्रयोगं न कर्तुं शक्नोति । वयं कारयानस्य प्रारूपम् अज्ञात्वा तस्य समस्या-समाधानस्य उपायं न वक्तुं शक्नुमः । कारयाने कुत्र दोषः अस्ति, तस्मिन् स्थाने कानि उपकरणानि संलग्नानि सन्ति तस्य प्रारूपं मॉडल इति किम् अस्ति – एतत् सर्वं ज्ञात्वा एव तस्य परिष्कारस्य उपायः बोधयितुं शक्यते ।

परन्तु किं वयम् अद्यतने सन्दर्भे स्वीये देशे वाञ्छितानां परिष्काराणां न्यूनातिन्यूनाम् एकां सूचीं रचयितुं शक्नुमः ? वयं राष्ट्रियस्तरस्य संशोधनस्य काञ्चन प्रस्तावान् कल्पयितुं शक्नुमः परन्तु एवं शक्यते यत् संशोधने यथार्थम् आह्वानं राष्ट्रियस्तरीयं न स्यात् । केषाञ्चित् महत्त्वपूर्णानां प्रश्नानाम् उत्तराणि राज्यस्य स्थानीयस्य च स्तरेण अपि दातुं शक्यन्ते । पुनः, इयं सूची किञ्चित् कालानन्तरं व्यर्था अपि भवितुं शक्नोति । अतः, सूचीनिर्माणस्य स्थाने आयान्तु केषाञ्चित् व्यापक-दिशा-निर्देशानां विषये विचारयामः ये भारते राजनैतिक-संशोधनानां कृते उपाय-अन्वेषणस्य काले मनसि स्थापयितुं शक्यन्ते ।

अधिनियमस्य रचनां कृत्वा राजनीतेः संशोधनं भवेत् इत्येतादृशः उपायः अतीव आकर्षकः अनुभूयते। नवीनैः अधिनियमैः सर्वे अवाञ्छिताः विषयाः समाप्तिं गमिष्यन्ति इदं चिन्तनं कामं सुखदं स्यात् परन्तु एतादृश्याः लोभप्रवृत्त्याः नियन्त्रणम् एव श्रेष्ठम् अस्ति । निश्चितरूपेण संशोधनानां विषये अधिनियमस्य काचित् महत्त्वपूर्णा भूमिका अस्ति। सावधानं रचिताः अधिनियमाः अनुचितं राजनैतिकम् आचरणं नाशयन्ति समुचितस्य कार्यस्य च प्रोत्साहनं करिष्यन्ति । परन्तु विधिक-संवैधानिक-परिवर्तनेषु कृतेषु सत्सु लोकतन्त्रस्य आह्वानानां समाधानं पूर्णतः न कर्तुं शक्यते । अधिनियमानां निर्माणं तु क्रिकेट्-क्रीडायाः अधिनियमवत् अस्ति । एल.बी.डब्ल्यू. इत्यस्य नियमानां परिवर्तनेन (बल्लेबाज) लगुडधारकद्वारा आचर्यमाणस्य बल्लेबाजी इत्यस्य नकारात्मक-उपायस्य आचरणस्य वा न्यूनीकरणं कर्तुं शक्यते परन्तु कश्चित् अपि एतत् न चिन्तयितुं शक्नोति यत् केवलं नियमानां परिवर्तनेन एव क्रिकेट्क्रीडायाः संशोधनं भविष्यति इति । इदं कार्यं तु मुख्यतः क्रीडकैः प्रशिक्षकैः क्रिकेट्-प्रशासकैः च एव करणीयं स्यात्। अनेन एव प्रकारेण राजनैतिक-संशोधनविषयकं कार्यम् अपि मुख्यतः राजनैतिक-कार्यकर्तृभिः दलैः आन्दोलनैः राजनैतिक-रूपेण च सावधानं नागरिकैः एव कर्तुं शक्यते ।

अधिनियमस्य परिवर्तन-काले एतस्मिन् तथ्ये अपि गभीरतया विचारः करणीयः स्यात् यत् राजनीतौ एतस्य कीदृशः प्रभावः भविष्यति । कदाचित् परिणामाः सर्वथा विपरीताः जायन्ते , यथा – केषुचित् राज्येषु इयं व्यवस्था प्रकल्पिता अस्ति यत् येषां प्रत्याशिनां द्व्यधिका सन्ततिः अस्ति ते पञ्चायत-निर्वाचने भागं न निर्वोढुं शक्नुवन्ति । एतस्मात् कारणात् नैके निर्धनाः जनाः महिलाः च लोकतान्त्रिक-अवसरात् वञ्चिताः जाताः यद्यपि एवं कर्तुं मानसिकता न आसीत् परन्तु अनायासेन एव एतत् जातम् । सामान्यतः कस्यचित् विषयस्य प्रतिबन्धनाय ये अधिनियमाः रच्यन्ते ते राजनीतौ आधिक्येन साफल्यं न भजन्ते । ये अधिनियमाः राजनैतिक-कार्यकर्त्रे सुकार्यं कर्तुम् आधिक्येन प्रेरयन्ति तथा च लाभदायकाः सन्ति तेषां साफल्यस्य सम्भावना अधिका भवति । श्रेष्ठाः अधिनियमाः ते सन्ति ये जनान् लोकतान्त्रिक-परिष्काराय शक्तिं प्रयच्छन्ति । सूचनायाः अधिकारः इति अधिनियमः जनान् सूचना-युक्तान् करोति तथा च लोकतन्त्रस्य रक्षकस्य रूपेण जनान् च सक्रियान् कर्तुं समीचीनम् उदाहरणम् अस्ति । एतादृशः अधिनियमः भ्रष्टाचारं निरुध्यति तथा च भ्रष्टाचारस्य रोधनाय कठोर-दण्डेन च दण्डयितुं विद्यमानानाम् अधिनियमानां साहाय्यं करोति ।

लोकतान्त्रिकं संशोधनं तु मुख्यतः राजनैतिकदलानि एव कुर्वन्ति । अतः, राजनैतिक-संशोधनानां बलं मुख्यतः लोकतान्त्रिक-कार्यम् अधिकं दृढीकर्तुम् एव स्यात् । यथा भवद्भिः राजनैतिक-दलानां सम्बद्धे अध्याये पठितम् आसीत् , एतादृशेषु सर्वेषु परिष्कारेषु मुख्यचिन्ता एतस्मिन् विषये स्यात् यत् एतैः सामान्यनागरस्य राजनैतिक-सहभागितायाः स्तरस्य गुणवत्तायाः च संशोधनं परिष्कारः च भवति अथवा नैव भवति ।

राजनैतिक-संशोधनस्य कस्मिंश्चित् अपि प्रस्तावे सुसमाधानस्य चिन्तया सह इदं चिन्तनम् अपि स्यात् यत् एतानि संशोधनानि कः किमर्थं च करिष्यति । इयम् अपि बुद्धिमत्ता नास्ति यत् संसद् कमपि एतादृशम् अधिनियमं कल्पयिष्यति यः प्रत्येकं राजनैतिक-दलस्य सासंदस्य च हितान् विरुध्य स्यात् इति । परन्तु लोकतान्त्रिके आन्दोलने नागर-सङ्घटने सञ्चार-तन्त्रेषु च विश्वासस्य उत्पादकाः ये उपायाः सन्ति तेषां साफल्यस्य सम्भावना आधिक्येन भवति।

आयान्तु, एतान् सामान्यान् दिशानिर्देशान् ध्यानपूर्वकं पश्येम तथा च लोकतन्त्रस्य तेषां केषाञ्चित् आह्वानानां विषये अवधानं कुर्याम येषां संशोधनस्य काचित् सम्भावना अस्ति । तर्हि अधुना संशोधनस्य काञ्चन दृढप्रस्तावान् रचयामः ।

अत्र कानिचन आह्वानानि प्रदत्तानि सन्ति । एतदर्थं राजनैतिकानां संशोधनानाम् आवश्यकता अस्ति । एतेषाम् आह्वानानां विषये सविस्तरं चर्चां कुर्वन्तु। अत्र संशोधनस्य ये विकल्पाः दत्ताः सन्ति तान् पश्यन्तु तथा च सकारणं स्वरुच्यनुगुणं समाधानानि सूचयन्तु । इदं स्मरणं स्यात्, यत् अत्र प्रदत्ताः विकल्पाः साक्षात् समुचिताः अथवा अनुचिताः इति न कथयितुं शक्यन्ते । भवन्तः नैकान् विकल्पान् मेलयित्वा उत्तरं दातुं शक्नुवन्ति अथवा एतादृशं समाधानम् अपि सूचयितुं शक्नुवन्ति यस्य विषये अत्र चर्चा न जाता अस्ति । भवन्तः स्वीयं समाधानं सविस्तरं यच्छन्तु तथा च किमर्थं भवन्तः एतादृशं समाधानं कृतवन्तः तस्य समर्थनाय तर्कम् अपि उपस्थापयन्तु ।

चिकित्सकानाम् अनुपस्थितिः

आह्वानम् –

उत्तरप्रदेशस्य सर्वकारेण किञ्चित् सर्वेक्षणं कारितं तथा च अधिगतं यत् ग्रामीण-स्वास्थ्य-केन्द्रेषु पदस्थाः अधिकतराः चिकित्सकाः अनुपस्थिताः आसन् । ते नगरेषु निवसन्ति, वैयक्तिकचिकित्सां कुर्वन्ति तथा च मासे वारद्वयम् अथवा एकं वारं निजे नियुक्तिस्थाने भवन्ति । ग्रामीणैः सामान्य-रोगाणां चिकित्सायै अपि नगरं गन्तव्यं भवति । तत्र गत्वा निज-चिकित्सकेभ्यः बह्वधिकं शुल्कं दातव्यं भवति ।

संशोधनस्य प्रस्तावाः –

- चिकित्सकानां यत्र सर्वकारीयाः नियुक्तिः अस्ति ते नियमितरूपेण तत्र एव तिष्ठेयुः इति सर्वकारेण अनिवार्यं करणीयम् अन्यथा तेषां पदच्युतिः स्यात् ।
- चिकित्सकस्य उपस्थितिः अस्ति न वा इत्यस्य विषयस्य निरीक्षणाय जनपद-प्रशासनस्य आरक्षकाणां च सहसा निरीक्षणं स्यात् ।
- चिकित्सकद्वारा कृतस्य कार्यस्य वार्षिकीं समाख्यां ग्रामपञ्चायतः लिखेत् इति अधिकारः तस्य पार्श्वे स्यात् पंचायते च सा समाख्या स्थापनीया ।
- एतादृशीनां समस्यानां समाधानम् उत्तरप्रदेशस्य अनेकभागेषु वण्टनेन एव शक्यम् येन प्रशासनं कुशलतया सञ्चालयितुं शक्नुयात् ।

राजनैतिक-दलानां दानद्वारा सङ्गृहितं धनम्

आह्वानम् –

ये प्रत्याशिनः लोकसभायाः गते लोकसभायाः निर्वाचने भागं गृहीतवान् तेषु प्रत्येकं प्रत्याशिनः सम्पत्तिः सामान्यतः एक-कोटिरूप्यकतः अधिका आसीत् । इयं भीतिः प्रकट्यते स्म यत् अधुना निर्वाचनं केवलं धनाढ्यानां तेषां समर्थकानां च कृते एव शक्यते । अधिकतराणि राजनैतिक-दलानि महतां व्यावसायिक-कुटुम्बानां दानेन अर्जिते धने एव आश्रितानि आसन् । आशङ्का इयम् आसीत् यत् राजनीतौ धनस्य इयं वर्धमाना भूमिका निर्धनानां प्रतिकूला भविष्यति तथा च भारतीये लोकतन्त्रे ये निज-समस्याः स्वल्पतया उपस्थापयन्ति अधुना ते न तथा अपि कर्तुं शक्ष्यन्ते ।

संशोधनस्य प्रस्तावाः –

- प्रत्येकं राजनैतिक-दलस्य वित्तीय-विवरणं सार्वजनिकं भवेत् । एतस्य लेखनसम्बद्धकार्यं सर्वकारीयैः वित्तलेखनस्य अधिकारिभिः कारणीयम् ।
- निर्वाचनस्य व्ययः सर्वकारेण करणीयम् । दलेभ्यः निर्वाचन-व्ययाय सर्वकारः कञ्चन धनराशिं दद्यात् । नागराणाम् अपि दलानां राजनैतिक-कार्यकर्तॄणां च आर्थिक-साहाय्याय प्रोत्साहनं स्यात् । एतादृशे दानधने आयकरे अपि मुक्तता स्यात् ।

अन्या काचित् समस्या यां भवन्तः महत्त्वपूर्णाम् इति मन्यन्ते –

आह्वानम् –

संशोधनस्य प्रस्तावाः

-
-
-

राजनेतॄणां संशोधनम्

रोजा अन्ततः लिङ्गदोह- मान्यां स्वीय-कक्षायाः समक्षे अमिलत् एव। इमां योजनां सा केभ्यचित् दिनेभ्यः करोति स्म। मान्ये ! वास्तविकतायां कनाडा इति युक्तं व्यङ्ग्यचित्रं मह्यं बहु अरोचत, रोजा वार्त्तालापस्य आरम्भाय इदं प्रकरणम् आरभत। कः ? लिङ्गदोह-मान्या प्राथम्येन न तत् व्यङ्ग्यचित्रं स्मृतवती, मान्ये , तत् व्यङ्ग्यचित्रं यत्र उक्तम् अस्ति यत् कनाडायाः 98 प्रतिशतं जनाः सर्वान् राजनेतॄन् केनचित् बृहता कारयानेन मञ्जूषायां पिधाय नियाग्रा-जल-प्रपाते क्षेप्तुम् इच्छन्ति। अहं तु भारतीयनेतॄन् स्मरामि स्म अस्माकं नेतॄणां क्षेपणाय तु महतः कारयानस्य ब्रह्मपुत्रसदृशायाः च नद्याः आवश्यकता स्यात् इति।

लिङ्गदोह-मान्या रोजायाः कथनं श्रुत्वा स्मितमुखा जाता। अधिकतराणां भारतीयानाम् इव सा अपि नेतॄणां व्यवहारात् दलस्य देशस्य च शासनस्य तेषां कार्यात् खिन्ना आसीत्। परन्तु सा इच्छति स्म यत् रोजा एतस्याः समस्यायाः जटिलताम् अवगच्छेत्। भवती किम् एतत् अनुभवति यत् राजनेतॄणाम् अपसारणात् भवत्याः समस्यायाः समाधानं भविष्यति ?

आम्, मान्ये, किम् एते दुष्टाः नेतारः एव अस्माकं देशस्य समस्यायै उत्तरदायिनः न सन्ति ? मम अभिप्रायः अस्ति भ्रष्टाचाराय दलपरिवर्तनाय जातिवादाय साम्प्रदायिक-उपद्रवाय अपराधाय प्रत्येकम् अव्यवस्थायै च इति।

शिक्षिका लिङ्गदोहा - अधुना तु आवश्यकता अस्ति यत् वयं वर्तमानेभ्यः सर्वेभ्यः नेतृभ्यः मुक्ताः भवामः। किं भवती विश्वसिति यत् तेषां नेतॄणां स्थाने ये जनाः आगमिष्यन्ति तेषाम् आचरणं शुद्धं भविष्यति तथा च ते पूर्वनेतृवत् न भविष्यन्ति इति ?

रोजा - आम्, मया एतस्मिन् विषये न चिन्तितम् आसीत्, परन्तु एतत् आवश्यकं यत् नवीनाः नेतारः एवंविधाः न भवेयुः। सम्भाव्यते यत् अग्रे श्रेष्ठचरित्रसम्पन्नाः नेतारः आगच्छेयुः इति।

शिक्षिका लिङ्गदोहा - अहं भवत्याः कथनम् अङ्गीकरोमि यत् यदि जनाः आधिक्येन सावधानाः स्युः तथा च अभिरुच्या भ्रष्टान् दुश्चरित्रान् च नेतॄन् अपसारयेयुः तथा च श्रेष्ठजनानां चयनं कुर्युः तेन स्थितेः परिवर्तनं शक्यते, पुनः, इदम् अपि भवितुं शक्यते यत् सर्वे नेतारः भ्रष्टाः न स्युः इति--- ,

मान्ये भवती इत्थं कथं वक्तुं शक्नोति , ? मध्ये एव रोजा अवदत्।

लिङ्गदोहा – अहम् एतत् न कथयामि यत् राजनेतारः भ्रष्टाः न सन्ति। शक्यते, यत् यदा भवती नेतॄणां विषये चिन्तयति तदा भवत्याः मनसि ते महान्तः जनाः स्युः , येषां चित्रं वार्त्तापत्रेषु प्रकाशितं भवति। अहम् अपि तान् एव नेतॄन् स्मरामि यान् अहं जानामि। अहं न अनुभवामि यत् यान् नेतॄन् अहं जानामि ते मम मित्राणां सर्वकारीय-अधिकारिणाम् अनुबन्ध-धारकाणाम् अथवा मम परिचितानां मध्यवर्गीय-व्यवसायि-जनानाम् अपेक्षया अधिकाः भ्रष्टाः स्युः। राजनेतॄणां भ्रष्टाचारः आधिक्येन दृश्यते तथा च तेन एव आधारेण सर्वेषां नेतॄणां विषये धारणाम् अथवा कल्पनां वयं कुर्मः। तेषु केचन भ्रष्टाचारिणः सन्ति केचन च सत्यनिष्ठाः अपि सन्ति।

रोजा हतोत्साहा न जाता , मान्ये, मम कथनस्य अभिप्रायः अयम् आसीत् यत् ये भ्रष्टाचारस्य जातेः धर्मस्य च आधारेण राजनीतिं कुर्वन्ति तेषां तथा च ये राजनीतेः आश्रयेण अनुचितानि कार्याणि कुर्वन्ति तेषां प्रतिबन्धः स्यात् इति।

मान्या लिङ्गदोहा - रोजे ! प्रत्यक्षतः इत्थं न वक्तुं शक्यते , एकं तथ्यं तु इदम् एव यत् राजनीतौ जातेः धर्मस्य च प्रयोगं ये कुर्वन्ति तेषां वारणाय अधिनियमाः तु अधुना अपि सन्ति एव परन्तु नेतारः तेषाम् अवहेलनस्य उपायम् अन्वेषयन्ति। यावत्पर्यन्तं राजनैतिकैः नेतृभिः जनैः च जातेः धर्मस्य च आधारेण समाजस्य विभाजनस्य भ्रान्तेः च निरोधः न भविष्यति, तावत्पर्यन्तं अधिनियमेन किमपि न कर्तुं शक्यते। यावत्पर्यन्तं जनाः नेतारः च जातेः धर्मस्य च सीमाभ्यः उपरि न उत्थास्यन्ति तावत्पर्यन्तं वास्तविकं लोकतन्त्रं न आगमिष्यति।

लोकतन्त्रस्य पुनःपरिभाषा

गतवर्षे अस्माभिः लोकतन्त्रस्य यात्रायाः आरम्भः तया न्यूनतम-परिभाषया सह कृतः आसीत् । किं भवन्तः तां परिभाषां स्मरन्ति ? गतवर्षस्य भवतां पाठ्यपुस्तकस्य द्वितीये अध्याये प्रदत्ता परिभाषा एवंविधा आसीत् – लोकतन्त्रं शासनस्य तत् स्वरूपम् अस्ति यत्र जनाः निजानां शासकानां चयनं स्वयं कुर्वन्ति। ततः परम् अस्माभिः नैकेषां विषयाणाम् अवधानं कृतं तथा च परिभाषायां कानिचन अन्यानि तथ्यानि योजितानि।

जनैः चितः शासकः एव सर्वान् प्रमुखान् निर्णयान् स्वीकुर्यात्, निर्वाचने जनानां पार्श्वे वर्तमान-शासकानां परिवर्तनस्य निजेच्छायाः च प्रकटीकरणस्य पर्याप्ताः अवसराः विकल्पाः च भवेयुः । एते विकल्पाः अवसराः च प्रत्येकं जनाय समानरूपेण समुपलब्धाः भवेयुः।

विकल्प-चयनस्य अनेन उपायेन एतादृशस्य सर्वकारस्य घटनं स्यात् यः संविधानस्य आधारभूतानां नियमानां नागराणां च अधिकाराः एते सन्ति इति भावनया कार्यं कुर्यात्।

कदाचित् भवत्सु नैराश्यं स्यात् यत् एतस्यां परिभाषायां तेषाम् उच्च-आदर्शानां चर्चा अपि नास्ति यान् वयं लोकतन्त्रेण सह मेलयित्वा पश्यामः। अस्माभिः लोकतन्त्रस्य केषाञ्चित् आदर्शानां चर्चा अवश्यमेव कृता आसीत् परन्तु व्यवहारिक-दृष्ट्या अस्माभिः लोकतन्त्रस्य न्यूनतमा परन्तु स्पष्टपरिभाषया चर्चायाः आरम्भः कृतः आसीत् । एतेन अस्माकं कृते लोकतान्त्रिक्याः अलोकतान्त्रिक्याः च शासनव्यवस्थायां स्पष्टभेदकरणम् अपि सरलम् अभवत्।

भवद्भिः अधिगतं स्यात् यत् लोकतान्त्रिक-सर्वकारस्य राजनीतेः च विभिन्नपक्षाणां विषये निजे चर्चा-कार्यक्रमे वयं तस्याः परिभाषायाः अतीव अग्रे आगतवन्तः।

अस्माभिः विस्तरेण लोकतान्त्रिकानाम् अधिकाराणां चर्चा कृता तथा च प्राप्तं यत् एते अधिकाराः केवलं मतदानस्य निर्वाचने भाग-ग्रहणस्य राजनैतिक-सङ्घटनस्य च निर्माणाय एव केवलं न सन्ति । अस्माभिः केषाञ्चित् एतादृशानां सामाजिकानाम् आर्थिकानां च अधिकाराणां चर्चा कृता ये अधिकाराः केनचित् अपि लोकतान्त्रिक-शासनेन निजनागरेभ्यः दातव्याः।

अस्माभिः सत्तायाः सहभागिता लोकतन्त्रस्य भावनायाः अनुकूलं मता आसीत् तथा च चर्चा कृता आसीत् यत् सर्वकाराणां सामाजिक-समूहानां च मध्ये सत्तायाः सहभागिता लोकतन्त्राय आवश्यकी अस्ति।

अस्माभिः एतद् अपि दृष्टम् आसीत् यत् लोकतन्त्रं बहुमतस्य राजतन्त्रीय-व्यवस्थावत् अथवा क्रूरशासन-व्यवस्था इति न भवितुं शक्नोति तथा च अल्पसङ्ख्यकस्य समुदायस्य जनानां समादरः तु लोकतन्त्राय अत्यावश्यकम् अस्ति।

लोकतन्त्र-विषयिणी अस्माकं चर्चा सर्वकारस्य तस्य कार्यप्रक्रियायाः च पुरो गता। अस्माभिः इयं चर्चा अस्ति विहिता यत् भेदभावस्य समाप्तिः अपि लोकतान्त्रिक-व्यवस्थायाः महत्त्वपूर्णं कार्यम् अस्ति।

अन्ते अस्माभिः चर्चितं यत् कयाचित् अपि लोकतान्त्रिक-व्यवस्थया अस्माभिः केषाञ्चित् न्यूनतमानां परिणामानाम् आशा तु करणीया एव।

एवं कृत्वा वयं लोकतन्त्रस्य तस्याः परिभाषायाः विपरीतं न आचरितवन्तः या परिभाषा अस्माभिः विगते वर्षे प्रदत्ता आसीत् । कश्चित् अपि देशः लोकतान्त्रिकः देशः अस्ति इत्येतदर्थं केचन निश्चिताः बिन्दवः सन्ति येषाम् आचरणं तेन निश्चयेन करणीयम् एव भवति अतः वयं तेषां बिन्दूनां परिभाषया एव चर्चायाः आरम्भं कृतवन्तः । ततः परम् अस्माभिः लोकतन्त्राय वाञ्छितानां बिन्दूनां विषयाणां वा चर्चा कृता येषां पूर्तिः अवश्यमेव स्यात्। पुनः लोकतन्त्रस्य परिभाषातः अग्रे गत्वा समुचितायाः लोकतान्त्रिक्याः व्यवस्थायाः विवरणं समुपस्थापितम्।

कामपि समुचितां लोकतान्त्रिक-व्यवस्थां वयं कथं परिभाषयितुं शक्नुमः ? एतस्याः विशेषताः काः काः सन्ति ? किमपि लोकतन्त्रं समुचितम् अस्ति इति सूचयितुं बोधयितुं च तस्य काः काः विशेषताः आवश्यकरूपेण स्युः ? अपि च, यदि काचित् व्यवस्था लोकतान्त्रिकी अस्ति तर्हि तस्यां कः विषयः निश्चयेन न स्यात् इति?

एतान् निर्णयान् भवन्तः कुर्वन्तु।

ऐरस-बेस्ट लोटिन अमरीका- केगल कार्टून्स इति

श्रेष्ठ-लोकतन्त्रस्य परिभाषां लिखन्तु भवतां लेखनस्य कृते स्थानम् इदम् अस्ति -

(निज-नाम) ---------- इत्यस्य श्रेष्ठलोकतन्त्रस्य परिभाषा [अधिकतमैः पञ्चाशत्-शब्दैः]

विशेषताः [केवलं बिन्दुशः लिखन्तु। यावतः बिन्दून् भवन्तः सूचयितुम् इच्छेयुः तावतः रचयितुं शक्नुवन्ति। न्यूनातिन्यूनैः बिन्दुभिः एतस्य सम्पादनस्य प्रयासं कुर्वन्तु]

1.

2.

3.

4.

5.

6.

7.

किम् अयम् अभ्यासः भवद्भ्यः अरोचत ? किम् अयम् अभ्यासः भवद्भ्यः अरोचत ? किं भवन्तः एतस्य अध्ययनकाले आनन्दम् अनुभूतवन्तः ? किम् एषः बहुकठिनः आसीत् ? किं काश्चन समस्याः जाताः ? किं भयम् अपि अनुभूतवन्तः ? भवन्तः अनुभवन्ति यत् अनेन पाठ्यपुस्तकेन एतस्मिन् महत्त्वपूर्णे अभ्यासे भवतां साहाय्यं न कृतम् आसीत् ? किं भवन्तः भीताः सन्ति यत् भवतां परिभाषा अनुचिता अपि भवितुं शक्नोति ?

तर्हि लोकतन्त्रस्य विषये भवद्भिः कृतस्य अध्ययनस्य इयम् अस्ति अन्तिमा शिक्षा – श्रेष्ठस्य लोकतन्त्रस्य काचित् निर्मिता परिभाषा न भवति। श्रेष्ठं लोकतन्त्रं तदेव अस्ति यथा वयं तत् चिन्तयामः तथा च यस्य निर्माणस्य आकाङ्क्षां कुर्मः – इदं तथ्यं किञ्चित् विचित्रम् इति अनुभवितुं शक्यते। पुनः अपि एतस्मिन् तथ्ये अवधानं कुर्मः – किम् एतत् एव लोकतन्त्रम् अस्ति यत् कश्चित् दण्डबलेन सूचयेत् बोधयेत् यत् श्रेष्ठं लोकतन्त्रं किम् अस्ति।

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING
ISBN 81-7450-729-9